
पद्मपुराणान्तर्गता

॥ श्रीशिवगीता ॥

श्रीशङ्करानन्दभारतीविरचितभाष्येण समलङ्कृता



प्रधानसम्पादकः

आचार्य श्रीपाद सुब्रह्मण्यः

सञ्चालकः

सम्पादकः

श्री टि. वि. शिवकुमारशर्मा

आन्ध्रप्रदेश प्रभुत्व प्राच्यलिखित ग्रन्थालयः

परिशोधनालयश्च, हैदराबाद्

२०१३

पद्मपुराणान्तर्गता ॥ श्रीशिवगीता ॥

पद्मपुराणान्तर्गता

।। श्रीशिवगीता ।।

श्रीशङ्करानन्दभारतीविरचितभाष्येण समलङ्कृता

प्रधानसम्पादकः

आचार्य श्रीपाद सुब्रह्मण्यः

सञ्चालकः

सम्पादकः

श्री टि.वि.शिवकुमारशर्मा

आन्ध्रप्रदेश प्रभुत्व प्राच्यलिखित ग्रन्थालयः

परिशोधनालयश्च, हैदराबाद्

2013

Srishivageetha

Bhashyakara :
Sri Shankarananda Bharati

Chief Editor:
Prof. Sripada Subrahmanyam

Editor:
Sri T.V. Shivakumarasharma

ISBN No. : 978-93-80379-32-6

Publication No. : 99

First Edition	: 2013
No. of Copies	: 500
Price	: Rs. 235/-

Published by:
A.P.Govt. Oriental Manuscripts
Library and Research Institute,
Behind O.U. Police Station,
Osmania University Campus,
Hyderabad – 500 007.
Phone : 040-27097709.

Printed at :
Raghavendra graphics
Vidya Nagar, Hyderabad - 500 044.

प्रस्तावना

भारतीयसंस्कृतिपरिरक्षणे मूलभूताः अत्यन्तं प्रधानभूताश्च प्राचीनतालपत्रग्रन्थाः, प्राचीन हस्तलिखितग्रन्थाश्च इत्यत्र न कोऽपि संशयः। ऋषिकल्पाः निस्स्वार्थमनस्काश्च अस्माकं पूर्वकालिकाः पञ्चशतवर्षेभ्यः प्रागेव अस्माकं प्राचीनसंस्कृतिः भाविकालिकानां कृते दर्शनीया, प्रदेया चेति सङ्कल्पं कृतवन्तः, योऽयं प्रयत्नः इदानीमस्माभिः परिदृश्यमानः हस्तलिखितग्रन्थरूपः। काव्य शास्त्र वैद्य वैदिक वैज्ञानिक रङ्गेषु वर्तमानाः बहवः ग्रन्थाः प्रथमतः अस्माकं हस्तलिखितग्रन्थरूपेणैव अलभन्त। मुद्रणसौकर्यरहिते पूर्वकाले गुरुपरम्परया वंशपारम्पर्येण वा ज्ञातान् विषयान् पत्रस्थं कर्तुं अस्माकं पूर्वजाः महायत्नमकुर्वन्। तस्मिन् प्रयत्ने कृतकृत्यैस्तैः अस्माकं कृते ज्ञानभिक्षा प्रदत्ता इत्यत्र न कापि अतिशयोक्तिः। तेषां महात्मनां लेशतो वा ऋणापगमनाय अस्माकं सर्वेषामपि कर्तव्यमिदं वर्तते यत् तेषां हस्तलिखितग्रन्थानां समुचितरूपेण परिरक्षणं, तेषु ग्रन्थेषु निक्षिप्तामूल्यविषयज्ञानसमुपार्जनञ्च। तेषां हस्तलिखितग्रन्थानामध्ययने अधुनातनकाले देशविदेशीयाः समग्रं परिशोधनं कुर्वन्ति।

"आन्ध्रप्रदेशप्रभुत्वप्राच्यलिखितग्रन्थालयः, परिशोधनालयश्चे"तिनाम्नी इयं संस्था आन्ध्रप्रदेशप्रभुत्वसर्वकरेण 1975 संवत्सरे राष्ट्रराजधान्यां भाग्यनगर्यां स्थापिता। तेलुगु, संस्कृतम्, उर्दू, अरबिक्, पर्षियन् इत्यादिभाषासु सप्तविंशति सहस्राधिकाः हस्तलिखितग्रन्थाः अस्यां संस्थायां विराजन्ते। आधुनिकरीतिषु एते ग्रन्थाः सुरक्षिता वर्तन्ते अस्यां संस्थायाम्। देशविदेशीयाः

प्रतिदिनं एतां संस्थां प्रति आगत्य परिशोधनमपि कुर्वन्ति। राष्ट्रिय पाण्डुलिपिग्रन्थ संस्थायाः (National Mission for Manuscripts, New Delhi) सहकारेण आन्ध्रप्रदेशराष्ट्रे सर्वत्र विद्यमानानां हस्तलिखितग्रन्थानां सर्वेक्षणकार्यक्रमोऽपि स्वीकृतः अनया संस्थया। एतस्याः संस्थयाः प्रधानलक्ष्येषु अन्यतमं हस्तलिखितग्रन्थानां मुद्रापणं राष्ट्रप्रभुत्वार्थिकसाहाय्येन अनया संस्थया स्वीकृतं वर्तते।

<u>प्रस्तुत ग्रन्थः</u>

श्रीशङ्करानन्दभारतीविरचितभाष्ययुता श्रीशिवगीतानामकोऽयं हस्तलिखितग्रन्थः अस्माकं संस्थायां विराजते। इतिहासपुराणविषये भगवद्गीता, रामगीता, गणेशगीता, देवीगीता, अष्टावक्रगीता, गुरुगीता, शिवगीता, कपिलगीता इत्यादयः बहवः गीताः दरीदृश्यन्ते। एताः सर्वा अपि गीताः उपनिषत्सारभूता एवेति ज्ञायते। एतासु गीतासु अन्यतमा गीता इयं शिवगीता पद्मपुराणान्तर्गता वर्तते। भगवान् महेश्वरः श्रीरामाय आत्मतत्त्वमुपदिदेश। शिवगीतामहिमवर्णनादारभ्य मोक्षयोगपर्यन्तमनेके विषयाः अस्यां गीतायां षोडशाध्यायेषु निरूपिता अत्र।

ग्रन्थस्यास्य प्रकाशनकार्यं संस्थापक्षतः अस्माभिः स्वीकृतम्। अयञ्च विषयः दक्षिणाम्नायश्रृङ्गेरीशारदापीठाधीश्वराणां जगद्गुरूणां श्रीभारतीतीर्थ श्रीचरणानां निकटे मया प्रस्तावितः। श्रीचरणाश्च आशिषः प्रदाय अस्मान् अनुगृहीतवन्तः। अस्मिन् सन्दर्भे श्रीजगद्गुरूणां चरणारविन्दयोः प्रथमतः साष्टांगप्रणामान् समर्पयामि।

हस्तलिखितग्रन्थानां सम्पादकत्वनिर्वहणं, मुद्रणार्हशुद्धप्रतिनिर्माणञ्च अतीव कष्टसाध्यमिति सर्वैः विदितप्रायमेव। यस्मिन् विषये हस्तलिखितग्रन्थो वर्तते तस्मिन् विषये वैदुष्यसद्भावे एव एतादृशकार्यं निर्वोढुं शक्यते। वर्धिष्णवः, युवानश्च श्री टि.वि. शिवकुमारशर्ममहाशयाः नैकशास्त्रपण्डिताः श्री श्रृङ्गेरी

जगद्गुरुमहासंस्थाने विराजन्ते। शिवगीतायाः एकं भाष्यं श्रीमदभिनवनृसिंहभारतीस्वामिभिः विरचितं दक्षिणाम्नायशृङ्गेरीपीठपक्षतः प्रकाशितं वर्तते। अन्यच्च प्रकृतं भाष्यं श्रीशङ्करानन्दभारतीस्वामिभिः विरचितं अस्माकं निकटे मातृकारूपेण वर्तते। उभे अपि भाष्ये श्री शिवकुमारशर्ममहाशयैः सम्यक् अधीते। अतः इदं मातृकासम्पादनकार्यं निर्वोढुं श्रीशिवकुमारशर्ममहाभागा एव समर्था इति मत्वा एतत्कार्यं कुर्वन्तु इति एतेषां निकटे विज्ञापना कृता। कृपया कार्यमिदं स्वीकृतवताम् एतेषां कृतज्ञतापूर्वकनमस्कारान् विदध्महे।

सम्पादनकार्येऽस्मिन् सहकृतवद्भ्यः सर्वेभ्यः अस्मत्सहोद्योगिभ्यः, संस्कृतविभागेः सहोद्योगिन्योः श्रीमती टि.अरुणा (परिशोधनाधिकारिणी) श्रीमती डा.पि.सीताभवानी (परिशोधनसहायिका) महाभागयोश्च धन्यवादान् वितरामि। अस्मत्संस्थायाः एकोनशततम (99) ग्रन्थोऽयं पाठकानां कृते महते उपकाराय कल्पते इति विश्वसिमः।

इत्थं
निवेदयिता
श्रीपाद सुब्रह्मण्यः
सञ्चालकः

॥ सम्पादकीयम् ॥

संसारेऽस्मिन् परिभ्रमतां दुःखजातमनुभवतां जीवानां आत्यन्तिक सुखप्राप्तिः मोक्षेणैव भवति । स च मोक्षः नित्यशुद्धबुद्धाद्वितीयब्रह्म साक्षात्कारेणैव । स एव निरतिशयं नित्यसुखमित्युच्यते । तद्भिन्नं सर्वमपि सुखं स्रक्-चन्दन-पुत्र-पश्वाद्यैहिकं स्वर्गलोकभोगरूप-मामुष्मिकं च सातिशयं क्षयिष्णु च । तादृशसुखस्यापि कारणं धर्म एव । स च धर्मः वेदप्रतिपादितः वेदैकसमधिगम्यश्च । यद्यपि लोके सर्वे जनाः 'सर्वदा सुखमेव मे भूयात्' 'दुःखं मनागपि मा भूत्' इति मन्यन्ते , इष्टप्राप्तये अनिष्टपरिहाराय च अहर्निशं यतन्ते च । तथापि सुखप्राप्ति-दुःखपरिहारयोरुपायं प्रत्यक्षानुमानादिना लौकिकेन केनापि प्रमाणेन अवगन्तुं न शक्यते । तादृशोपायबोधकं एकमात्रं प्रमाणं वेदः। अत एव अभियुक्तैः - "प्रत्यक्षेणानुमित्या वा यस्तूपायो न बुध्यते । एनं विदन्ति वेदेन तस्माद्वेदस्य वेदता ॥" इत्युक्तम् ।

स च वेदः परमेश्वरस्य मुखारविन्दात् निश्श्वासवदाविर्भूतः, अत एव अपौरुषेय इत्युच्यते । अयं वेदः ऋग्यजुस्सामाथर्वभेदेन चतुर्धा वर्तते । एकैकोपि वेदः शाखाभेदेन पुनः विभक्तोऽस्ति । तदुक्तं - "एकविंशत्यध्वयुक्तमृग्वेदं ऋषयो विदुः। सहस्राध्वा सामवेदो यजुरेकशताधिकम् । नवाध्वाऽथर्वणः" इति । एवञ्च वेदः त्रिंशदुत्तर-एकशताधिक-सहस्रशाखात्मकः (११३०) वरीवर्ति । तादृशे अतिविस्तृते वेदवृक्षे एकैकस्यामपि शाखायां संहिता-ब्राह्मण-

आरण्यक-उपनिषदादि भागाः विद्यन्ते । तत्र प्रतिपादितं सर्वमपि विषयं अवबोद्धुं मन्दप्रज्ञाः जनाः न पारयन्तीति धिया परमकारुणिकाः महर्षयः वेदोक्तविषयानेव संगृह्य स्मृतिरूपेण अरचयन् । एवमेव इतिहास-पुराणान्यपि वेदार्थाविष्कारणायैव आविर्भूतानि । "इतिहासपुराणाभ्यां वेदं समुपबृंहयेत्" इति अभियुक्तोक्तरीत्या वेदार्थावगमने इतिहासपुराणानि भृशमुपकुर्वन्ति । अत एव रामायण-महाभारतरूपाणां इतिहासानाम् , अष्टादशपुराणानाम् उपपुराणानां च महत् स्थानं विद्यते । तेषु वेदप्रतिपादित एव विषयः आख्यायिकोपाख्यान संवादादिरूपेण उपनिबद्धो वर्तते ।

प्रस्थानत्रयम्

वेदः पूर्वोत्तरभागरूपेण द्विधा विभक्तोऽस्ति । पूर्वभागः धर्मप्रतिपादकः, उत्तरभागः आत्मतत्त्वप्रतिपादकः। तत्र धर्मः जैमिनिमहर्षिणा "अथातो धर्मजिज्ञासा" इत्यादिभिः सूत्रैः द्वादशलक्षण्यां विचारितः। आत्मतत्त्वं च भगवता बादरायणेन "अथातो ब्रह्मजिज्ञासा" इत्यादिभिः सूत्रैः शारीरकमीमांसायां विचारितम् । इमावेव पूर्वोत्तरभागौ पूर्वोत्तरमीमांसे इति, कर्मकाण्डज्ञानकाण्डाविति च व्यवह्रियेते । उत्तरमीमांसा तु वेदान्तशब्देनाप्यभिधीयते।

वेदान्तो नाम उपनिषत्प्रमाणम् । उपनिषत्सु जीवात्म-परमात्मविषयकविचारः कृतः। सतीष्वपि बह्वीषु उपनिषत्सु "ईश-केन-कठ-प्रश्न-मुण्ड-माण्डूक्य-तित्तिरिः। ऐतरेयं च छान्दोग्यं बृहदारण्यकं दश" इत्युक्तरीत्या दशोपनिषद एव प्रसिद्धाः। आत्मतत्त्वविचारस्य प्राधान्येन अत्रैव कृतत्वात् । ता उपनिषदः एव श्रुतिप्रस्थानमित्यप्युच्यन्ते । उपनिषत्सारसङ्ग्रहात्मिका भगवतो वासुदेवस्य मुखारविन्दान्निस्सृता श्रीमद्भगवद्गीता स्मृतिप्रस्थानत्वेन प्रसिद्धा । श्रुतिस्मृत्युक्तार्थदृढीकरणाय भगवता वेदव्यासमहर्षिणा शारीरकसूत्राणि सन्दृब्धानि । सूत्रप्रस्थानत्वेन न्यायप्रस्थानत्वेन वा प्रसिद्धेषु एतेषु सूत्रेषु उपनिषत्प्रतिपादित एव विषयो युक्तिभिर्दृढीकृतः। एवं च प्रस्थानत्रयशब्देन श्रुतिस्मृतिसूत्राणि उच्यन्ते । अस्य च प्रस्थानत्रयस्य जगद्गुरुश्रीशङ्करभगवत्पादाचार्याः अनवद्यं भाष्यं विदधिरे ।

श्रीमन्महाभारतान्तर्गता श्रीमद्भगवद्गीतैव यद्यपि स्मृतिप्रस्थानत्वेन प्रसिद्धा । तथापि अन्याः काश्चन गीताः तत्र तत्र पुराणादिषु समुपलभ्यन्ते । यथा पद्मपुराणे - शिवगीता, गणेशपुराणे - गणेशगीता, देवीभागवते - देवीगीता, श्रीमद्भागवते - अवधूतगीता, अध्यात्मरामायणे - रामगीता इत्यादयः। उपनिषत्सु प्रतिपादितस्य आत्मतत्त्वस्य सुलभतया बोधनायैव एतासां प्रणयनं जातमिति वक्तुं शक्यते ।

इतिहासपुराणस्थाः काश्चन गीताः

- **श्रीमद्भगवद्गीता** - 'गीता'शब्दश्रवणसमनन्तरमेव सर्वेषां मनस्सु प्रथमतः भगवद्गीतैव उपस्थिता भवति । इयं भगवद्गीता श्रीमन्महाभारते भीष्मपर्वणि वर्तते । अस्यां अष्टादश अध्यायाः, सप्तशतं श्लोकाश्च सन्ति । अस्याः भगवद्गीतायाः एतादृशं वैशिष्ट्यं वर्तते - यत् सर्वान् लोकानुद्दिधीर्षुः भगवान् वासुदेवः अर्जुनं निमित्तीकृत्य स्वयमेव इमां उपदिदेश । इयं भगवद्गीता सर्वोपनिषत्सारभूताऽस्ति । "सर्वोपनिषदो गावो दोग्धा गोपालनन्दनः। पार्थो वत्सः सुधीर्भोक्ता दुग्धं गीतामृतं महत् ॥" इति गीताख्यं अमृतं सर्वोपनिषत्सारत्वेन कीर्तितमस्ति ।

- **रामगीता** - उमामहेश्वरसंवादरूपे अध्यात्मरामायणे उत्तरकाण्डे पञ्चमसर्गे रामगीता अस्ति । अस्यां गीतायां द्विषष्टिः(६२) श्लोकाः सन्ति । अत्र भगवता श्रीरामचन्द्रेण स्वानुजाय लक्ष्मणाय आत्मतत्त्वमुपदिष्टम् । "विज्ञानमेतदखिल-श्रुतिसारमेकं वेदान्तवेद्य चरणेन मयैव गीतम् । यः श्रद्धया परिपठेत् गुरुभक्तियुक्तो मद्रूपमेति यदि मद्वचनेषु भक्तिः ॥" इति अस्याः गीतायाः अन्ते इयं सकलश्रुतिसाररूपत्वेन कीर्तितास्ति ।

- **गणेशगीता** - इयं गीता श्रीगणेशपुराणे उत्तरखण्डे गजाननवरेण्यसंवादरूपेणास्ति । "अहमेव जगद्यस्मात् सृजामि पालयामि च । कृत्वा नानाविधं वेषं संहरामि स्वलीलया ॥" इति भगवान् गणेश एव अत्र सृष्टिस्थितिसंहारकारणत्वेन प्रतिपादितः। अस्यां गीतायां एकादशाध्यायाः सन्ति ।

- **देवीगीता** - देवीभागवते सप्तमस्कन्धे देवीगीता वर्तते । इयं गीता नवाध्यायात्मिका । "योगञ्च भक्तिसहितं ज्ञानं च श्रुतिसम्मतम् । वदस्व परमेशानि ! त्वमेवाहं यतो भवेः॥" इति हिमालयेन प्रार्थिता भगवती जगदम्बा तस्मै स्वीयं तत्त्वमुपदिदेश ।

- **कपिलगीता** - इयं श्रीमद्भागवते तृतीयस्कन्धे वर्तते । स्वमात्रा देवहूत्या अभ्यर्थितः कपिलः तस्यै आत्मतत्त्वमुपादिशत् । इयं गीता नवाध्यायात्मिका ।

- **उद्धवगीता** - श्रीमद्भागवते एकादशस्कन्धे वर्तते उद्धवगीता । भगवतो वासुदेवस्य उद्धवस्य च संवादरूपेयं गीता चतुर्विंशत्यध्यायात्मिका । अत्र अन्ते "य एतदानन्दसमुद्रसम्भृतं ज्ञानामृतं भागवताय भाषितम् । कृष्णेन योगेश्वरसेविताङ्घ्रिणा सच्छ्रद्धयाऽऽसेव्य जगद्विमुच्यते॥" इत्यस्ति ।

- **अष्टावक्रगीता (१)** - इयं गीता एकविंशत्यध्यायात्मिका ।

"विंशत्येकमितैः खण्डैः श्लोकैरात्माग्निमध्यखैः। अवधूतानुभूतेश्च श्लोकाः संख्याक्रमा अमी ॥" इति अत्र विंशत्युत्तरत्रिशताधिक सहस्रश्लोकाः (१३२०) सन्तीति अस्यामेव गीतायां वर्तते ।

- **अष्टावक्रगीता** (२) - श्रीदत्तात्रेयपरशुरामसंवादरूपे त्रिपुरारहस्ये ज्ञानखण्डे इयं गीता वर्तते ।

- **अवधूतगीता** - इयं अवधूतगीता भगवता दत्तात्रेयेण विरचिता । "दत्तात्रेयावधूतेन निर्मिताऽऽनन्दरूपिणा । ये पठन्ति च शृण्वन्ति तेषां नैव पुनर्भवः॥" इति गीतायाः अस्याः अन्ते वर्तते । अस्यां गीतायां अष्टौ अध्यायाः सन्ति ।

- **सूर्यगीता** - सौरपुराणे कर्मकाण्डे इयं सूर्यगीता वर्तते । अस्यां गीतायां पञ्च अध्यायाः सन्ति ।

- **यमगीता** (१) - इयं विष्णुपुराणान्तर्गता । कलिङ्गनाम्नो विप्रस्य यमस्य च संवादरूपेणास्ति । एकाध्यायरूपायामस्यां एकोनचत्वारिंशत् श्लोकाः सन्ति ।

- **यमगीता** (२) - इयं नृसिंहपुराणेऽन्तर्गता अग्नि-यमसंवादरूपा एकाध्यायात्मिका ।

- **ब्रह्मगीता** - इयं स्कान्दपुराणान्तर्गतायां सूतसंहितायां

यज्ञवैभवखण्डे उत्तरभागे वर्तते । अस्यां चतुर्मुखब्रह्मणा देवान् ऋषीन् प्रति च उपनिषत्सारः उपदिष्टः। अस्यां द्वादशाध्यायाः सन्ति ।

- **सूतगीता** - इयं स्कान्दपुराणान्तर्गतायां सूतसंहितायां यज्ञवैभवखण्डे उत्तरभागे वर्तते । अस्यां सूतमहर्षिणा मुनीन् प्रति आत्मविचारः उपदिष्टः। अस्यां अष्टौ अध्यायाः सन्ति ।

- **गुरुगीता** - स्कान्दपुराणे ब्रह्मसंहितायां उमामहेश्वरसंवादरूपेण इयं गुरुगीता वर्तते । अध्यायत्रयात्मिकायां अस्यां गीतायां गुरोः माहात्म्यं, गुरोर्विषये शिष्येण अनुसर्तव्या रीतिः इत्यादयो विषयाः सम्यक् प्रतिपादिताः ।

एवमेव ऋभुगीता अनुगीता इत्यादयः नैकाः गीताः पुराणेषु समुपलभ्यन्ते । एतासु सर्वास्वपि गीतासु सामान्यतः औपनिषदं आत्मतत्त्वमेव प्रतिपादितं वर्तते । कासुचिद्गीतासु उपासनान्यपि प्रतिपादितानि ।

शिवगीता

इयं शिवगीता पद्मपुराणान्तर्गता । इयं हि - "अथातस्संप्रवक्ष्यामि शुद्धकैवल्यमुक्तिदम् । अनुग्रहान्महेशस्य भवदुःखस्य भेषजम् ॥" इत्यारभ्य "इत्युक्त्वा प्रययुस्सर्वे सायं सन्ध्यामुपासितुम् । स्तुवन्तः

सूतपुत्रं ते सन्तुष्टा गोमतीतटम् ॥" इत्यन्तैः एकाशीत्युत्तर सप्तशतश्लोकैः (७८१) षोडशाध्यायेषु उपनिवद्धाऽस्ति । भगवता परमेश्वरेण श्रीरामाय आत्मतत्त्वोपदेशः अत्रत्यविषयः। सीतापहरणानन्तरं श्रीरामः खिन्नः सन् यदा मरणोन्मुखो भवति तदा अगस्त्यमहर्षिः तत्समीपमागत्य तस्मै शिवमाहात्म्यमुपवर्ण्य शिवनामसहस्रमुपादिशत् । तदा श्रीरामः भक्त्या तपसा च परमेश्वरमाराध्य शिवानुग्रहं सम्पाद्य साक्षात् परशिवेनैव आत्मतत्त्वोपदेशं, पाशुपतास्त्रं च समवाप । सांसारिकसकलदुःखस्य निवृत्त्युपायः अनेकासु उपनिषत्सु विप्रकीर्णः प्रमेयः अत्र सम्यक् प्रतिपादितोऽस्ति । इयं सर्वोपनिषत्सारभूता वर्तते । अत एव अत्र अध्यायान्ते 'इतिश्रीपद्मपुराणे शिवगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे शिवराघवसंवादे---अध्यायः' इति पुष्पिका केषुचित् पुस्तकेषु दृश्यते ।

अत्र प्रथमाध्याये शिवगीतामहिमवर्णनं, शिवभक्तिश्रेष्ठत्ववर्णनम्, द्वितीये श्रीरामसन्निधिं प्रति अगस्त्यागमनं, तदुपदेशप्रकारवर्णनम्, तृतीये अगस्त्येन विरजादीक्षा-पाशुपतव्रतोपदेशनम्, चतुर्थे श्रीरामस्य सगुणेश्वर साक्षात्कारवर्णनम्, पञ्चमे श्रीरामस्य शिवप्रसादात् दिव्यास्त्रप्राप्तिवर्णनम्, षष्ठे शिवविभूतिवर्णनम्, सप्तमे सुसूक्ष्मपरमात्मस्वरूपतो महाभूतोत्पत्ति वर्णनम्, श्रीरामस्य विश्वरूपदर्शनम्, अष्टमे पाञ्चभौतिकदेहस्य उत्पत्त्यादि वर्णनम्, नवमे देहस्वरूपवर्णनम्, दशमे जीवस्वरूपनिरूपणम्, एकादशे

देहान्तरप्राप्तिप्रकार-परलोकप्राप्तिप्रकारयोर्वर्णनम्, द्वादशे उपासना विधिनिरूपणम् , त्रयोदशे मुक्तिस्वरूप-ज्ञानसाधन-जीवन्मुक्तस्वरूपवर्णनम्, चतुर्दशे पञ्चकोशोपवर्णनं च कृतम् । पञ्चदशे भक्तियोगः, षोडशे मोक्षयोगश्च निरूपितः।

इत्थम् इयं शिवगीता सगुणनिर्गुणब्रह्मविद्ये सरलतया प्रतिपादयन्ती शिवोपासकानामद्वैतब्रह्मजिज्ञासूनां नितरामुपकारिण्यास्ते ।

शिवगीतायाः व्याख्यातारः

- श्रीमदभिनवनृसिंहभारतीस्वामिनः - श्रीमत्परमहंस परिव्राजकाचार्यैः श्रीमच्छङ्करभगवत्पादैः सनातनधर्मप्रचाराय भारतस्य चतसृषु दिक्षु पुरी-द्वारका-बदरी-शृङ्गेर्याख्येषु क्षेत्रेषु चत्वारः मठाः स्थापिताः। तेषु दक्षिणस्यां दिशि शृङ्गगिरिक्षेत्रे स्थापितः श्रीशारदामठः श्रीभगवत्पादसाक्षाच्छिष्यैः श्रीसुरेश्वचार्यैरारभ्य अद्य यावदविच्छिन्नगुरुपरम्परया [illegible]ोतते । पीठेऽस्मिन् चतुर्विंशतितमा आचार्याः श्रीमदभिनवनृसिं भारती महास्वामिनः आसन् । एते क्रिस्तीये १५९९ तमवत्सरतः १६२२ तमवत्सरपर्यन्तं शृङ्गगिरिशारदा पीठमलमकुर्वन् । एते षट्स्वपि दर्शनेषु अद्वितीयपाण्डित्य शोभिताः मन्त्रशास्त्रेऽपि निष्णाताः आसन् । अत्र च प्रमणमेतत्कर्तृकं शिवगीताभाष्यमेव । त्रयोविंशतितम पीठाधीश्वराणां श्रीनृसिंहभारती

श्रीचरणानामन्तेवासिनः एते शिवगीताभाष्यं विधाय तदानीन्तन-केलदिसंस्थानाधिपतिं श्रीवेंकटप्पनायकमहाराजं केलदि राजधान्यामश्रावयन् । अस्य राज्ञः गुरुचरणेषु अनितरसाधारणी भक्तिः, श्रीचरणानाञ्च अस्मिन् राजनि वात्सल्यञ्चासीत् । अयमुदन्तः गुरुवंशकाव्यादवगम्यते । इमे गुरवः शिवगीतायाः भाष्यं विधाय तत्र तत्र निगूढान् अर्थान् अतिसरलं प्रकाश्य शिवगीताध्येतॄणां महतीमुपकृतिमतन्वन् । इदं भाष्यं दक्षिणाम्नायशृङ्गेरीशारदापीठेन १९६२ वत्सरे प्रकाशितम् ।

- श्रीशङ्करानन्दभारतीस्वामिनः - श्रीशङ्करानन्दभारतीयतयः व्याख्यानपीठाधिपतयः आसन्निति तदीयशिवगीता भाष्योपोद्घातस्थैः एतैः श्लोकैः ज्ञायते - "सोऽयं व्याख्यासनारूढः परं प्रव्राजकेश्वरः। यमाद्यष्टाङ्गनिलयः शङ्करानन्दभारती ॥ अनाद्यविद्यावशिनो विषयार्णव पातिनः। उद्दिधीर्षुर्विवृणुते शिवगीतां कृतादरः॥" इति । एते श्रीरामचन्द्रभारती श्रीचरणानामन्तेवासिनः आसन् । अत एव ग्रन्थसमाप्तौ "श्रीरामचन्द्रगुरुचरणारविन्दार्पणमस्तु" इति विलिखितमिति वक्तुं शक्यते । इमे कदा वा कुत्र वा आसन्निति निर्णयकरणन्तु दुश्शकमेव वर्तते । तथापि स्वीयव्याख्याने शारदातिलकस्थ श्लोकानामुदाहरणात् , श्रीनृसिंहाश्रमिणाम् उल्लेखाच्च षोडशशताब्दादर्वाचीनाः इत्यूहितुं शक्यते । शिवगीताव्याख्यानावसरे तत्र तत्र ब्रह्मसूत्राणां, पाणिनीयसूत्राणां

च निर्देशादेतेषां वेदान्त-व्याकरणादिशास्त्रेषु चतुरश्रं पाण्डित्यमासीदिति भाष्यस्यास्य अवलोकनेन ज्ञातुं शक्यते ।

इयं शिवगीता सरलापि तत्र तत्र बहुगभीरविचारगर्भिता वर्तते। अत एव व्याख्यानाभावे तस्याः तात्पर्यावगमनं दुश्शकमिति धिया मन्दात्मानुजिघृक्षया शङ्करानन्दभारतीभिः भाष्यमिदं विरचितम् इत्यवगम्यते । "येयं पद्मपुराणस्था षोडशाध्यायविस्तरा । शिवपारम्यसुधया सुधियामिह तुष्टये॥ साक्षात्परशिवेणैव दीनोद्धरण चेतसा । रामाय भक्तमणये लीलया गदिता यतः॥ ऋषीन् प्रत्यपि सूतेन मुमुक्षुहितकाम्यया । संसारज्वरभैषज्यपिपासूनां हितङ्करी॥ व्याख्यायतेऽधुना तेन क्लिष्टोद्धरणहेतुना । वक्तरि श्रोतृषु ततः शङ्करस्सुप्रसीदताम् ॥" इति भाष्यस्यारम्भे एतैः लिखितमस्ति ।

- **लक्ष्मीनरहरिसूनुः** - विदुषा लक्ष्मीनरहरिसूनुना शिवागीतायाः 'बालानन्दिनी'नाम्ना एका टीका विलिखिता । अस्याः टीकायाः आदौ "लक्ष्मीनृसिंहचरणद्वयमादरेण नत्वा चतुर्विधपुमर्थनिदान भूतम् । भट्टोजिदीक्षितकृतिं कृतिभिर्विभाव्यामालोक्य बालमतये वितनोमि टीकाम् ॥" इति लिखितमस्ति । टीकाकर्तुः नाम किमिति न ज्ञायते । अस्य देशकालादिः न ज्ञायते । टीकायाः अन्ते "क्वाहं मन्दमतिः क्वेदं गीताशास्त्रं महत्तरम् । तद्व्याख्याने प्रवृत्तस्य क्षमध्वं मम चापलम् ॥" इति वर्तते । अस्यां टीकायां

शङ्करानन्दभारतीविरचितव्याख्यायाः पङ्क्तयः क्वचित् स्थले तथैव समुपलभ्यन्ते । अतः तद्व्याख्यायाः प्रभावः अस्याः टीकायाः उपरि विद्यते इत्यूहितुं शक्यते । इयं टीका मुम्बैस्थ-निर्णयसागरमुद्रणालये क्रिस्तीये १९२९ वर्षे मुद्रिता ।

- **परमशिवेन्द्रसरस्वतीयोगिनः** - अवधूतानां श्रीसदाशिवब्रह्मेन्द्र सरस्वतीयोगिनां गुरवः श्रीपरमशिवेन्द्रसरस्वतीयोगिनः। एते क्रिस्तीये षोडशशताब्दे आसन् । एते श्रीमदभिनवनारायणेन्द्र सरस्वतीश्रीचरणानां शिष्याः। एतैः शिवगीतायाः "तात्पर्यप्रकाशिका" इति नाम्ना व्याख्यानं विरचितम् । आदितः अध्यायत्रयस्यैव व्याख्यानमिदं समुपलब्धम् । श्रीरङ्गस्थ-वाणीविलासमुद्राणालये क्रिस्तीये १९०६ वर्षे व्याख्यानमिदं मुद्रितम् ।

कार्तज्ञ्याविष्करणम्

श्रीशङ्करानन्दभारतीविरचितभाष्यस्य मातृका तावत् दक्षिणाम्नाय श्रृङ्गेरीशारदापीठाधीश्वाराणाम् अनन्तश्रीविभूषितानां जगद्गुरु श्रीभारतीतीर्थमहास्वामिनां सन्निधौ स्वीये ग्रन्थभण्डारे आसीत् । अन्या मातृका हैदराबाद्नगरस्थिते प्राच्यलिखितग्रन्थालये आसीत् । उभे अपि मातृके तेलुगुलिप्यां लिखिते । ते उभे अप्यवलम्ब्य मया यथामति संशोधितम् । पाठान्तरादिकं संयोजितम् । तत्र तत्र टिप्पण्यपि लिखिता । टिप्पणीलेखनावसरे

श्रीमदभिनवनृसिंहभारतीस्वामिभिः विरचितभाष्यात् श्रीलक्ष्मीनरहरिसूनुविरचितटीकातश्च विषयाः सङ्गृहीताः। कुत्रचित् स्थलेषु भाष्यस्थाः पङ्क्तयः तथैव टिप्पण्यां निवेशिताः।

सम्पादनकार्यमिदं दक्षिणाम्नायशृङ्गेरीशारदापीठाधीश्वराणां अनन्तश्री विभूषितानां **जगद्गुरुशङ्कराचार्याणां श्रीभारतीतीर्थश्रीचरणानां** परिपूर्णानुग्रहेणैव सम्पन्नम् । अतः श्रीजगद्गुरुचरणानां चरणारविन्दयोः साष्टाङ्गप्रणामान् समर्पयामि । एवं सम्पादनकर्मणि मां नियुज्य मार्गदर्शनं कृतवद्भ्यः प्राच्यलिखितग्रन्थालयस्य सञ्चालकेभ्यः **डा. श्रीपाद सुब्रह्मण्यमहोदयेभ्यः** सप्रश्रयं कार्तज्ञ्यं निवेदयामि । मातृकायां लेखकप्रमादादागतान् व्याकरणदोषान् संशोध्य उपकृतवद्भ्यः शृङ्गेरीस्थश्रीसद्विद्यासञ्जीविनीसंस्कृत महापाठशालायाः प्राध्यापकेभ्यः **श्रीकृष्णराजभट्ट** महोदयेभ्यः धन्यवादान् व्याहरामि । कार्येऽस्मिन् कृतसाह्येभ्यः समेभ्योऽपि धन्यवादान् निवेदयामि ।

इति निवेदयिता

तङ्गिराल वेङ्कट शिवकुमारशर्मा

अनुक्रमणिका

॥ साङ्केतिकपदानां परिचयः ॥

ब्र.सू. – ब्रह्मसूत्रम्
जै.सू. – जैमिनिसूत्रम्
पा.सू. – पाणिनीयसूत्रम्
लिं.सू. – लिङ्गानुशासनसूत्रम्
उ.सू. – उणादिसूत्रम्
यो.सू. – योगसूत्रम्
केन.उ. – केनोपनिषत्
क.उ. – कठोपनिषत्
प्र.उ. – प्रश्नोपनिषत्
मु.उ. – मुण्डकोपनिषत्
मा.उ. – माण्डूक्योपनिषत्
कै.उ. – कैवल्योपनिषत्
श्वे.उ. – श्वेताश्वतरोपनिषत्
तै.उ. – तैत्तिरीयोपनिषत्
ऐ.आ. – ऐतरेयारण्यकम्
छा.उ. – छान्दोग्यपनिषत्
वृ.उ. – वृहदारण्यकोपनिपत्
नृ.उ.ता. – नृसिंहोत्तरतापनीयोपनिषत्
वृ.वा. – वृहदारण्यकभाष्यवार्तिकम्
ऋ.सं. – ऋक्संहिता
तै.सं. – तैत्तिरीयसंहिता
तै.ब्रा. – तैत्तिरीयब्राह्मणम्
तै.आ. – तैत्तिरीयारण्यकम्
तै. एक.का. – तैत्तिरीय एकाग्निकाण्डम्
भ.गी. – भगवद्गीता
शि.गी. – शिवगीता
शा.ति. – शारदातिलकम्

श्रीशङ्करानन्दभारतीविरचितव्याख्यासहिता

श्रीशिवगीता

प्रथमोऽध्यायः

॥ श्रीशिवाय नमः ॥

॥ शिवगीताभाष्यप्रारम्भः ॥

शुद्धाद्वैतसमर्थने कृतमतेर्यस्य प्रभावं सकृ-
च्छ्रुत्वा ह्यैक्यरुचिं सदा विदधते त्यक्तेषणा वेदिनः।
ये द्रव्येषु गुणेषु कर्मसु तथा जातौ विशेषेषु च
प्रौढाहङ्कृतयोऽपि यस्य सततं पादाब्जभृङ्गायिताः ॥ १ ॥

सोऽयं व्याख्यासनारूढः परं प्रव्राजकेश्वरः।
यमाद्यष्टाङ्गनिलयश्शङ्करानन्दभारती ॥ २ ॥

अनाद्यविद्यावशिनो विषयार्णवपातिनः।
उद्दिधीर्षुर्विवृणुते शिवगीतां कृतादरः ॥ ३ ॥

येयं पद्मपुराणस्था षोडशाध्यायविस्तरा।
शिवपारम्यसुधया सुधियामिह तुष्टये ॥ ४ ॥

साक्षात्परशिवेनैव दीनोद्धरणचेतसा ।
रामाय भक्तमणये लीलया गदिता यतः ॥ ५ ॥

ऋषीन् प्रत्यपि सूतेन मुमुक्षुहितकाम्यया।
संसारज्वरभैषज्यपिपासूनां हितङ्करी ॥६॥
व्याख्यायतेऽधुना तेन क्लिष्टोद्धरणहेतुना।
वक्तरि श्रोतृषु ततश्शङ्करस्सुप्रसीदतु ॥७॥

सूत उवाच -

अथातस्सम्प्रवक्ष्यामि शुद्धकैवल्यमुक्तिदम् ।
अनुग्रहान्महेशस्य भवदुःखस्य भेषजम् ॥ १ ॥

सूत उवाच - ऋषीन् प्रतीति शेषः। अथेति । अथ - ऋषय उत्तमाधिकारिणो बुभुत्सया पृच्छन्तीति निर्णयानन्तरम् । अतः - तेषामनुपेक्षणीयत्वात् । भवदुःखस्य - सांसारिकसकलदुःखस्य , भेषजं - निवृत्त्युपायम् । महेशस्यानुग्रहात् - वक्तरि श्रोतृषु च कृपाबलात् । सम्प्रवक्ष्यामि - सङ्गृह्य अनेकासूपनिषत्सु विप्रकीर्णं प्रमेयमेकीकृत्य, प्रकर्षेण वैशद्य-लघुत्व-कृत्स्नतारूपेण वक्ष्यामीति सम्बन्धः। ननु सकलदुःखनिवृत्तिः किं शरीरे सत्येव ? तस्मिन् निवृत्ते वा ? नाद्यः, "न ह वै सशरीरस्य सतः प्रियाप्रिययोरपहतिरस्ति" (छा.उ. ८-१२-१) इत्यादिश्रुति विरोधात् । न द्वितीयः, सुखस्यापि हानापत्त्या तुल्यायव्ययत्वेन अपुरुषार्थत्वापत्तेरित्याशङ्क्य भेषजं विशिनष्टि - शुद्धेत्यादिना । केवलस्य भावः कैवल्यं - निष्प्रपञ्चस्वरूपमात्रेणावस्थानं, तदेव मुक्तिः, शुद्धा - निर्दोषा, पूर्णानन्दरूपत्वेन तुल्यायव्ययत्वरूप दोषानाक्रान्ता कैवल्यरूपा मुक्तिः, तां ददातीति तथाभूतम् । तथा च शरीरमायादेरपि निवर्तनात् पूर्णानन्दस्य चावस्थानान्न कोऽपि दोष इति भावः। यद्यपि भिषजः कर्मेति तद्धिते आदिवृद्धिः प्राप्नोति, तथापि

"अनन्तावसथे"ति (पा.सू. ५-४-२३) स्वार्थे ञ्यप्रत्ययविधायके सूत्रे "केवलमामके"त्यादिसूत्रे (पा.सू. ४-१-३०) च निपातनाद्गुणः। तथा चामरकोशे - "भेषजौषधभैषज्यान्यगदो जायुरित्यपि" इति ॥ १ ॥

दुःखस्य भेषजं वक्ष्यामीत्युक्तम् , किं तदित्याकाङ्क्षायां ज्ञानमेवेत्याह - न कर्मणामिति ।

न कर्मणामनुष्ठानैर्न दानैस्तपसाऽपि वा ।
कैवल्यं लभते मर्त्यः किन्तु ज्ञानेन केवलम् ॥ २ ॥

मर्त्यः - मरणधर्मा मनुष्यः। कर्मणां - यज्ञादीनाम्, अनुष्ठानैः कैवल्यं न लभते । दानैः, तपसाऽपि वा - कृच्छ्रचान्द्रायणादिरूपेण, न लभते । तेषां स्वर्गादिफलकत्वात् , निष्कामतया अनुष्ठितानामपि चित्तशुद्धि फलकत्वात् , विविदिषावाक्यबलेनापि ज्ञानविविदिषान्यतरस्यैव तत्फलत्वाध्यवसायादिति भावः। किन्तु केवलं - इतरनिरपेक्षेण, ज्ञानेन - अप्रतिबद्धब्रह्मसाक्षात्कारेण, कैवल्यं लभते। "तमेव विदित्वाऽतिमृत्युमेति नान्यः पन्था विद्यतेऽयनाय" (श्वे.उ. ३-७) इति श्रुतेरिति भावः ॥ २ ॥

तादृशब्रह्मज्ञानस्य शब्दैकसाध्यतया शिवगीतारूपमुपनिषद्वाक्यमेव तदुपायतयोपदिशन् प्रथमं तत्प्रशंसामाह - रामायेति ।

रामाय दण्डकारण्ये पार्वतीपतिना पुरा।
या प्रोक्ता शिवगीताख्या गुह्याद्गुह्यतमाऽपि[१] सा ॥ ३ ॥

---

१ "गुह्यतमा हि सा" इति पाठान्तरम् ।

पुरा - पूर्वं, दण्डकारण्ये पार्वतीपतिना या शिवगीताख्या उपनिषत् रामाय प्रोक्ता सा गुह्यादपि गुह्यतमेत्यन्वयः। अत्र रामायेत्यनेन श्रोतृगौरवम्, पार्वतीपतिनेति वक्तृगौरवं चोक्तम् । अत एव गुह्यतमा - अत्यन्तरहस्यभूतेत्यर्थः ॥ ३ ॥

यस्याः स्मरणमात्रेण नृणां मुक्तिर्ध्रुवा भवेत् ।
पुरा सनत्कुमाराय स्कन्देनाभिहिता हि सा ॥ ४ ॥

सनत्कुमारः प्रोवाच व्यासाय मुनिसत्तमाः ।
मह्यं कृपातिरेकेण प्रददौ बादरायणः ॥ ५ ॥

यस्या इति । सा - प्रसिद्धा मुक्तिः, नृणां, यस्याः - शिवगीतायाः, स्मरणमात्रेण - तदर्थध्यानमात्रेण भवति । न तु तत्रानुक्तं किञ्चिदुपसंहर्तुं यतनीयमित्यर्थः। सेयं ब्रह्मलोकावाप्तिरूपा गौणीमुक्तिः, किन्तु परममुक्तिरेवेत्याशयेन विशिनष्टि - ध्रुवेति । इदानीं सम्प्रदायशुद्धिं सूचयितुं गुरुपरम्परामाह - पुरेत्यादिना सार्धश्लोकेन । पुरा - पूर्वं, स्कन्देन सनत्कुमाराय, सा - शिवगीता, अभिहिता - उक्तेत्यर्थः। सनत्कुमारस्तु व्यासाय तामुवाच । हे मुनिसत्तमाः! 'श्रेष्ठाः' इति संबोधनेन तादृशीं शिवगीतां श्रोतुमधिकारिणो यूयमिति ध्वनितम् । तामेव - शिवगीतामेव, बादरायणो - व्यासः, कृपातिरेकेण - दयातिरेकेण, दयातिशयेन मह्यं प्रददौ । अत्र कृपातिरेकेणेत्युक्त्या स्वस्मिन् विद्यायाः वीर्यवत्तरतां ध्वनयति । कामतयाऽनुष्ठितानामपि चित्तशुद्धिफलकत्वात् ॥ ५ ॥

उक्तञ्च तेन कस्मैचिन्न दातव्यमिदं त्वया ।

सूतपुत्रान्यथा देवाः क्षुभ्यन्ति च शपन्ति च ॥ ६ ॥

उक्तश्चेति । तेन - व्यासेन, केवलं शिवगीता न दत्ता, किन्त्वन्यदपि किञ्चिदुक्तमिति भावः। किमुक्तं तदेवाह - कस्मैचिदिति । इदं - शिवगीतारहस्यं, कस्मैचित् - अनधिकारिणे, न दातव्यम् । अन्यथा - अनधिकारिभ्यो दाने क्रियमाणे, देवाः - इन्द्रादयः, क्षुभ्यन्ति - क्षोभयुक्ता भवन्ति । किञ्च शपन्ति, दातारं अध्येतारञ्चेति शेषः ॥ ६ ॥

अथ पृष्टो मया विप्रो भगवान् बादरायणः।
भगवन् ! देवतास्सर्वाः कं[२] क्षुभ्यन्ति शपन्ति च ॥ ७ ॥

अथेति । कस्मैचिदिदं न वक्तव्यमिति व्यासोक्तेरनन्तरं मया बादरायणः पृष्टः। कीदृशस्सः? भगवान् । "उत्पत्तिं च विनाशं च भूतानामागतिं गतिम् । वेत्ति विद्यामविद्यां च स वाच्यो भगवानिति॥" इत्युक्तलक्षणः। यत्पृष्टं तदाह - भगवन्निति। देवताः 'कं प्रति क्षुभ्यन्ति शपन्ति चे'ति । 'निरपराधेषु कथं क्षोभः?' इति प्रश्नाशयः ॥ ७ ॥

तासामत्रास्ति का हानिः यया कुप्यन्ति देवताः।
पाराशर्योऽथ मामाह यत्पृष्टं श्रृणु वत्सल ॥ ८ ॥

निरपराधतामेव विवृणोति - तासामिति । तासां - देवानाम् , अत्र - मनुष्येभ्यस्तत्त्वज्ञाने दत्ते सति, का हानिरस्ति ? न कापीत्यर्थः। यया - कार्यहान्या, कुप्यन्ति तद्वदेति भावः। अथ - पूर्वोक्तप्रश्नानन्तरम् ,

---

२ "किं क्षुभ्यन्ती"ति पाठान्तरम् । किं - किमर्थं क्षुभ्यन्तीत्यर्थः।

पाराशर्यो - व्यासः, मां प्रत्याह। पाराशर्य इति । हे वत्सल - कृपालो, स्वस्य तत्त्वज्ञाने जातेऽपि लोकोपकारार्थं पृच्छसीति भावः। यत्पृष्टं तच्छ्रुणु । प्रश्नोत्तरयोः समानविषयकत्वात् , अन्यथा आम्रप्रश्ने कोविदारोत्तरं स्यादिति भावः ॥ ८॥

नित्याग्निहोत्रिणो विप्राः सन्ति ये गृहमेधिनः।
त एव सर्वफलदाः सुराणां कामधेनवः ॥ ९॥

तदेवाह - नित्येति। नित्यं यदग्निहोत्रं तदनुष्ठातारः ये विप्राः, गृहमेधिनो - गृहस्थाः, पञ्चमहायज्ञमात्रानुष्ठातार इति भावः। त एव सुराणां सर्वफलदाः कामधेनवः, कामधेनुकल्पाः ॥ ९॥

भक्ष्यं भोज्यं च पेयं च यद्यदिष्टं सुपर्वणाम्।
अग्नौ हुतेन हविषा तत्सर्वं लभ्यते दिवि ॥ १०॥

तदेवोपपादयति - भक्ष्यमिति । सुपर्वणां - देवानां, भक्ष्यभोज्यादि यद्यदिष्टं तत्सर्वं, अग्नौ हुतेन - प्रक्षिप्तेन, हविषा - पुरोडाशादिना, दिवि लभ्यते - प्राप्यते॥ १०॥

ननु वैकल्पिकेन साधनान्तरेण देवानामिष्टं सेत्स्यतीत्याशङ्क्याह - नान्यदस्तीति।

नान्यदस्ति सुरेशानामिष्टसिद्धिप्रदं दिवि ।
दोग्ध्री धेनुर्यथा नीता दुःखदा गृहमेधिनाम् ॥ ११॥

तथैव ज्ञानवान् विप्रो देवानां दुःखदो भवेत् ।
त्रिदशास्तेन विघ्नन्ति प्रविष्टा विष्टपं[३] नृणाम् ॥ १२ ॥

अन्यत् - हविर्भिन्नं , नास्त्येव । ततः किम् ? तत्राह । दोग्ध्री - दोहनशीला । दोग्ध्रीत्यत्र ताच्छीलिकस्तृन्प्रत्ययः। धेनुः - गौः, नीता - अपहृता सती, यथा गृहमेधिनां दुःखदा भवति, तथैव ज्ञानवान् , 'विप्र' इत्युपलक्षणं क्षत्रयादेरपि, देवानां दुःखदो भवेत् । तेन - कारणेन, त्रिदशाः - देवाः, नृणां विष्टपं - मनुष्यलोकं, प्रविष्टास्सन्तो, विघ्नन्ति - तत्त्वज्ञानप्रतिबन्धं कुर्वन्तीत्यर्थः ॥ ११-१२ ॥

ततो न जायते भक्तिः शिवे कस्यापि देहिनः ।
तस्मादविदुषां नैव जायते शूलपाणिनः ॥ १३ ॥

ततः - देवकृताद्विघ्नात् , कस्यापि देहिनः - पुराणश्रवणादौ प्रवृत्तस्यापि, शिवे भक्तिर्न जायते, अश्रद्धामलप्राबल्यादिति भावः। तस्मात् - देवकृतविघ्नात् , अविदुषां - पुराणश्रवणरहितानां तु , भक्तिर्न जायते। श्रवणादिमतामीषद्भक्तिरस्ति, श्रवणादिरहितानान्तु भक्तिलेशोऽपि न

---

३ "विषयं नृणाम्" इति पाठान्तरम् । नृणां विषयं स्त्रीपुत्रादिरूपं प्रविष्टाः सन्तः। तान् स्त्रीपुत्रादीन् दृष्ट्वा मनस्येवं दयते 'यदि मया ज्ञाननिष्ठेन भवितव्यं तदा ते मरिष्यन्ति ' इति, एवं देवाः प्रेरयन्ति । इदमेव विघ्नाचरणमिति भावः।

"हृदयं नृणाम् " इत्यपि पाठान्तरम् । आचार्यस्य बुद्धिक्षोभम्, शिष्यस्य ज्ञाने अविश्वासकुतर्कत्वादिकं सम्पाद्य विघ्नं कुर्वन्तीत्यर्थः। तदुक्तमनुभूतिप्रकाशे – "आचार्यशिष्ययोर्दोषान् देवा उत्पादयन्ति हि । वाग्दोषात् बुद्धिदोषाद्वा वक्तुं शक्नोति नो गुरुः। अविश्वासात् कुतर्कात्वा शिष्यो वोद्धुं न शक्नुयात्॥" इति ।

भवतीत्यर्थः। शूलपाणेरिति वक्तव्ये शूलपाणिन इति रूपं छान्दसं बोध्यम् । तथा च "यूस्त्रियाख्या"विति (पा.सू. १-४-३) सूत्रे महाभाष्ये उक्तम् - "छन्दोवत्कवयः कुर्वन्ती"ति। अस्ति च छन्दसि लिङ्गव्यत्ययानुशासनम् - "सुप्तिङुपग्रहलिङ्गनराणां कालहलच्स्वरकर्तृयङां च । व्यत्ययमिच्छति शास्त्रकृदेषां सोऽपि च सिद्ध्यति बाहुलकेने"ति वार्तिककारवचनात् । एवमग्रेऽपि बोध्यम् । यद्वा शूलपाणिशब्दस्य बहुव्रीहिप्रयुक्तविशेष्यनिघ्नतासत्वात् "सामान्ये नपुंसक"मिति वा, स्वरूपपदाध्याहरेण वा समर्थनमिति दिक् ॥१३॥

यथाकथञ्चिज्जाताऽपि मध्ये विच्छिद्यते नृणाम् ।
जातं वाऽपि शिवज्ञानं न विश्वासं भजत्यलम् ॥१४॥

यथेति । यथाकथञ्चित् - अतिप्रयत्नात् , जाताऽपि भक्तिः, मध्ये - ज्ञानोत्पत्तेः पूर्वमेव, विच्छिद्यते - विच्छिन्ना भवति । यदि चाविच्छिन्ना सती ज्ञानमुत्पादयति तत्राप्याह - जातमिति । तथा जातमपि ज्ञानं विश्वासं न भजति - अप्रामाण्यशङ्कया आस्कन्द्यत इत्यर्थः ॥१४॥

ऋषय ऊचुः -

यद्येवं देवता विघ्नमाचरन्ति तनूभृताम् ।
पौरुषं तत्र कस्यास्ति येन मुक्तिर्भविष्यति[४] ॥१५॥

एवं - प्रागुक्तरीत्या, देवताः - अतिप्रबला इति भावः। तनूभृतां - दुर्बलानामिति भावः। यदि विघ्नमाचरन्ति तर्हि , तत्र - देवकृतविघ्ननिवारणे , कस्य , पौरुषं - सामर्थ्यम् , अस्ति , येन मुक्तिर्भवेत् ॥१५॥

४ "तेन मुक्तिर्दवीयसी" इति पाठे तेन ज्ञाने यत्नाभावेन मुक्तिर्दवीयसी दूरतरेत्यर्थः।

सत्यं सूतात्मज ! ब्रूहि तत्रोपायोऽस्ति वा न वा ।
सूत उवाच -
कोटिजन्मार्जितैः पुण्यैश्शिवे भक्तिः प्रजायते ॥१६॥

सत्यमिति त्रासातिशयात्पुनःपुनः प्रश्नः। तत्र - देवकर्तृकविघ्ननिवारणे, उपायोऽस्ति वा न वेति संशये सति उत्तरं ब्रूहीत्यर्थः। इह प्राग्भवीयबहुतरसुकृतसम्पत्त्या शिवे भक्तिः, ततः ईश्वरार्पणबुद्ध्या निष्कामकर्मानुष्ठानम्, ततश्चित्तशुद्धिः, ततो नित्यानित्यवस्तुविवेकः, ततो विषयेषु असहिष्णुत्व-दुःखबहुलत्वादिदोषदर्शनाद्वैराग्यम् , ततश्शमादि सम्पत्, ततो मुमुक्षुता, ततो जिज्ञासा, ततस्सन्यासः, ततो गुरूपसत्तिः, ततश्श्रवणं, ततो मननं, ततो निधिध्यासनं, ततोऽप्रतिबद्ध ब्रह्मसाक्षात्कारः, तत उपात्तप्रारब्धपरित्यागः, ततो जीवन्मुक्तिः, ततः परममुक्तिरिति सिद्धान्तसम्मतः सोपानक्रमसदृशक्रमः। एवं स्थिते प्रत्याहारन्यायेन अत्र प्राथमिकसाधनं भक्तिः, परमफलभूता मुक्तिश्चोच्यते। इतराण्यपि साधनानि तत्र तत्र प्रपञ्चयिष्यति, तान्यपीह उपसंहर्तव्यानि । कोटीत्यादि । कोटिसंख्याकानि यानि जन्मानि तत्रार्जितैः पुण्यैः शिवे भक्तिर्जायते । अत्र कोटिसंख्याकानि जन्मानीति मध्यमपदलोपसमासः। "दिक्संख्ये संज्ञायाम्" (पा.सू. २-१-५०) इति नियमेन समासान्तरस्य दुर्लभत्वात्, यथा चैतत्तथा "द्विगोर्लुगनपत्ये" (पा.सू. ४-१-८८) इति सूत्रे भाष्यादौ स्पष्टम् ॥१६॥

इष्टापूर्तानि कर्माणि तेनाचरति मानवः।
शिवार्पणधिया कामान् परित्यज्य यथाविधि ॥१७॥

इष्टेति । इष्टानि - यागाः, पूर्तानि - तटाकारामादीनि, इष्टानि च पूर्तानि चेति द्वन्द्वे "अन्येषामपि दृश्यते" (पा.सू. ६-३-१३७) इति दीर्घः। तेन - शिवभक्तेः जातत्वेन, कामान् परित्यज्य शिवार्पणबुद्ध्या इष्टापूर्तानि कर्माण्याचरतीत्यन्वयः॥ १७॥

अनुग्रहात्तेन शम्भोर्जायते सुदृढो नरः।
ततो भीताः पलायन्ते विघ्नं हित्वा सुरेश्वराः॥ १८॥

अनुग्रहादिति । तेन शम्भोरनुग्रहात् नरः, सुदृढः - शापानुग्रहसमर्थः, जायत इत्यन्वयः। तेन सुरेश्वराः शापाद्भीतास्सन्तो विघ्नं हित्वा पलायन्ते ॥१८॥

जायते तेन शुश्रूषा चरिते चन्द्रमौलिनः।
शृण्वतो जायते ज्ञानं ज्ञानादेव विमुच्यते ॥ १९॥

जायत इति । तेन - विघ्नविरहेण, चन्द्रमौलिनश्चरिते, शुश्रूषा - श्रवणेच्छा, जायते । ततः शृण्वतः - श्रवणं कुर्वतः, क्रमेण ज्ञानं जायते, ज्ञानादेव विमुच्यत इति सम्बन्धः॥ १९॥

बहुनाऽत्र किमुक्तेन यस्य भक्तिश्शिवे दृढा ।
महापापाघपापौघकोटिग्रस्तोऽपि मुच्यते[५] ॥२०॥

---

५ "महापापोपपापौघे"ति पाठे महापापं ब्रह्महत्यादिकम् , उपपापानि, तेषामोघाः समूहाः इत्यर्थः। "महापापाद्यपापौघे"ति पाठे महापापं ब्रह्महत्यादि, तदेव आद्यं येषाम्, अतिपातकोपपातकानुपातकानां, तेषामोघाः इत्यर्थः ।

"महापापाघपापौघकोटिग्रस्तो विमुच्यते" इति पाठे महापापानि प्रसिद्धानि, अघानि

अनादरेण शाठ्येन परिहासेन मायया ।
शिवभक्तिरतश्चेत् स्यादन्त्यजोऽपि विमुच्यते ॥२१॥

एवं भक्तिश्च सर्वेषां सर्वदा सर्वतोमुखी ।
तस्यां तु विद्यमानायां यस्तु मर्त्यो न मुच्यते ।
संसारबन्धनात्तस्मादन्यः को वाऽस्ति मूढधीः ॥२२॥

बहुनेति । अत्र - शिवभक्तिमाहात्म्यविषये, बहुनोक्तेन किं प्रयोजनम् ? संक्षेपेणैव वदामीति भावः। तथा हि - यस्य पुंसश्शिवे दृढा भक्तिरस्ति सः, महापापानि - ब्रह्महत्यादीनि पञ्च, अघानि - दुःखानि व्यसनानि वा, "अंहोदुःखव्यसनेष्वघ"मित्यमरः। पापौघाः - उपपातकप्रकीर्णकादीनां सङ्घाः, तेषां त्रयाणां कोटिभिः ग्रस्तोऽपि सन् । संसारबन्धनादिति । संसारबन्धनान्मुच्यते । तस्मात्पूर्वोक्तात्पापकोटिग्रस्तादन्यो मूढधीः को वाऽस्ति ? यः शिवभक्त्या विना मुच्यते इति भावः ॥२० - २२॥

नियमाद्यस्तु कुर्वीत भक्तिं वा द्रोहमेव वा ।
तस्यापि चेत् प्रसन्नोऽसौ फलं यच्छति वाञ्छितम् ॥२३॥

नियमादिति । यः पुरुषो नियमेन भक्तिं द्रोहं वा कुरुते तस्यापि, नियतस्मरणमात्रस्य भक्तिद्रोहयोरुभयोरपि सत्त्वेन तावन्मात्रात्, असौ - परमेश्वरः, प्रसन्नश्चेत् - प्रसीदति यदि, तदा वाञ्छितं यच्छति । तथा द्रोहार्थमपि यत्स्मरणं तत्फलप्रदम् । तद्विषयिण्या भक्तेर्माहात्म्यं किं

अतिपातकानि मातृगमनादीनि, पापानि उपपातकानि, तेषामोघाः इत्यर्थः।

वक्तव्यमित्यर्थः ॥२३॥

प्रदेयं वस्तु बहुलं वा भवतु अल्पं वा भवतु , नियमतः परमेश्वरे तत्समर्पणमेव मुख्यमित्याशयेनाह - ऋद्धमिति ।

ऋद्धं किञ्चित्समादाय क्षुल्लकं[६] जलमेव वा ।
यो दद्यान्नियमेनासौ तस्मै दत्ते जगत्त्रयम् ॥२४॥

ऋद्धं किञ्चित् - माणिक्यादिनिर्मितं सिंहासनादिर्वा भवतु , क्षुल्लकं - अल्पं, जलमेव वा भवतु , नात्र वस्तुविशेषे आग्रह इति भावः। किन्तु , समादाय - सम्यक् भक्तिपूर्वकं गृहीत्वा, नियमेन यो दत्ते, तस्मै - भक्ताय, असौ - शिवः, जगत्त्रयं दत्ते, भक्तिमाहात्म्यात् ॥२४॥

तत्राप्यशक्तो नियमान्नमस्कारं प्रदक्षिणम्[७] ।
यः करोति महेशस्य तस्मै तुष्टो भवेच्छिवः ॥ २५॥

तत्रापीति । तत्र - चुलुकस्य जलादेर्दानेऽपि, असमर्थो यः नियमेन नमस्कारं प्रदक्षिणं च करोति तस्मै शिवः तुष्टो भवति ॥२५॥

प्रदक्षिणाद्यशक्तोऽपि यस्स्वान्ते चिन्तयेच्छिवम् ।
गच्छन् समुपविष्टो वा तस्याभीष्टं प्रयच्छति ॥२६॥

प्रदक्षिणाद्येति । यस्तु प्रदक्षिणाद्यशक्तः किन्तु गच्छन् समुपविष्टो वा सन् ,

६ "चुलुकं जलमेव वा" इति पाठान्तरम् ।

७ "प्रदक्षिणाम्" इति पाठान्तरम् ।

स्वान्ते - हृदये, शिवं चिन्तयेत्तस्याभीष्टमर्थं शिवः प्रयच्छति ॥२६॥

वस्तुतस्तु शिवपूजासामग्री नात्यन्तक्लेशसाध्या, किन्तु सर्वसुलभेत्याह सार्धश्लोकद्वयेन - चन्दनमिति ।

चन्दनं बिल्वकाष्ठस्य पुष्पाणि वनजान्यपि ।
फलानि तादृशान्येव यस्य प्रीतिकराणि वै ॥२७॥

दुष्करं तस्य सेवायां किमस्ति भुवनत्रये ।
वन्येषु यादृशी प्रीतिर्वर्तते परमेशितुः ॥ २८॥

उत्तमेष्वपि नास्त्येव ग्रामजेष्वपि तादृशी ॥२९॥

बिल्वकाष्ठस्य चन्दनं, न तु बहुमूल्यलभ्यं मलयजमेवेति भावः। वनजान्यपि पुष्पाणि, न तु पुरुषकायक्लेशजानि । तादृशानि वनजान्येव फलानि च यस्य प्रीतिकराणि । वै इति निश्चये । तस्य - शिवस्य, सेवायां - कर्तव्यायां, भुवनत्रये, दुष्करं - दुःखसंपादकं किमस्ति? यत्र कुत्रापि स्थितेन एवंविधा सामग्री सुसम्पाद्येति भावः। यादृशादौ कर्मकर्तरि सूत्रमते[८] कञ् प्रत्ययः, महाभाष्ये तु इवेत्यर्थे । परमेशितुः - अवाप्तनिखिलकामस्य, वन्येषु पुष्पफलादिषु यादृशी प्रीतिः वर्तते तादृशी ग्रामजेष्वपि नास्त्येव । तथा च परमप्रीतिपात्रं वन्यम् , तत्तु सुतरां सुलभमिति भावः॥ २७ - २९॥

ननु परमार्थतोऽभेदेऽपि व्यावहारिकभेदमाश्रित्याह - तमिति।

---

८ "त्यदादिषु दृशोऽनालोचने कञ्च" (पा.सू. ३-२-६०) इति सूत्रेण कञ् ।

देशनियमत्वेन विवक्षितः। दिग्देशशब्दयोरेकधातुनिष्पन्नत्वात् स्थलस्य पृथगुपात्तत्वात् । "प्राचीनप्रवणे वैश्वदेवेन यजेते"त्यादिस्थलनियमः। इह तु न तथा, किन्तु यत्र - भगवदुपासने, कालनियमा न सन्ति, देशस्य - दिश इत्यर्थः, स्थलस्य च नियमाः न सन्ति । ननु "समे शुचौ शर्करावह्निवालुका विवर्जिते शब्दजलाश्रयादिभिः। मनोनुकूले न तु चक्षुःपीडने गुहा निवाताश्रयणे प्रयोजयेत्" (श्वे.उ. २-१०) इति श्रुत्या देशविशेषो विहित इत्याशङ्क्य एतच्छ्रुतेरपि चित्तैकाग्रतासम्पादनमात्रे तात्पर्यम् , एवं हि दृष्टार्थता लभ्यते, एकाग्रचित्तस्य ध्यानोपयोगित्वात् इत्याशयेनाह - यत्रास्येति । अस्य - उपासकस्य, चित्तं यत्र रमते - एकाग्रं भवति, तत्र शिवस्य स्वात्मत्वेन ध्यानेन केवलम् , असौ - उपासकः, शिवसायुज्यमाप्नुयात् । इदं चोत्तरमीमांसायां "यत्रैकाग्रता तत्राविशेषात्" (ब्र.सू. ४-१-११) इत्यधिकरणे स्पष्टम् ॥३२॥

ननु भगवदुपासनं कथं सुकरम् ? प्रभूणां दुराराध्यताया बहुशो दर्शनादित्याशङ्क्य प्राकृतप्रभूणां तु तथैव, सर्वज्ञस्य कृपानिधेस्तु न दुराराध्यत्वमित्याशयेन तयोर्वैलक्षण्यं सार्धद्वाभ्यामुपपादयन् प्राकृतप्रभुस्थितिं तावदाह - अति स्वल्पेति ।

अतिस्वल्पतरायुश्श्रीर्भूतेशांशाधिपोऽपि यः ।
स तु राजाऽहमस्मीति वादिनं हन्ति सान्वयम् ॥३३॥

अतिस्वल्पाः - अत्यल्पाः आयुश्श्रियो यस्य तथाभूतः, भूतेशानां अंशभूतो अधिपः, अथवा भूतेशस्य शिवस्यांशभूताः महाराजास्तेऽधिपाः यस्य, एवं रूपोऽपि यः पुमान् , स तु तदीये राज्ये 'अहं राजे'ति वादिनं

सवंशं हन्ति । उपकारस्तु दूरापास्त इति भावः ॥ ३३ ॥

कर्ताऽपि सर्वलोकानामक्षय्यैश्वर्यवानपि ।
शिवश्शिवोऽहमस्मीति वादिनं यश्च कश्चन ॥ ३४ ॥
आत्मना सह तादात्म्यभागिनं कुरुते भृशम् ॥ ३५ ॥

कर्तेति । शिवस्तु सर्वलोकानां कर्ता सन्नपि, अक्षय्यं यदैश्वर्यं तद्वानपि सन् , शिवोऽहमिति वदन्तं यश्च कश्चन जीवन्मुक्तं आत्मना सह तादात्म्यभाजं कुरुते, न तूपेक्षते इत्यर्थः। प्राकृतेषु दृष्टा रीतिः सर्वेश्वरे न सञ्चारणीयेति भावः ॥ ३४-३५ ॥

अन्तःकरणशुद्धावुपायान्तरं प्रतिजानीते - धर्मार्थेति ।

धर्मार्थकाममोक्षाणां पारं यास्यथ[१] येन वै ।
मुनयस्तत्प्रवक्ष्यामि व्रतं पाशुपताभिधम् ॥ ३६ ॥

हे मुनयः! पाशुपताभिधं - पशुपतेरिदमिति व्युत्पत्त्या पाशुपतसंज्ञकं, तद्व्रतं प्रवक्ष्यामि, येन - व्रतेन, धर्मार्थकाममोक्षाणां, पारं - निष्पत्तिं, यास्यथ - गमिष्यथ ॥ ३६ ॥

कृत्वा तु विरजां दीक्षां भूतिरुद्राक्षधारिणः।

जपन्तो वेदसाराख्यं शिवनामसहस्रकम् ।

---

१ "यास्यन्ति" इति पाठान्तरम् ।

सन्त्यज्य तेन मर्त्यत्वं शैवीं तनुमवाप्स्यथ ॥३७॥

कृत्वेति । विगतः रजः पापं येषां विरजसः निष्पापाः, विरजसः करोतीति विरजा। "तत्करोती"ति ण्यन्तात्पचाद्यच् । "णाविष्ठव"दिति टिलोपः इति सारस्वतकारप्रभृतयः। वस्तुतस्तु अकारान्तो रजश्शब्दोऽस्ति "रजोऽयं रजसा सार्धं स्त्री पुष्पगुणधूलिषु" इति कोशात् । एतेन "अर्थाः पादरजोपमा" इत्यादिव्याख्यातमित्युज्वलदत्तः। तादृशीं दीक्षां कृत्वा विभूतिं रुद्राक्षांश्च धारयन्तीत्येवंविधास्सन्तो वेदसाराख्यं शिवनामसहस्रकं च जपन्तस्सन्तः, तेन - जपेन, मर्त्यत्वं - इतरसाधारणत्वं, संत्यज्य - सम्यक् त्यक्त्वा, शैवीं - शिवसाक्षात्कारयोग्यां, तनुं - शरीरम् , अवाप्स्यथ॥ ३७॥

ततः प्रसन्नो भगवान् शङ्करो लोकशङ्करः।
भवतां दृश्यतामेत्य कैवल्यं वः प्रदास्यति ॥३८॥

तत इति । शुद्धशरीरलाभानन्तरं, भगवान् शङ्करः - लोकस्य शं सुखं करोतीत्येवं रूपः, न तु शब्दमात्रेण शङ्कर इत्यर्थः। भवतां, दृश्यतां - साक्षात्कारविषयतां, एत्य - प्राप्य, वः - युष्मभ्यं, कैवल्यं - परममुक्तिं, प्रकर्षेण दास्यति ॥३८॥

रामाय दण्डकारण्ये यत्प्रादात्कुम्भसम्भवः।
तत्सर्वं वः प्रवक्ष्यामि श्रृणुध्वं भक्तियोगिनः[१०] ॥३९॥

---

१० "भक्तियोगतः" इति पाठान्तरम् । भक्तिरूपोपायतः इत्यर्थः। योगस्सन्नहनोपायध्यानसङ्गति युक्तिष्वित्यमरः।

॥ इति श्रीपद्मपुराणे शिवगीतासूपनिषत्सु प्रथमोऽध्यायः॥

रामायेति । कुम्भसम्भवः - अगस्त्यः, दण्डकारण्ये रामाय यद्दीक्षादिकं प्रादात् तत्सर्वं, वः - युष्मभ्यं, प्रवक्ष्यामि, यूयं भक्त्या युज्यन्त इति भक्तियोगिनस्सन्तः, शृणुध्वं - शृणुत, आत्मनेपदमार्षम् ॥ ३९ ॥

॥ इति श्रीमद्विशुद्धाद्वैतसिद्धान्तप्रतिष्ठापनैकधुरन्धर श्रीमच्छङ्करानन्दभारतीविरचिते शिवगीताभाष्ये प्रथमोऽध्यायः॥

द्वितीयोऽध्यायः

ऋषय ऊचुः -

किमर्थमागतोऽगस्त्यो रामचन्द्रस्य सन्निधिम् ।
कथं वा विरजां दीक्षां कारयामास राघवम् ॥ १ ॥

किमर्थमिति । अगस्त्यः - अगं विंध्यं पर्वतं स्त्यायति संहृतं खर्वं करोतीति तथाभूतः। अतिसमर्थत्वात्स्वार्थोद्देशेन रामं प्रति असम्भाव्यमानागमन इति भावः। एवम्भूतो रामचन्द्रस्य सन्निधिं, किमर्थमागतः? - कस्मै प्रयोजनायेति । किमर्थमिति "निमित्तकारणहेत्वर्थेषु सर्वानां प्रायदर्शनम्" इति द्वितीया । किञ्च राघवं विरजां दीक्षां कथं कारयामास? सर्वज्ञस्य अवाप्तसकलकामस्य राघवस्य दीक्षाद्युपदेशो न सम्भवतीति भावः॥ १ ॥

ततः किमाप्तवान् रामः फलं तद्वक्तुमर्हसि ॥ २ ॥

ततः इति । ततः - दीक्षातः, रामः किं फलमाप्तवान् ? तत् त्वं वक्तुमर्हसि ॥ २ ॥

सूत उवाच -

रावणेन यदा सीताऽपहृता जनकात्मजा ।
तदा वियोगदुःखेन विलपन्नास राघवः ॥ ३ ॥

रावणेनेति । जनकात्मजा - सीता, रावणेन यदा सुतरां बलात्कारेण

हृता तदा राघवो वियोगदुःखेन विलपन्नासेत्यन्वयः। आसेति तिङन्त प्रतिरूपकमव्ययम् , कारयामासेत्यादावनुप्रयोगसामर्थ्येन भूभावाप्रवृत्तौ प्रतिरूपस्य प्रसिद्धेरिति दिक् ॥३॥

विलपन्नासेत्युक्तम् , तामवस्थामाह - निर्निद्र इति ।

निर्निद्रो निरहङ्कारो निराहारो दिवानिशम् ।
मोक्तुमैच्छत्ततः प्राणान् सानुजो रघुनन्दनः[११] ॥४॥

निद्रारहितः, अहङ्कारः - अभिमानः तद्रहितः, आहाररहितश्च सन् दिवानिशं विलपन्नासेति पूर्वेण सम्बन्धः। ततः, सानुजः - लक्ष्मणसहितो रामः, प्राणान् मोक्तुमैच्छत् ॥४॥

लोपामुद्रापतिर्ज्ञात्वा तस्य सन्निधिमागमत् ।
अथ तं बोधयामास संसारासारतां मुनिः ॥५॥

लोपामुद्रापतिः - मुनिरगस्त्यः, रामस्य प्राणत्यागोद्यमं ज्ञात्वा, तस्य सन्निधिं - समीपम् , आगमत् - आगतः। अथ संसारस्य, असारतां - निस्सारत्वं, तं - रामं प्रयोज्यकर्तारं, बोधयामास ॥५॥

---

११ अत्र यद्यपि श्रीरामस्यैव तादृशदुःखवत्वात् प्राणान् मोक्तुमैच्छदित्येव वक्तुमुचितम्, न तु सानुज इति । तथापि भ्रातृदुःखनिवन्धनं लक्ष्मणस्यापि तादृशं दुःखमिति विशिष्टोपादानमिति ध्येयम् ।

अगस्त्य उवाच -

किं विषीदसि राजेन्द्र कान्ता कस्य विचार्यताम् ।
जडः किं न विजानाति[१२] देहोऽयं पाञ्चभौतिकः ॥ ६ ॥

किमिति । हे राजेन्द्र ! राजश्रेष्ठ , किं विषीदसि । ननु कान्तार्थं विषीदामीति चेत्तत्राह - कान्तेति । कस्येयं कान्ता? विचार्यताम् । प्राप्तकाले लोट् । भार्याविरहदुःखं किं देहस्य ? आहोस्विदात्मनः? नाद्यः इत्याह - जड इति । अयं स्थूलो देहो जड इत्यन्वयः। ननु यद्यपि चिद्भिन्नत्वरूपं जडत्वं देहस्यास्ति, तथापि वैशेषिकाद्यभ्युपगतात्मवत् ज्ञानाश्रयत्वं भविष्यतीति चार्वाकमतेनाक्षेपे प्राप्ते आह - किमपि न विजानाति । यतः पाञ्चभौतिकः - पञ्चानां भूतानां विकारः। तथा च देहः न ज्ञानाश्रयः भूतत्वात् घटवत् । विपक्षे बाधकं तु देहस्यानुभवितृत्वे बाल्ये दृष्टं कौमारे न स्मरतीति । बाल्यकौमारशरीरयोः परिमाणभेदेन भेदात् । न ह्यन्येन दृष्टमन्यस्तु स्मरतीति युक्तम् , अति प्रसङ्गात् । न च परिमाणभेदेऽपि द्रव्यैक्यमस्त्विति वाच्यम् । अवयवोपचयं विना परिमाणभेदायोगात् । अवयवत्वस्य च द्रव्यसमवायिकारणतारूपस्य वैशेषिकादिसम्मतस्य द्रव्यान्तरोत्पत्तिं विना अनिर्वाहात् । न च तदवयवानां स्फूर्तिमात्रेण तदनुभूतं स्मर्यत इति वाच्यम् । मातापितृभ्यामनुभूतस्य पुत्रेण स्मरणापत्तेः। यद्यपि देहात्मवादी अनुमानप्रामाण्यं न सहते तथापि तत्साधयित्वा प्रसाध्याङ्गमिति बोध्यम् । एवं श्रुतिस्मृत्यादिप्रामाण्यादपि देहात्मवादोऽनुचित इति भावः ॥ ६ ॥

---

१२ "किं नु विजानाती"ति पाठान्तरम् । देहः जडः किं नु विजानातीत्याक्षेपः, न जानातीत्यर्थः।

नन्वस्तु तर्हि देहातिरिक्तस्यात्मन एव दुःखादिकमित्याशङ्क्याह - निर्लेपेति।

निर्लेपः परिपूर्णश्च सच्चिदानन्दविग्रहः।
आत्मा न जायते नैव म्रियते न च दुःखभाक् ॥७॥

आत्मा न जायते, नैव च म्रियते, नापि दुःखभागिति सम्बन्धः। तत्र दुःखाभावे हेतुः - निर्लेपः सच्चिदानन्दविग्रह इति । न दुःखहेतुसम्बन्धाभावे केवलानन्दस्य दुःखं युक्तमिति भावः। जननमरणाभावे हेतुमाह - परिपूर्ण इति। न ह्यपरिच्छिन्नस्योत्पादविनाशौ स्तः, परिच्छेदापत्तेरिति भावः॥७॥

निर्लेपतामेव विवृणोति सार्धश्लोकेन - सूर्योऽसाविति ।

सूर्योऽसौ सर्वलोकस्य चक्षुष्ट्वेन व्यवस्थितः।
तथापि चाक्षुषैर्दोषैर्न कदाचिद्विलिप्यते ।
सर्वभूतान्तरात्मापि तद्वद्दुःखैर्न लिप्यते ॥८॥

अत्र यथेति शेषः, यद्यपीति च । तथा चायमन्वयः - यद्यपि सूर्यः सर्वलोकस्य, चक्षुष्ट्वेन - चक्षुःप्रायत्वेन, व्यवस्थितः। यद्वा चक्षुरधिष्ठातृत्वात् चक्षुः। तथा च श्रुतिः "आदित्यश्चक्षुर्भूत्वा अक्षिणी प्राविशत्"(ऐ.आ. २-४-२-४) इति । तथापि चाक्षुषैर्दोषैः - परकामिन्यादि विषयकसाभिलाषदर्शनादिजन्यैः, यथा न लिप्यते तद्वत् सर्वभूतान्तरात्मा निष्कृष्टाहङ्कार चिद्भागपि दुःखैर्न लिप्यते - न सम्बध्यत इति ।

चक्षुष्ट्वेनेत्यत्र चक्षुश्शब्दादाचारक्विबन्तात् क्यजन्ताद्वा "तस्य भावः" (पा.सू. ५-१-११९) इति त्वप्रत्ययः, लक्षणा वा बोध्या ॥८॥

पूर्वं षष्ठश्लोकेन जडः किमित्यादिना देहस्य ज्ञातृत्वं नास्तीत्युक्तम्, तदनुपपन्नम् ; "स्थूलोऽहम्" "गौरोऽहम्" "जानामी"त्याद्यनुभव विरोधादित्याशङ्क्य लिङ्गशरीराख्यजीवोपाधिप्रयुक्तोऽयमनुभवः , तदपगमे तादृशानुभवाभावादिति समाधानं सिंहावलोकनन्यायेनाह - देहोऽपीत्यादिना सार्धश्लोकेन ।

देहोऽपि मलपिण्डोऽयं मुक्तजीवो जडात्मकः।
दह्यते वह्निना काष्ठैः शिवाद्यैर्भक्ष्यतेऽपि वा ।
तथापि नैव जानाति विरहे तस्य का व्यथा ॥९॥

अयं देहोऽपि, मुक्तो जीवो जीवोपाधिभूतलिङ्गशरीरं येनेत्येवं भूतस्सन् , मृतस्सन्नित्यर्थः। वह्निना कर्त्रा काष्ठैः करणभूतैः दह्यते । शिवाप्रभृतिभिर्वा भक्ष्यते । तथापि दह्यमानतां भक्ष्यमाणतां वा न जानाति । अतो मलपिण्डो जडात्मकश्च । एवम्भूतस्य जडस्य विरहप्रयुक्ता व्यथा का ? असम्भावितेत्यर्थः। तदेवं शरीरस्यात्मनश्च दुःखं न सम्भवतीति स्थितम् । ननु तर्ह्यहङ्कारस्य दुःखमस्त्विति चेत् सत्यं, न तु देहस्य दुःखमित्यादिना पूर्वपक्षमवतार्य मूल एवेदं समाधास्यतीति दिक् ॥९॥

तदेवं "कान्ता कस्य विचार्यता"मित्यारभ्य "विरहे तस्य का व्यथे"त्यन्तेन शोच्यता दुर्निरूपेत्युक्तम् । इदानीं शोच्योऽपि दुर्निरूप इत्युक्तं प्रतिजानीते - "सुवर्णगौरीत्यादिभिः" "शृणुष्वावहितो नृप"

इत्यन्तैः सार्धैश्चतुर्भिः श्लोकैः।

सुवर्णगौरी दूर्वाया दलवच्छ्यामलाऽपि वा ।
पीनोत्तुङ्गस्तनाभोगा भुग्नसूक्ष्मावलग्नका ॥ १० ॥

बृहन्नितम्बजघना रक्तपादसरोरुहा।
राकाचन्द्रमुखी बिम्बप्रतिबिम्बरदच्छदा ॥ ११ ॥

नीलेन्दीवरनीकाश नयनद्वयशोभिता ।
मत्तकोकिलसल्लापा मत्तद्विरदगामिनी ॥ १२ ॥

कटाक्षैरनुगृह्णाति मां पञ्चेषुशरोत्तमैः।
इति यो मन्यते[13] मूर्खस्स च पञ्चेषुशासितः॥ १३ ॥
तस्याविवेकं[14] वक्ष्यामि शृणुष्वावहितो नृप ॥ १४॥

पञ्चेषुणा - मन्मथेन, शासितो - वशीकृतः, मूर्खः सः, इति - इत्थं, मन्यते, तस्याविवेकं वक्ष्यामि, हे नृप ! अवहितस्सन् , शृणुष्व - शृणु, इत्यन्वयः। "इति मन्यते" इत्युक्तम् , तत्र इतीति कथमित्याकाङ्क्षायामाह - सुवर्णेत्यादि। सुवर्णमिव गौरी, दूर्वायाः दलवत् श्यामला । पीनयोः - उत्तुङ्गयोः, स्तनयोः, आभोगेन - विस्तारेण, भुग्नं - अवनतं, सूक्ष्मं - कृशं, अवलग्नं - मध्यं यस्यास्सा तथा, स्तनभारनम्रेत्यर्थः। "मध्यमञ्चावलग्नं च मध्योऽस्त्री"त्यमरः। विलग्नं चेति पाठान्तरमिति क्षीरस्वामी । बृहत्

१३ "इति यां मन्यते" इति पाठान्तरम् ।

१४ "तस्याः विवेकम्" इति पाठान्तरम् । तस्याः स्त्रियः विचारमित्यर्थः।

नितम्बजघनं यस्यास्सा। "पश्चान्नितम्बः स्त्रीकट्याः क्लीबे तु जघनं पुरः" इत्यमरः। रक्ते रोहितवर्णे पादावेव सरोरुहे यस्यास्सा। राकाचन्द्रः पूर्णिमाचन्द्रः इव मुखं यस्यास्सा। बिम्बस्य बिम्बफलस्य सदृशः ओष्ठो यस्यास्सा। नीलं यदिन्दीवरं तस्य सदृशं नीलेन्दीवरनीकाशमिति अस्वपदविग्रहः। मयूरव्यंसकादित्वात्समासो नित्यः। तथा चामरसिंहः "स्युरुत्तरपदे त्वमी। निभसङ्काशनीकाशप्रतीकाशोपमादयः" इति। तादृशेन नयनद्वयेन शोभिता। मत्तकोकिलस्येव सल्लापो यस्याः सा। मत्तद्विरदवद्गन्तुं शीलं यस्यास्सा। एवंविधा एषा कान्ता पञ्चेषुशरोत्तमैः उत्कृष्टैः कटाक्षैः मामनुगृह्णाति इति यो मन्यते तस्याविवेकं वक्ष्यामीति सम्बन्धः॥ १०-१४॥

शोच्यस्य दुर्निरूपतामभिप्रेत्य तदीयं विमोचनं प्रतिज्ञातम्, तदेवाह - न चेत्यादिना।

न च स्त्री न पुमानेष न चैवायं नपुंसकः।
अमूर्तः पुरुषः पूर्णो द्रष्टा[१५] साक्षी स जीविनः[१६]॥ १५॥

एषः - पूर्वोक्तो द्रष्टा पुरुषः परमात्मैव। स च न स्त्री न पुमान्नापि नपुंसकः। अत्र हेतुः - अमूर्त इति। स्त्रीत्वपुंस्त्वादिकं हि अवयवसंस्थानविशेषायत्तम्, न वाऽमूर्ते तत्संभवतीति भावः। ननु

१५ "द्रष्टाऽदेही" इति पाठान्तरम्। अदेही - देहरहितोऽपि, तद्धृदयदेशे स्थित्वा सर्वं नियमयतीत्यर्थः।

१६ "सजीवनः" इति पाठान्तरम्। जीवनं प्राणधारणम्, तस्य निर्वहितृत्वात् सजीवनः।

अहङ्कार एव द्रष्टेत्याशङ्क्याह - सः साक्षी, जीविनः - प्राणधारणवतः, अहङ्कारादेर्द्रष्टा, यतः पूर्णः - अधिष्ठानतया सर्वस्यानुस्यूतः। तथा च सर्वानुस्यूतेनेकेनैव व्यवहारोपपत्तौ नानेकप्रकाशव्यक्तिकल्पना युक्ता । तत्प्रतिबिम्बापादकवृत्तिमात्रवलेन अहङ्काराद् द्रष्टृत्वव्यवहारोपपत्तेः। स च प्रकाशो नित्यत्वादेव शोकार्हो नेत्याशयः ॥ १५॥

ननु शरीराख्यं जीवोपाधिं शोचामीत्याशङ्क्याह - या तन्वङ्गीति ।

या तन्वङ्गी मृदुर्बाला मलपिण्डात्मिका जडा ।
सा न पश्यति यत्किञ्चिन्न श्रृणोति न जिघ्रति ॥ १६ ॥

मलपिण्डात्मिका जडा, या त्वया तन्वङ्गी मृदुर्वालेति शोच्यते सा तु कदापि न पश्यति श्रृणोति जिघ्रति वा । तथा च 'कटाक्षैः इयमनुगृह्णाति' इत्युक्तिर्व्याहता, शोकश्च विफल इति भावः ॥ १६ ॥

चर्ममात्रं तनुस्तस्याः बुद्ध्या तिक्षस्व[१७] राघव ।
या प्राणादधिका सैव हन्त ते स्याद् घृणास्पदम् ॥ १७॥

हे राघव ! तस्यास्तन्वङ्ग्याः तनुश्चर्ममात्रं न ज्ञानादिशालीति बुद्ध्या, तिक्षस्व - तितिक्षस्वेत्यर्थः। निजेः क्षमायां सनि रूपम् । द्वित्वं तु "दाति प्रियाणि" इत्यादाविव च्छन्दसि वैकल्पिकत्वान्न भवति । क्वचित् 'बुद्ध्या त्यक्षस्वे'ति पाठः। तत्राकारप्रश्लेषः, अतिशयेनाक्षस्व - दृढो भव, 'अक्षू व्याप्तौ संघाते च' संघातः संहननं दार्ढ्यमिति क्षीरदेवः। पदव्यत्यय

---

१७ "वीक्षस्व" इति, "त्यक्षस्व" इति च पाठान्तरम् ।

आर्षः। सहने हेतुः - या प्राणादिति । अविचारदशायां या प्राणादप्यधिका सैव पूर्वोक्तरीत्या विवेकिनः, ते - तव, घृणास्पदं - जुगुप्साविषयस्स्यात् । तथा च उदासीने तृणादावपि शोकोऽनुचितः, किमुत जुगुप्सितेऽर्थे इति भावः। "जुगुप्सा करुणा घृणे"त्यमरः ॥ १७॥

जायन्ते यदि भूतेभ्यो देहिनः पाञ्चभौतिकाः।
आत्मा यदेकलस्तेषु परिपूर्णस्सनातनः॥ १८॥
का कान्ता तत्र कः कान्तः सर्व एव सहोदराः॥ १९॥

जायन्त इति । देहिनो यदि जायन्ते तर्हि भूतेभ्यः असङ्गस्य आत्मनः परिणामायोगात् । यदीत्यसन्दिग्धे सन्देहवचनम् "यदि वेदाः प्रमाणम्" इतिवत् । अत एव पाञ्चभौतिकाः, अतो भूतकार्यत्वात् घटादिवत् तेषां चेतनतेत्यर्थः। तेषु परिपूर्णाधिष्ठानतया अनुस्यूतः आत्मा तु , यत् - यस्मात्कारणात् , एकलः सनातनश्च । केति । तत्र तथा सति कान्ता कान्तश्च कः? आत्मन एकत्वादिति भावः। देहादीनामपि न कान्तत्वादि युक्तमित्याह - सर्व एवेति । सर्व एव - देहेन्द्रियादयः, सहोदराः - जडानृतत्वाभ्यां पारमार्थिकधर्मायोग्या इत्यर्थः॥ १८-१९॥

न चाध्यस्तदेहादिभङ्गे अधिष्ठानस्य काचित् क्षतिरित्याह - निर्मितायामिति ।

निर्मितायां गृहावल्यां तदवच्छिन्नतां गतम् ।
नभस्तस्यां तु दग्धायां न काञ्चित् क्षतिमृच्छति ॥२०॥

तद्वदात्माऽपि देहेषु परिपूर्णस्सनातनः।
हन्यमानेषु तेष्वेव स्वयं नैव हि हन्यते[१८] ॥२१॥

गृहावल्यां निर्मितायां सत्यां तदवच्छिन्नतां गतं नभः तस्यां गृहावल्यां दग्धायां सत्यां काञ्चिदपि क्षतिं, न ऋच्छति - न प्राप्नोति, यथा तद्वद्देहेषु परिपूर्णस्सनातनः आत्माऽपि देहेषु हन्यमानेषु सत्सु स्वयं न हन्यत एव । तदित्थं हन्तृहन्यमानयोः जडत्वादशोच्यता, आत्मा तु निर्विकारत्वादशोच्य इति स्थितम् ॥२०-२१॥

हन्ता चेन्मन्यते हन्तुं हतश्चेन्मन्यते हतम् ।
तावुभौ न विजानीतो नायं हन्ति न हन्यते ॥२२॥

हन्तेति । हननकर्ता - हन्ता, स यदाऽऽत्मानं हन्तुं मन्यते तथा हतः पुरुषः यदाऽऽत्मानं हतं मन्यते तर्हि तावुभावपि न विजानीतः इत्यर्थः। यतः अयमात्मा न हन्ति न हन्यते, असङ्गत्वान्नित्यत्वाच्चेति भावः ॥२२॥

अस्मान्नृपाति दुःखेन किं खेदस्यास्ति कारणम् ।
स्वस्वरूपं विदित्वेदं दुःखं त्यक्त्वा सुखी भव ॥२३॥

अस्मादिति । हे नृप ! अस्मात् - प्रागुक्तहेतोः, अतिदुःखेन यः खेदः - दैन्यम् , 'खिद दैन्ये' इति, 'खिद परिघाते' इति वा धातोः भावे घञ् । तस्य कारणं किमस्ति ? न किमपीत्यर्थः। इदं - प्रागुक्तं, सच्चिदानन्दरूपं स्वस्वरूपं विदित्वा दुःखञ्च त्यक्त्वा सुखी भवेति फलितार्थोपसंहारः ॥२३॥

---

१८ "विहन्यते" इति पाठन्तरम् ।

उक्तरीत्या स्थूलशरीरस्य परमात्मनश्च दुःखनिराकरणे प्रत्यक्षविरोधः शास्त्रोपदेशवैफल्यं चेत्यभिप्रेत्य पृच्छति त्रिभिश्श्लोकैः "मुने देहस्ये"ति रामः।

श्रीराम उवाच -

मुने ! देहस्य नो दुःखं नैव चेत् परमात्मनः।
सीतावियोगदुःखाग्निर्मां भस्मीकुरुते कथम् ॥२४॥

सदाऽनुभूयते योऽर्थस्स नास्तीति त्वयेरितः।
जायतां तत्र विश्वासः कथं मे मुनिपुङ्गव ! ॥२५॥

अन्योऽस्ति नास्ति को भोक्ता येन जन्तुः प्रतप्यते ।
सुखस्य वाऽपि दुःखस्य तद्ब्रूहि मुनिसत्तम ! ॥२६॥

हे मुने ! मननशील, अस्मदीयसंशयच्छेदने समर्थस्त्वमिति भावः। देहस्य दुःखं नो इत्यंशे अभ्युपगमः। परमात्मनोऽपि नैव चेत्तर्हि सीतावियोगाज्जातं दुःखं स एवाग्निर्मां कथं भस्मीकुरुते । सदेति । योऽर्थो दुःखात्मकः सदानुभूयते स नास्तीति त्वयोक्तः। तत्र - त्वदुक्तौ, मे विश्वासः कथं जायताम् , प्रत्यक्षविरुद्धेऽर्थे शब्दस्याप्रसरादिति भावः। शरीरपरमात्मनोरभोक्तृत्वं त्वयोक्तम् , ताभ्यामन्यः कश्चित् भोक्ताऽस्ति नास्ति वेति विकल्पः। द्वितीयं दूषयति - को भोक्तेति । यद्यन्योऽपि नास्ति तर्हि सुखस्य दुःखस्यापि वा को भोक्ता तद्ब्रूहि । ननु नास्त्येव भोक्तेत्यत आह - येनेति । जन्तुः - शरीरी, तप्यते । तथा च भोक्तुरपलापे प्रत्यक्षविरोधः, मोक्षशास्त्रानर्थक्यञ्च स्यादित्यर्थः। अनात्मनो

मोक्षानन्वयात् द्वितीयोऽपि नेति भावः ॥ २४-२६ ॥

चिन्मात्रं विषयः, तदाधारा च त्रिगुणात्मिका अनादिरविद्या, सैव माया, तस्यां तत्कार्ये अहङ्कारे वा प्रतिबिम्बितचैतन्यं जीवः, स चाहङ्कारोपाधिकः प्रमाता कर्तृत्वभोक्तृत्ववान् , अतो नानुभवविरोधः शास्त्रवैफल्यं वा । यत्तु आत्मा भोक्ता नेति प्रागुक्तं तद्विन्वीभूतः परमात्मा न भोक्तेत्याशयेन, जीवोऽपि प्रतिबिम्बात्मकः स्वसमानसत्ताकभोक्तृत्वाश्रयो नेत्याशयेन च । एवं च यद्यपि त्वयि विषयसत्ताकं भोक्तृत्वमप्यस्ति, तथापि तस्य शुक्तिरजतकल्पत्वान्न शोकः कार्य इत्यभिप्रेत्य सकलवेदरहस्यमुपदिशति अगस्त्यः चतुर्दशभिः श्लोकैः -

> दुर्ज्ञेया शाम्भवी माया[१९] तया सम्मोह्यते जगत् ।
> मायां तु प्रकृतिं[२०] विद्यान्मायिनं तु महेश्वरम् ॥ २७ ॥

दुर्ज्ञेयेति । शं सुखरूपो भवति तिष्ठतीति शम्भुः, शुद्धः पूर्णानन्दः, तस्येयं शाम्भवी । तन्मात्रविषया तदाधारा चेत्यर्थः। भूधातुः स्थितिवाची, 'भू सत्ताया'मिति स्मरणात् । न चोत्पत्तिरेव सत्तेति भ्रमितव्यम् , 'तत्र जातः' (पा.सू. ४-३-२५), 'तत्र भवः' (पा.सू. ४-३-५३) इति पृथक् सूत्रप्रणयनात् । ततः 'कर्तरि कृत्' (पा.सू. ३-४-६७) इति स्मरणात् कर्त्रर्थे मितद्र्वादित्वात् डुप्रत्ययः। तादृशी माया, दुर्ज्ञेया - क्षोदाक्षमा अघटितघटनापटीयसीत्यर्थः। अत एव तया, जगत् - जीवजातं,

१९ "दुर्जया शाम्भवी माया" इति पाठान्तरम् । ब्रह्मज्ञानं विना मायानिवृत्तेरसम्भवात् , ब्रह्मज्ञानस्य च दुस्सम्पादत्वादिति भावः।

२० "प्रकृतिं विद्धी"ति पाठान्तरम् ।

सम्मोह्यते - आवरणवत् क्रियते, अधिष्ठानावरणपूर्वकानिर्वचनीय वियदादिः प्रदर्श्यत इति भावः। पारमार्थिकत्वे अघटितं च घटयेत् , आवरणं च घटितम् । तथा हि, 'अस्ति' 'प्रकाशत' इति व्यवहारयोग्ये नास्तीतिव्यवहारयोग्यतारूपं भावात्मकमावरणं अस्तीतिव्यवहार योग्यताविरहरूपं वा । उभयथापि विरुद्धयोग्यतयोर्योग्यत्वतद्विरहयोश्च एकत्रायोगात् विषमसत्ताकता कल्प्या । तत्रास्तीति योग्यतायाः पारमार्थिकत्वेन अधिष्ठानाभिन्नत्वेऽप्युत्तरदिशं प्रतिष्ठयोः भावाभावयोः मिथ्यात्वमेव वाच्यम्, तत्स्थितिनियामिका च माया तादृश्येवोचिता । किं च कार्यपरिणामितापि पारमार्थिकस्य दुर्घटेति मिथ्याभूतमेव वियदादेः परिणामित्वं स्वीकर्तव्यम् । तथा हि - सत उत्पत्तौ आत्माप्युत्पद्येत, असत उत्पत्तौ शशशृङ्गादिरप्युत्पद्येत, प्रागभावप्रतियोगिन उत्पत्तिरिति चेन्न । असतः प्रतियोगितानुपपत्तेः। प्रतियोगिता हि घटादिस्वरूपात्मिकेति परमतम् । अस्तु वा अखण्डोपाधिरूपा भिन्नैव प्रतियोगिता । तथापि न निस्तारः। तद्बलेनैव शशशृङ्गादेरप्युत्पत्त्यापत्तेः। शशशृङ्गं नास्तीति चेत्तत्किमनुत्पन्ने घटे साऽस्ति । ओमिति चेत् निस्स्वरूपस्य अधिकरणतानुपपत्तेः। तस्मात् श्रेन्दाक्षमं शुक्तिरजतादिवन्मिथ्यैव सर्वं कार्यम् । एवं स्थिते एकबाधकबाध्यमुपादानं परिणाम्यपि मिथ्यैवेति । नात्मा तथा । किन्तु विवर्ताधिष्ठानमात्रमात्मा । ननु अज्ञानमेवावारकं विक्षेपकं च, शुक्त्यवच्छिन्नचैतन्यविषयकस्य अज्ञानस्यैव तदावरणजनकताया रजतोपादानकारणतायाश्च दर्शनादिति चेन्न, तस्यैव मायाशब्देनापि अभिधानात् । "माया चाविद्या च स्वयमेव भवति" (नृ.उ.ता. ९) इति श्रुतेः। यथा चैतत्तथा "मायामयरजत"मिति पञ्चपादिकाग्रन्थव्याख्यानावसरे विवरणकारैः प्रपञ्चितम् । नन्वेवमपि "मयाऽध्यक्षेण प्रकृतिः सूयते सचराचरम्" (भ.गी. ९-१०) इति श्रवणात्

प्रकृतिरेव उपादानमस्त्वित्याशङ्क्य सापि सैवेत्याह - मायान्त्विति । सकलकार्यपरिणामित्वान्मायैव प्रकृतिरित्यर्थः। ननु मायाऽविद्ययोरभेदात् जीववदीश्वरोऽप्यज्ञः स्यादित्याशङ्क्याह - मायिनमिति । महेश्वरं तु मायिनं विद्यात् , तत्त्वज्ञानिनमित्यर्थः। अयं भावः - धर्मैक्येऽपि आवरणविक्षेपशक्त्योर्भेदात् तत्पुरस्कारेण व्यवस्थयैव अविद्याशब्दो मायाशब्दश्च प्रयुज्यते । विक्षेपमात्रदर्शिनः ऐन्द्रजालिकस्य लोके मायावित्वेन व्यवहारात् । तेन व्यामोहितानान्तु अज्ञानित्वेनैव व्यवहारात् । तथा च बिम्बप्रतिबिम्बयोः पारमार्थिकैक्ये औपाधिकभेदमादाय यथा श्यामत्वावदातृत्वादिकं दुर्व्यवस्थयैवोपलभ्यते तथा बिम्बीभूतस्येश्वरस्य अनावृतस्वरूपत्वान्न संसारो न वा अज्ञत्वम् । प्रतिबिम्बभूतस्य जीवस्य तु आवरणं संसाराज्ञत्वं चेति व्यवस्था । अत एव "न तं विदाथ य इदम्"(तै.सं. ४-६-२) इत्यादिश्रुतौ युष्माकमित्युक्तिः सङ्गच्छत इति दिक् ॥२७॥

ननु जीवब्रह्मणोरौपाधिकभेदे घटावच्छिन्नतदनवच्छिन्नाकाशप्रदेशभेदेनैव स्थितिर्वाच्या, तथा च वियदाद्युपादानस्य ब्रह्मणः प्रपञ्चे अनुस्यूततया तत्र जीवस्य स्थितिर्न स्यादित्याशङ्क्याह - तस्येति ।

तस्यावयवभूतेन व्याप्तं सर्वमिदं जगत् ।
सत्यज्ञानात्मकोऽनन्तो विभुरात्मा महेश्वरः॥ २८॥

तस्य - परमात्मनः, अवयवभूतेन - अवयवप्रायेण जीवेन, इदं जगद्व्याप्तं, सत्यज्ञानात्मकोऽनन्तः ईश्वरात्मकोऽनन्तः, ईश्वरात्मापि विभुः - सकलव्यापक एवेत्यर्थः। अवच्छेदवादे हि प्रागुक्तदोषस्स्यात्, न तु

प्रतिबिम्ववादेऽपि । लोके स्वरूपं व्याप्यैव बिम्बप्रतिबिम्वत्वयोर्दर्शनात् , जलान्तरस्थमहाकाशे सत्येव प्रतिबिम्बाकाशाभ्युपगमाच्चेति भावः। अत एव "यथा ह्ययं ज्योतिरात्मा विवस्वान्[२१]" इत्यादिश्रुतयः प्रतिबिम्व दृष्टान्तमाहुः। सूत्रं च अस्मिन्नर्थे "अत एव चोपमा सूर्यकादिवत्" (ब्र.सू. ३-२-१८) इति ॥२८॥

ननु जीवस्य व्यापकत्वे घटावच्छेदेनापि सुखादिभोगः स्यादित्याशङ्क्याह - तस्येति।

तस्यैवांशो जीवलोके हृदये प्राणिनां स्थितः ॥२९॥

जीवलोके - जीवाः लोक्यन्ते तथाभूते स्पष्टजीवोपाधाविति यावत् । प्राणिनां हृदय एव तस्यांशः भोक्तृत्वादिना स्थितः। यथा न्यायनये शरीरावच्छिन्नस्यैव भोक्तृत्वं तद्वदिति भावः॥२९॥

विस्फुलिङ्गा यथा वह्नेर्जायन्ते काष्ठयोगतः।
अनादिकर्मसम्बन्धा स्तद्वदंशा महेशितुः ।
अनादिवासनायुक्ताः क्षेत्रज्ञा इति ते स्मृताः॥ ३०॥

नन्वहङ्कारस्य कार्यत्वात्तदवच्छिन्नप्रमातापि सादि स्यात् । तथा च कृतहानाकृताभ्यागमौ स्यातामित्याशङ्क्याह - विस्फुलिङ्गा इति। यथा वह्नेः काष्ठयोगतः, विस्फुलिङ्गाः - अग्निकणाः, सूक्ष्मरूपेण प्राक् सन्त एव जायन्ते, तद्वदनादिभिः प्रवाहादिभिः कर्मभिः सम्वन्धः अनादिर्यो

---

२१ "यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना वहुधैकोऽनुगच्छन् । उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा ॥" इति श्रुतेः।

वासनासंस्कारस्तेन युक्ताः महेशितुरंशा अंशोपाधयो अहङ्काराज्जायन्ते। अत एव च क्षेत्रज्ञोपाधित्वलक्षणया क्षेत्रज्ञा इति स्मृताः। अन्तःकरणञ्च स्थूलसूक्ष्मान्यतररूपेण आमोक्षमनुवृत्तेः नोक्तदोष इति भावः। तथा च सूत्राणि "पुंस्त्वादिवत्त्वस्य सतोऽभिव्यक्तियोगात्" (ब्र.सू. २-३-३१), "स एव तु कर्मानुस्मृतिशब्दविधिभ्यः" (ब्र.सू. ३-२-९), "तदाऽपीतेः संसारव्यपदेशात्" (ब्र.सू. ४-२-८) इत्यादीन्यमुमेवार्थं स्फुटीकुर्वन्तीति दिक् ॥३०॥

मनोबुद्धिरहङ्कारश्चित्तं चेति चतुष्टयम् ।
अन्तःकरणमित्याहुः तत्र ते प्रतिबिम्बिताः ॥ ३१ ॥
जीवत्वं प्राप्नुयुः कर्मफलभोक्तार एव ते ॥३२॥

ननु "हृदये प्राणिनां स्थितः" (२-२९) इत्यादिग्रन्थेन अन्तःकरण भोगोपाधितया उक्तम् , तदनुपपन्नम् , ग्रन्थान्तरेषु उपाध्यन्तराणामेव श्रवणात् । तथाहि - "मन एव मनुष्याणां कारणं बन्धमोक्षयोः" (मैत्रायण्युपनिषत् - ४-११), "ईक्षेत विभ्रममिदं मनसो विलास"मित्यादौ मन उपाधितया श्रुतम् । तथा "बुद्धेर्गुणेनात्मगुणेन चैव" (श्वे.उ. ५-८) इत्यादौ बुद्धिः श्रुता । तथा शोक-भय-हर्ष-क्रोध-लोभ-मोह-स्पृहादयः अहङ्कारस्य दृश्यन्ते । "जन्ममृत्यू च नात्मनः" इत्यादावहङ्कारः श्रुतः। "सर्वं चित्तविलासोऽयम्" इत्यादौ चित्तं श्रुतम् । तथा च किं विनिगमकमित्याशङ्क्याह - मन इति । सङ्कल्पविकल्पात्मकं मनः, निश्चयात्मिका बुद्धिः, अभिमानात्मकोऽहङ्कारः, विचारात्मकं चित्तम् इति वृत्तिविशेषवशादन्तःकरणस्यैव चतस्रोऽवस्थाश्चतुर्धा व्यवह्रियन्ते, अतो न कश्चिद्विरोध इति भावः।

नन्वहङ्कार एव भोक्ता न त्वात्मेति प्रतीयते । 'अहं भुञ्जे' इत्यादिप्रत्यक्षे भोक्तृद्वयानवगाहनात् , "शोकहर्षे"त्याद्युपक्रम्य "अहङ्कारस्य दृश्यते" "जन्ममृत्यू च नात्मनः" इति वचनाच्च, तत्कथमहङ्कारस्य भोगोपाधित्वमुक्तमित्याशङ्क्याह - तत्रेत्यादि । तत्र - अहङ्कारे प्रतिबिम्बिताः, ते - कल्पितभेदेनानन्ता आत्मानः, जीवत्वं प्राप्नुयुः। ते प्रतिबिम्वाः कर्मफलभोक्तार एव, न तु साङ्ख्यमत इव औपनिषदादौ दर्शने जीवानां सर्वथा कर्तृत्वशून्यता, तथा सति मोक्षशास्त्रारम्भवैयर्थ्यापत्तेरिति भावः। तथा च पाराशर्यसूत्रम् "कर्ता शास्त्रार्थवत्त्वात्" (ब्र.सू. २-३-३३) इति ॥३१-३२॥

नन्वेवं सति आत्मनो असङ्गत्वं पूर्वोक्तं विरुध्येतेत्याशङ्क्याह - तत इति।

ततो वैषयिकं तेषां सुखं वा दुःखमेव वा ।
त एव भुञ्जते भोगायतनेऽस्मिन् शरीरके ॥३३॥

तेषां - प्रतिबिम्बचैतन्यानां, वैषयिकं - विषयसम्वन्धप्रयुक्तं, सुखं दुःखं वा, ततः - तस्मात् , अहङ्काराख्योपाधेः, न स्वत इत्यर्थः। अयम्भावः - अहङ्कारस्यानौपाधिकस्य समानसत्ताकर्तृत्वम्, आत्मनस्तु अहङ्कारोपाधिकं धर्मिन्यूनसत्ताकर्तृत्वम्, अतो मिथ्यात्वघटकीभूत कर्तृत्वाभावस्यात्मनि सत्वान्न पूर्वोक्तमकर्तृत्वं विरुध्यते । आरोपितेनारुणिम्ना स्वाभाविकस्फटिकस्वच्छत्वस्यानपायात् । इदञ्च "यथा च तक्षोभयथा" (ब्र.सू. २-३-४०) इति सूत्रे स्फुटम् ।

ननु यद्यहङ्काराख्योपाधिः दुःखप्रयोजकस्तर्हि दैवदत्तीयाहङ्कारोपाधिना

यज्ञदत्तादिजीवा अपि दुःखमनुभवेयुः। न च यज्ञदत्तादिजीवाविष्टाः तत्तदहङ्कारावच्छेदेनैव वर्तन्ते, न तु देवदत्तीयाहङ्कारावच्छेदेनेति वाच्यम् । "तस्यावयवभूतेन व्याप्तं सर्वमिदं जगत्" (२-२८) इति श्लोके प्रतिबिम्बानां व्यापकत्वस्य पूर्वमुक्तत्वादित्याशङ्क्याह - त एवेति । यस्मिन् यस्मिन्नहङ्कारे यो यः प्रतिबिम्बः तत्तदहङ्कारौपाधिकं भोक्तृत्वं तत्तत्प्रतिबिम्बस्यैव न त्वन्यस्य, इतः व्यावृत्तस्य स्वप्रतिबिम्बमात्र निरूपितस्य अविद्यासम्बन्धविशेषस्य अहङ्कारेषु फलबलेन स्वीकारात् । तदयं मूलार्थः - येष्वहङ्कारेषु ये प्रतिबिम्बास्त एव भुञ्जते । तेनाहङ्कारेण भोगाः भवन्ति । नन्वेवमपि सुहृद्दर्शनादिकाले विषयदेशव्यापिन्या अन्तःकरणवृत्तेः अभ्युपगमात् सुहृच्छरीरस्यापि तद्द्रष्टृहङ्कारावच्छिन्नतया सुहृच्छरीरावच्छेदेन तद्द्रष्टुः सुखाद्यापद्येतेत्याशङ्क्याह - भोगायतन इति । भोगायतने - भोगावच्छेदके, अस्मिन् स्वाहङ्काराभेदेनाध्यस्ते, शरीरके - अनुकम्पाविषयीभूते शरीरे । "अनुकम्पायाम्" (पा.सू. ५-३-७६) इति कन् ।

अयं भावः। सुहृच्छरीरादिना उपभोग्यानुरोधात् अनावृत्तसाक्षितादात्म्यं यद्यप्यस्ति, तथापि दूरस्थवनस्पत्योरिवैक्याध्यासः अहङ्कारेण समं स्वशरीरस्यैव, 'अहं गौर' इत्यादिप्रतीतेः। न तु सुहृदादिशरीरेण समं सोऽस्ति । 'अयं घट' इतिवत् 'अयं सुहृ'दिति तटस्थतयैव प्रतीतेः। तथा चाहङ्काराभेदेनाध्यस्तमेव शरीरं भोगसाधनम् । तदाह भाष्यकारः "न चानध्यस्तात्मभावेन देहेन कश्चिद्व्याप्रियते" (ब्र.सू. अध्यासभाष्यम्) इति। विश्वात्मवादिनां नैयायिकादीनामप्येषैव गतिः। 'गौरोऽहं' इत्यादिभ्रमः तेषां मते अन्यथाख्यातिरूपः। अस्मिन् मते त्वनिर्वचनीयाख्या इत्यन्यदेतत् । न च तददृष्टारब्धत्वं नियामकम् , पुत्रादिशरीरस्यापि

तथात्वात् , प्रत्युत तन्मते भ्रमसम्बन्धस्यापि समवायैक्यम् , नातिप्रसक्तत्वात् । तत्पूर्वोक्तातिप्रसङ्गो दुर्वार इति दिक् । सूत्राणि च "अदृष्टानियमात्" (ब्र.सू. २-३-५१), "अभिसन्ध्यादिष्वपि चैवम्" (ब्र.सू. २-३-५२), "प्रदेशादिति चेन्नान्तर्भावात्" (ब्र.सू. २-३-५३) इत्यादीनि उक्तमर्थं दृढयन्ति । ग्रन्थविस्तरभयादुपरम्यते ॥ ३३ ॥

अहङ्काराभेदेनाध्यस्ते स्थूलशरीरे भोग इत्युक्तम् , तत्प्रसङ्गात् स्थूलशरीराणामवान्तरविभागमाह - स्थावरं चेति ।

स्थावरं जङ्गमं चेति द्विविधं वपुरुच्यते ।
स्थावरास्तत्र देहाः स्युः सूक्ष्मा गुल्मलतादयः[२२]।
अण्डजाः स्वेदजास्तद्वदुद्भिज्जा[२३] इति जङ्गमाः ॥ ३४ ॥

स्थातुं शीलमस्यास्तीति स्थावरम् - संचाराक्षमम् । तथा कुटिल-विहित-निषिद्ध-नानामार्गैर्गच्छति गम्यते जङ्गम्यते इति जङ्गमम् । गत्यर्थत्वात् कौटिल्ये यङ्, तदन्तादङ् । इति - इत्थं, वपुः - स्थूलशरीरम् , द्विविधं - द्विप्रकारम् , उच्यते । स्थावरा इति । तत्र - तयोः स्थावरजङ्गमयोः मध्ये, ये स्थावरा देहाः, ते सूक्ष्माः - क्षुद्राः, अतिमन्दाः, तत्संज्ञास्स्युः। के ते ? गुल्मलतादयः। जङ्गमानाह - अण्डजा इति । अण्डेषु जाताः अण्डजाः - पक्षिसर्पादयः। स्वेदाज्जाताः - मशकादयः। उद्भिदन्ति भूमिमित्युद्भिदः, तादृशास्सन्तो ये जायन्ते त उद्भिज्जाः - पिपीलिकादयः। उपलक्षणं चैतत् । जरायुजाः मनुष्य मृगादयोऽपि बोध्याः ॥ ३४ ॥

---

२२ "वृक्षगुल्मलतादयः" इति पाठान्तरम् ।

२३ "जरायुजाण्डजाश्चैव स्वेदजा इति जङ्गमाः" इति पाठान्तरम् ।

एवमुच्चावचान् देहानुक्त्वा तत्तत्प्राप्तौ नियामकमाह - योनिमिति ।

योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।
स्थाणुमन्येऽनुमन्यन्ते[२४] यथाकर्म यथाश्रुतम् ॥३५॥

अन्ये - वक्ष्यमाणेभ्यः स्थाण्वादिशरीरभाग्भ्यो भिन्नाःपुण्यविशेषशालिनः, देहिनः - देहसम्बन्धयोग्याः प्रमातारः, योनिं - स्त्रीलिङ्गत्वाय शरीरसम्बन्धार्थं, प्रपद्यन्ते - प्राप्नुवन्ति । अन्ये तु स्थाणवस्थाणुप्रभृतिशरीरम्, अनुमन्यन्ते - गृह्णन्ति । तत्र विनिगमकमाह - यथाकर्म - पापपुण्यानुसारेण, यथाश्रुतम् - वेदशास्त्राद्यध्ययनजन्यसंस्कारानुसारेणेति ॥३५॥

ननु अमीषां देहिनां भोगायतनत्वे त्रिणयनचतुर्भुजादिशरीरं परिगृहीतवतो बिम्वीभूतस्येश्वरस्यापि भोगस्स्यात्, कारणे सति कार्यस्यावश्यकत्वात् इत्याशङ्क्याह - सुख्यहमिति।

सुख्यहं दुःख्यहं चेति जीव एवाभिमन्यते ।
निर्लेपोऽपि परञ्ज्योतिर्मोहितश्शम्भुमायया ॥३६॥

जीव एव सुख्यहं दुःख्यहं चेत्यभिमन्यते । न तु बिम्वीभूतोऽपि। अयं भावः - शरीरमात्रे सत्यपि परमात्मनो न भोगः, कारणान्तरविरहात् ।

२४ "स्थाणुमन्येऽनुमीयन्ते" इति पाठे स्थाणुत्वं स्थाणुशरीरम, अनुमीयन्ते - माङ्मान इति धातोः दिवादावपि पाठात् कर्तरि श्यन्, उपसर्गवशात् प्राप्त्यर्थकः, तथा च स्थाणुशरीरं प्राप्नुवन्तीत्यर्थः। "स्थाणुमन्येऽनुसंयन्ति" "स्थाणुमन्ये प्रपद्यन्ते" इति च पाठान्तरम ।

सामग्र्यधीनं हि कार्यम् , कतिपयकारणमात्रेणापादितुं न शक्यम् । कारणं चेह धर्माधर्मावपि, तौ च भगवति न विद्येते । जीवे तु सुखदुःखादिसामग्री वर्तते इत्याशयेन तं विशिनष्टि - निर्लेप इति । यद्यपि निर्लेपः - समानसत्ताकसङ्गरहितः, तथा परञ्ज्योतिः - चिद्रूपः, तथापि शम्भुमायया मोहितः। तथा चावृतस्वरूपत्वात् सुखं दुःखमिति भावः ॥ ३६ ॥

आवृतस्वरूपे अहङ्काराध्याससम्भवात् अहङ्कारधर्मसम्बन्धोऽप्युदित एवेत्याशयेनाह - काम इति ।

कामः क्रोधस्तथा लोभो मदो मात्सर्यमेव च ।
मोहश्चेत्यरिषड्वर्ग महङ्कारगतं विदुः ॥ ३७ ॥

काम-क्रोध-लोभ-मद-मात्सर्य-मोहाख्यम् , अरीणां षड्वर्गं - षट्कम् , अहङ्कारगतं - अहङ्कारनिष्ठं, विदुः। तद्वृत्तिविशेषकात्मकत्वात् । तथा च श्रुतिः"कामस्सङ्कल्पो विचिकित्सा श्रद्धाऽश्रद्धा धृतिरधृतिर्ह्रीर्धीर्भीरित्येतत् सर्वं मन एव" (बृ.उ. १-५-३) इति ॥ ३७॥

अहङ्कारस्य दुःखोपाधितामन्वयव्यतिरेकाभ्यां दृढयति - स एवेति ।

स एव बध्यते जीवः[२५] स्वप्नजाग्रदवस्थयोः।

२५ "स एव वाधते जीवम्" इति पाठे सः अहङ्कारः जीवं वाधते, तन्निष्ठदुःखं सम्पादयतीत्यर्थः। "स एव वोध्यते जीवः" इति पाठे अहङ्कारेण जीवः 'अहं सुखी' 'अहं दुःखी'ति वोधविषयीक्रियते इत्यर्थः। "स एव वाध्यते जीवः" इति पाठे सः जीवः वाध्यते पीड्यते इत्यर्थः। "स एव वध्यते जन्तुः" इति च पाठान्तरम् ।

सुषुप्तौ तदभावाच्च जीवश्शङ्करतां गतः॥ ३८॥

स्वप्नजाग्रदवस्थयोः जीवः स एव चाहङ्कारोपहितस्सन्नेव, बध्यते - दुःखादिकं भजते । सुषुप्तौ तदभावात् - तस्य उपाधिभूतस्याहङ्कारस्याभावात्, सूक्ष्मरूपेणावस्थानात्, जीवः, शङ्करतां - बिम्बसाम्यं दुःखराहित्यं, गतः। तथा च श्रुतिः - "स्वमपीतो भवति" (छा.उ. ६-८-१) इति, "सुषुप्तिकाले सकले विलीने तमोऽभिभूतः सुखरूपमेति" (कैव.उ. १३) इति च ॥ ३८॥

ननु तथापि जीवस्याहङ्काराद्युपादानतया ब्रह्मणश्च वियदाद्युपादानतया सविकारतापत्तिमाशङ्क्य परिणामित्वे ह्येवं स्यात् , इह तु विवर्ताधिष्ठानतामात्रमित्याह - स एवेति ।

स एव मायया स्पृष्टः कारणं सुखदुःखयोः।
शुक्तौ रजतवद्विश्वं मायया दृश्यते शिवे ॥ ३९॥

जीवः, मायया - परिणामिन्या, स्पृष्टस्सन् सुखदुःखयोः, कारणम् - अधिष्ठानमित्यर्थः। शिवे - ब्रह्मणि, विश्वं - वियदादि, यद्दृश्यते तदपि, मायया - परिणामिन्या । उभयथाऽपि दृष्टान्तमाह - शुक्तौ रजतवदिति । तद्धि बाध्यत्वाबाध्यत्वाभ्यां विवर्तपरिणामयोर्भेदः ॥ ३९॥

ततो विवेकज्ञानेन न कोऽप्यत्रास्ति दुःखभाक् ।
ततो विरम दुःखात्त्वं किं मुधा परितप्यसे ॥ ४०॥

तत इति । ततः - आत्मनः असङ्गत्वात् अहङ्कारादेश्चाध्यस्तत्वात् ,

विवेकपूर्वकज्ञानेन - अधिष्ठानसाक्षात्कारेण । अत्र - अस्यां अविद्यानिवृत्तौ सत्याम् । दुःखं भजत इति दुःखभाक् कोऽपि नास्ति । उपसंहरति - तत इति । ततः - उक्तहेतोः त्वं दुःखाद्विरम । मुधा किमिति परितप्यसे - किमर्थं शोचसि ॥४०॥

भवदुक्तरीत्या जडस्य सर्वस्य मिथ्यात्वेऽपि अप्रतिबद्धाधिष्ठानसाक्षात्कारस्य अहङ्कारस्तद्धर्माश्च दुःखादयो दुर्निवाराः। किञ्च जीवन्मुक्तावस्थायामप्यवश्यं भोक्तव्यं प्रारब्धम् , आपातज्ञानवता श्रवणादिमात्रवता वा मादृशेन कथं न भोक्तव्यम् ; तथापि शोकोऽयं कथं वा त्याज्यः इत्याशयेनाह श्रीरामः - मुने इति ।

श्रीराम उवाच -

मुने ! सत्यमिदं सर्वं यन्मदग्रे त्वयेरितम् ।
तथापि न जहात्येतत् प्रारब्धादृष्टमुल्बणम् ॥४१॥

हे मुने ! त्वया मदग्रे यदीरितं तत्सर्वं सत्यमेव । तथापि उल्बणं - भोगैकनाश्यत्वात् प्रबलम् , एतत् - भुज्यमानफलं, प्रारब्धं च तददृष्टं चं, तत्तु मां न जहाति ॥४१॥

मत्तं कुर्याद्यथा मद्यं नष्टाविद्यमपि द्विजम् ।
तद्वत्प्रारब्धभोगोऽपि न जहाति विवेकिनम् ॥४२॥

मत्तमिति । मद्यं कर्तृ , नष्टा - ध्वस्ता अविद्या - निषिद्धाचरणादिविषयिणी दुर्बुद्धिः यस्य तथा भूतमपि, तथा द्विजं - उपनयनादिभिस्संस्कृतमपि, यथा मत्तं कुर्यात् , तद्वत् प्रारब्धस्य उपक्रान्तफलस्य भोगो, विवेकिनमपि -

अप्रतिबद्धं साक्षात्कारवन्तमपि न जहाति, किमुत अज्ञं मादृशमपीति लोकरीत्या उक्तिः ॥४२॥

ततः किं बहुनोक्तेन प्रारब्धं स शिवः स्मृतः।
बाधते मां दिवारात्रमहङ्कारोऽपि तादृशः[२६] ॥४३॥

तत इति । ततः - दुःखभोगपरिहारस्यापरोक्षज्ञानमात्रेण सम्भवात्, बहुनोक्तेन किं फलम् ? न किञ्चिदित्यर्थः। अतो दुःखापगमे उपायान्तरं ब्रूहीत्याशयेन दुःखमेव निगमयति - प्रारब्धमिति । प्रारब्धं, शिवः, अहङ्कारश्चेति त्रितयमपि माम् , अहोरात्रं बाधते । तथा हि, न केवलं प्रारब्धम् , जडत्वात् , "फलमत उपपत्तेः" (ब्र.सू. ३-२-३८) इत्याद्यधिकरणविरोधाच्च । नापि केवलः शिवः, वैषम्याद्यापत्तेः, तथा च सूत्रम् "वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति" (ब्र.सू. २-१-३४) इति । अहङ्कारस्तु दुःखादिपरिणाम्युपादानत्वादावश्यकः। ननु "सदा शिवः स्मर्यतां स एव दूरीकरिष्यती"त्यत आह - स्मृत इति । स्मर्तुमारब्ध इत्यर्थः। आदिकर्मणि क्तः। तथा चायं भावः - बहुजन्माराधने सत्येव विवेकादिक्रमेण मोक्षः उपलब्धुं शक्यते । न त्विदानीं स्मरणारम्भमात्रेण संसाराम्बुधितरणं शक्यम् , "बहूनां जन्मनामन्ते ज्ञानवान् मां प्रपद्यते" (भ.गी. ७-१९) इत्युक्तेरिति ॥४३॥

"बाधते मां दिवारात्र"मित्युक्तम् , तत्र न केवलं बाधमात्रं, किन्तु जीवनमेव दुर्लभमित्याह - अत्यन्तमिति ।

---

२६ "अनाकारोऽपि तादृशः" इति पाठान्तरम् । अनाकारः अङ्गहीनः मन्मथोऽपि तादृशः उत्पन्नस्सन् स्त्र्यभिलाषरूपेण बाधते इत्यर्थः ।

अत्यन्तपीडितो जीवः स्थूलदेहं विमुञ्चति ।
तस्माज्जीवाप्तये मह्यमुपायः क्रियतां द्विज ॥४४॥

॥ इति पद्मपुराणे शिवगीतासूपनिषत्सु
वैराग्योपदेशो नाम द्वितीयोऽध्यायः॥

अत्यन्तं - अतिशयेन, पीडितः जीवः उपाधिभूतं मदीयं लिङ्गशरीरं स्थूलदेहं, विमुञ्चति - शीघ्रं त्यक्ष्यति । "वर्तमानसामीप्ये वर्तमानवद्वा" (पा.सू. ३-३-१३१) इति भविष्यत्यपि वर्तमानसमीपे लट्प्रत्ययः। तस्माद्धेतोः, जीवाप्तये - जीवनस्थैर्यार्थम् उपायः, सः मह्यं क्रियताम् । अध्येषणायां कर्मणि लोट् , अनेन 'उपायोपदेशे आलस्यं न विधेयम्' इत्युक्तं भवति ।

अत्रेदमवधेयम् । बिम्वीभूतस्यासंसारिण एव उमार्धविग्रहं त्रिलोचनं लीलार्थं शरीरम् । एवं चतुर्भुजं लक्ष्मीसहायमपि तदुक्तं भवति। "सत्वं रजस्तम इति प्रकृतेर्गुणास्तैर्युक्तः परः पुरुष एक इहास्य धत्ते । स्थित्यादये हरिविरिञ्चिहरेति संज्ञाः" इति । अत एव शिवविष्णूत्कर्षापकर्षचिन्तया न खेदनीयम् । ननु श्रुतिरेवोत्कर्षापकर्षौ ब्रवीति "ते देवा रुद्रमपृच्छन् को भवानिति, सोऽब्रवीत् , अहमेकः प्रथममासं वर्तामि च भविष्यामि च, नान्यः कश्चन मत्तो व्यतिरिक्तः", "जनितेन्द्रस्य जनितोत विष्णो"रित्यादौ रुद्रोत्कर्षस्य विष्णोरपकर्षस्य च प्रतीतेः। तथा "नारायण एक एवाग्र आसीन्न ब्रह्मा न च शङ्करः" इत्यादौ प्रागुक्तविपरीतप्रतीतेरिति चेत् - न ।

नहिनिन्दान्यायेन[२७] श्रुतिद्वयस्यापि लीलाविग्रहविशेषप्रशंसापरत्वात् । अन्यथा परस्परविरोधेन उभयोरप्यप्रामाण्यापत्तेः। एवमेव हि उदितानुदितहोमनिन्दाश्रुत्योर्गतिः। एतेन शैववैष्णवपुराणस्थवचनान्यपि व्याख्यातानि । एवं स्थिते रामकृष्णादयोऽपि भगवत एव लीलाविग्रहाः। देवताप्रार्थनया भगदवतार इत्युपक्रम्यैव पुराणेषु तत्तच्चरित्रकीर्तनात् । मोहादीनां नटनन्तु गुरूपदेशादिमाहात्म्यं लोकान् प्रति प्रकटयितुम् । "वेदो वा प्रायदर्शनात्" (जै.सू. ३-३-२) इति न्यायेन उपक्रमप्राबल्यात् । अत एव श्रीकृष्णस्यैव गुरुकुलवासः। "ईशानकृष्णवपुषे"त्यादिग्रन्थैः श्रीनृसिंहाश्रमा अपीदं स्फुटीचक्रुरिति दिक् ॥४४॥

॥ इति श्रीमद्विशुद्धाद्वैतसिद्धान्तप्रतिष्ठापनैकधुरन्धर श्रीमच्छङ्करानन्दभारतीविरचिते शिवगीताभाष्ये द्वितीयोऽध्यायः॥

---

२७ "न हि निन्दा निन्दितुं प्रवृत्ता, अपि तु स्तुत्यं स्तोतुम्" इति न्यायः।

तृतीयोऽध्यायः

ननु परमपुरुषार्थसाधने उपदिष्टेऽपि विमुखस्सन् वैषयिकव्यवसाये प्रवर्तत इति दृष्ट्वा 'न केवलं त्वमेव एवं विधः, किन्तु लोकस्थितिरौत्सर्गिकी एवमेवेत्यगस्त्य आह - न गृह्णातीति ।

अगस्त्य उवाच -

न गृह्णाति वचः पथ्यं कामक्रोधादिपीडितः।
हितं न रोचते तस्य मुमूर्षोरिव भेषजम् ॥ १ ॥

कामक्रोधादिभिः पीडितो रागी, पथ्यं - हितं, वचः - गुरूपदेशं, न गृह्णाति । तदर्थबोध एव तस्य न भवतीत्यर्थः। दैववशादर्थबोधे जातेऽप्याह - हितमिति। यद्धितं तन्न रोचते, यथा मुमूर्षोः - सन्निहितमरणस्य, भेषजं न रोचते। "आशंकायां सन्वक्तव्य" इति सन्नन्तादुप्रत्ययः। अयं भावः, उपदिश्यमानमपि हितं न गृह्यते इति प्राकृतानां स्थितिरस्तु तावत् ; त्वन्तु उपदिष्टरीत्या तत्त्वमेव अनुसन्धातुमर्हसीति ॥ १ ॥

किञ्च यदि लौकिकपुरुषार्थोऽप्ययमनायासेन लभ्यते तर्हि साध्येतापि, इह तु मोक्षसाधने यादृगायासस्ततोऽप्यायासस्तत्र सम्भावित इत्याह - मध्येसमुद्रमिति ।

मध्येसमुद्रं या नीता सीता दैत्येन मायिना ।
आयास्यति नरश्रेष्ठ ! सा कथं तव सन्निधिम् ॥ २ ॥

या सीता, मायिना - मायाविना, न तु ऋजुमार्गेण । व्रीह्यादित्वादिनिः। दैत्येन - न तु मनुष्यादिना, मध्ये समुद्रं - समुद्रस्य मध्ये, अतिदूरं अतिदुर्गमं च देशं प्रतीति भावः, "पारे मध्ये षष्ठ्या वा" (पा.सू. २-१-१८) इत्यव्ययीभावः। नीता - बुद्धिपूर्वं प्रापिता । हे नरश्रेष्ठेति सम्वोधनतो न त्वं दैत्यः, नापि मायावीति भावः। सा सीता तव सन्निधिं कथमायास्यति, न कथञ्चिदित्यर्थः॥२॥

बध्यन्ते देवतास्सर्वा द्वारि मर्कटयूथवत् ।
किञ्च चामरधारिण्यो यस्य सन्ति सुराङ्गनाः॥ ३॥

बध्यन्त इति । यस्य द्वारि सर्वा अपि देवताः मर्कटयूथवत् बध्यन्ते । किञ्च यस्य सुराङ्गनाः चामरधारिण्यस्सन्ति । तस्य जयः कथं तव भविष्यतीति वक्ष्यमाणेनान्वयः॥३॥

भुङ्क्ते त्रिलोकीमखिलां यश्शम्भुवरदर्पितः।
निष्कण्टकं तस्य जयः कथं तव भविष्यति ॥४॥

भुङ्क्त इति । यो रावणः, शम्भुवरेण दर्पितः - गर्वितस्सन् , अखिलां त्रिलोकीम् , निष्कंटकं - निर्बाधं यथा भवति तथा, भुङ्क्ते । तस्य जयः - तत्कर्मको जयः, तव - वनवासदशापन्नस्य, कथं भविष्यति। अत्र तस्येति कर्मणि षष्ठी। तवेति तु यद्यपि कर्तरि षष्ठी दुर्लभा, "उभयप्राप्तौ कर्मणि" (पा.सू. २-३-६६) इति नियमात् । कर्तुः शेषत्वविवक्षायां सम्वन्धसामान्ये षष्ठी, तात्पर्यात् कर्तृत्वरूपे विशेषे पर्यवसानम् । यद्वा द्वे अपि कर्तृषष्ठ्यौ, तस्य जयो भविष्यति, तव तु कथं भविष्यतीति ॥४॥

इन्द्रजिन्नाम पुत्रो यस्तस्यास्तीशवरोद्धतः।
तस्याग्रे सङ्गरे देवा बहुवारं पलायिताः॥ ५॥

इन्द्रजिदिति । ईशस्य वरेणोद्धतः इन्द्रजिन्नाम तस्य रावणस्य यः पुत्रोऽस्ति तस्याग्रे, सङ्गरे - युद्धे, देवाः बहुवारं पलायिताः॥५॥

कुम्भकर्णाह्वयो भ्राता यस्यास्ति सुरसूदनः।
अन्यो दिव्यास्त्रसंयुक्तः[२८] चिरञ्जीवी विभीषणः॥ ६॥

कुम्भकर्ण इत्यादि । सुराणां - देवानां, सूदनः - भीषकः, कुम्भकर्णो नाम भ्राता यस्यास्ति । तथा दिव्यैरस्त्रैस्संयुक्तश्चिरञ्जीवी, विशेषेण भीषयतीति विभीषणः इत्यन्वर्थनामा । अन्यः - पूर्वोक्तात् कुम्भकर्णात् भिन्नोऽपि भ्राताऽस्ति, स कथं जेय इति वक्ष्यमाणेनान्वयः॥ ६॥

दुर्गं यस्यास्ति लङ्काख्यं दुर्जयं देवदानवैः।
चतुरङ्गबलं यस्य वर्तते कोटिसंख्यया ॥७॥

किञ्च दुर्गमिति । यस्य देवदानवैः सम्मिलितैरपि, दुर्जयं - जेतुमशक्यं, लङ्काख्यं दुर्गमस्ति । यस्य चतुरङ्गबलं - हस्त्यश्वरथपदातिरूपाणि चत्वारि अङ्गानि यस्येति, तथाभूतं सैन्यं कोटिसंख्यया उपलक्षितं सद्वर्तते । 'इयत्यः कोटयः' इत्येवं गणनीयम् , न तु शतसहस्रादिसंख्यया परिच्छेद्यमित्यर्थः॥७॥

---

२८ "अन्यो दिव्यास्त्रसम्पन्नः" इति पाठान्तरम्।

एकाकिना त्वया जेयस्स कथं नृपनन्दन !
आकाङ्क्षते करे धर्तुं बालश्चन्द्रमसं यथा ।
तथा त्वं काममोहेन जयं तस्याभिवाञ्छसि ॥८॥

एकाकिनेति । एवं पूर्वोक्तः ससहायः प्रतिपक्षः, एकाकिना - असहायेन, "एकादाकिनिच्चासहाये" (पा.सू. ५-३-५२) इत्याकिनिच्प्रत्ययः। त्वया कथं जेयः? 'हे नृपनन्दने'ति संबोधनेन सौकुमार्यं ध्वनयति । आकाङ्क्षत इति । यथा बालश्चन्द्रमसं करे धर्तुमाकाङ्क्षते, तथा त्वमपि काममोहेन तस्य रावणस्य जयमभिवाञ्छसि । स्वशक्तिं परशक्तिं चाविचार्यैव तं जेतुमिच्छसि, न तु फलं लप्स्यसे, अतः तत्त्वज्ञानार्थमेव यतस्वेत्याशयः ॥८॥

'नाहं ज्ञाने अधिकारी, वैराग्यविरहात्' इति लोकरीतिमनुसरन् श्रीराम आह - क्षत्रियोऽहमिति ।

श्रीराम उवाच -

क्षत्रियोऽहं मुनिश्रेष्ठ! भार्या मे रक्षसा हृता ।
यदि तं न निहन्म्याशु जीवने मेऽस्ति किं फलम् ॥९॥

हे मुनिश्रेष्ठ ! क्षत्रियोऽहं न तु ब्राह्मणः, येन युद्धाद्विभियां, क्षमया च तिष्ठेयम् । किञ्च क्षतात्त्रायत इति व्युत्पत्त्या पररक्षकता ममोचिता, स कथं कुटुम्बमपि न रक्षेयमिति भावः। क्षण् धातोः भावे क्विपि, तदुपपदात् त्रैङः "आतोऽनुपसर्गे" (पा.सू. ३-२-३) इति कप्रत्यये कृते "क्षत्राद्घः" (पा.सू. ४-१-१३८) इति घप्रत्ययः। किञ्च मे - मम, मदीयस्य न तु यस्य

कस्यचिद्भार्या, न तु क्षेत्रारामादिमात्रम् । रक्षसा - क्षुद्रेण, न त्वभ्यर्हितेन केनचित् । हृता - बलान्नीता, न तु स्वतः प्रवृत्ता । एवं स्थिते, आशु - शीघ्रं, तं - भार्यापहर्तारं, यदि न निहन्मि तर्हि मे जीवने किं फलमस्ति । तथा च न सीतालाभो ममोद्देश्यः किन्तु दुष्टनिग्रहः, स तु स्वधर्मत्वादावश्यक एवेत्याशयः ॥ ९ ॥

अतस्ते तत्त्वबोधेन न मे किञ्चित्प्रयोजनम् ॥ १० ॥
कामक्रोधादिभिस्सर्वैः [२९] दह्यते तैस्तनुर्मम [३०] ।
अहङ्कारोऽपि मे नित्यं जीवनं हन्तुमुद्यतः ॥ ११ ॥

अत इति । अतः - प्रागुक्ताद्धेतोः, ते तत्त्वबोधेन - त्वया क्रियमाणेनोपदेशेन, मे - वैरिनिर्यातनमकृतवतो मम, न किञ्चित्प्रयोजनम्, अनधिकारित्वात् । तथा हि । कामक्रोधादयो ये सर्वे दुर्गुणास्तैर्मम तनुर्दह्यते। तथा अहङ्कारोऽपि - क्षत्रियोऽहं शूरश्चेत्यादिगर्वोऽपि, मे - मम, जीवनं नित्यं हन्तुमुद्यतः, तस्मान्मम नायं श्रवणाद्यवसर इति भावः ॥ १०-११ ॥

ननु विषये दोषदर्शनस्य विरक्त्युपायत्वादीदृशं दुःखमनुभवतस्तव कथं न विरक्तिरुदेतीत्याशङ्क्याह - हृतायामिति।

हृतायां निजकान्तायां शत्रुणाऽवमतस्य वा ।
यस्य तत्त्वबुभुत्सा स्यात् स लोके पुरुषाधमः ॥ १२ ॥

---

२९ "कामक्रोधादयस्सर्वे" इति पाठान्तरम् ।

३० "दहन्ते ते तनुं ममे"ति पाठान्तरम् ।

यस्य शत्रुणावमतस्य - कृतावमानस्य सतः, निजकान्तायामपहृतायां सत्यां तत्प्रतीकारसामर्थ्यविरहादुद्विग्नस्य तत्त्वबुभुत्सा - तत्त्वं बोद्धुमिच्छा, विरागादिपूर्विका स्यात्, सः लोके पुरुषाधमः - नपुंसकप्रायः। अयं भावः - अनित्यत्वदुःखबहुलत्वादिज्ञानं विरागे हेतुरिति सत्यम् , तथापि भार्यापहारादिप्रयुक्ते दुःखे सति अभिमानिनां शत्रुसंजिहीर्षैव तावदुदेति, तत्सामग्र्याः फलबलप्राबल्यकल्पनात्। यस्य त युद्धकातरता तादृशस्य काममनेन विरक्तिस्संभाव्यते न तु मादृशानामिति ॥ १२॥

तस्मात्तस्य वधोपायं लङ्घयित्वाऽम्बुधिं रणे ।
ब्रूहि मे मुनिशार्दूल! त्वत्तो नान्योऽस्ति मे गुरुः॥ १३॥

तस्मादिति । हे मुनिशार्दूल - मुनिश्रेष्ठ !, तत्तदधिकारमनुसृत्य तदनुरूपमेवोपदेष्टुं समर्थस्त्वमिति भावः। अम्बुधिं लङ्घयित्वा योऽयं रावणवधः - समुद्रलङ्घनपूर्वकं युद्धे रावणहननं, तदुपायं मे मह्यं ब्रूहि। शापादिनाऽपि तं रावणं भस्मीकुर्याः, न च तावता मदिष्टसिद्धिः, नापि छलादिना वैरिवधो ममोद्देश्य इति 'रणे' इति 'अम्बुधिं लङ्घयित्वे'ति चोक्तम् । न तु शत्रुवधोपायस्त्वया अन्यथा वोद्धव्यः। अहं तु तव साधनचतुष्टयसंपत्तिकाले ब्रह्मतत्त्वमुपदेक्ष्यामि इत्यत आह - त्वत्त इति। मे - मम, त्वत्तोऽन्यः, गुरुः - हितोपदेष्टा, नास्त्येवेति। तस्मादनन्यशरणाय मह्यं रावणवधोपायोऽपि त्वयैवोपदेष्टव्य इति भावः॥ १३॥

अगस्त्य उवाच -

एवं चेच्छरणं याहि पार्वतीपतिमव्ययम् ।

स चेत्प्रसन्नो भगवान् वाञ्छितार्थं प्रदास्यति॥ १४॥

एवं चेदिति । एवं चेत् - शत्रुवध एव अवश्यं कर्तव्यश्चेत् , तर्हि अव्ययं पार्वतीपतिं शरणं याहि । स भगवान् प्रसन्नश्चेत्तर्हि वाञ्छितमर्थं प्रकर्षेण दास्यति ॥१४॥

देवैरजेयश्शक्राद्यैर्हरिणा ब्रह्मणाऽपि वा।
स ते वध्यः कथं वाऽस्तु शङ्करानुग्रहं विना॥ १५॥

देवैरिति । यो रावणः शक्राद्यैर्देवैः हरिणा ब्रह्मणाऽपि वा, अजेयः - जयार्हो न भवति, पूर्वोक्तशम्भुवरादिति भावः। "अर्हे कृत्यतृचश्च" (पा.सू. ३-३-१६९) इत्यर्हार्थे वा यत् । यदि तु "शकि लिङ् च" (पा.सू. ३-३-१७२) इति शक्यार्थे क्रियेत तदा "क्षय्यजय्यौ शक्यार्थे" (पा.सू. ६-१-८१) इति यान्तादेशः प्रवर्तत इति बोध्यम् । सः - रावणः, शङ्करानुग्रहं विना, ते - त्वया, वध्यः - हन्तुं शक्यः, कथं वाऽस्तु । "कृत्यानां कर्तरि वा" (पा.सू. २-३-७१) इति वैकल्पिकी षष्ठी॥ १५॥

अतस्त्वां दीक्षयिष्यामि विरजागममाश्रितः।
तेन मार्गेण मर्त्यत्वं हित्वा तेजोमयो भव॥ १६॥

अत इति । अतः - शङ्करानुग्रहस्यावश्यकत्वात् , विरजागमं - विरजाख्यदीक्षाप्रतिपादकशास्त्रम् , आश्रितस्सन् , त्वां दीक्षयिष्यामि - दीक्षावन्तं करिष्यामि । दीक्षाशब्दान्मतुप्, तत्करोतीति णिणाविष्ठवदित्यतिदेशान्मतुपष्टेश्च लोपः। तेन मार्गेण - उपायेन, त्वं

मर्त्यत्वं - इतरसाधारणत्वं, हित्वा - त्यक्त्वा, तेजोमयः - शुद्धशरीरवांश्च, भव - आशिषि लोट् ॥ १६ ॥

येन हत्वा रणे शत्रून् सर्वान् कामानवाप्स्यसि ।
भुक्त्वा भूमण्डलं चान्ते शिवसायुज्यमाप्स्यसि॥ १७॥

येनेति । येन - दीक्षामार्गेण, शत्रून् हत्वा सर्वान् कामान् , काम्यन्त इति कामाः कामनाविषयाः, तान् अवाप्स्यसि । किञ्च भूमण्डलं भुक्त्वा अन्ते शिवसायुज्यं परममुक्तिमवाप्स्यसि । शुद्धान्तःकरणस्य विवेकादिसाधनसौलभ्यादिति भावः ॥ १७॥

सूत उवाच -

अथ प्रणम्य रामस्तं दण्डवन्मुनिसत्तमम् ।
उवाच दुःखनिर्मुक्तः प्रहृष्टेनान्तरात्मना॥ १८॥

अथेति । अथ - मुनिवाक्यश्रवणानन्तरं, रामः तं मुनिसत्तमं, दण्डवत् - साष्टाङ्गं, प्रणम्य, दुःखनिर्मुक्तस्सन् प्रहृष्टेनान्तरात्मना उपलक्षितश्च सन् उवाच । मुनिश्रेष्ठेन मदीयमिष्टं सेत्स्यतीति प्रतिज्ञातत्वान्न तत्र विलम्बोऽस्तीत्यमन्यतेति भावः ॥ १८॥

श्रीराम उवाच -

कृतार्थोऽहं मुने ! जातो वाञ्छितार्थो ममागतः।
पीताम्बुधिः प्रसन्नस्त्वं यदि मे किमु दुर्लभम् ॥ १९॥

कृतार्थ इति । मुने ! अहं कृतार्थो जातः। मम वाञ्छितार्थः, आगतः - सिद्धः। तथा हि । पीताम्बुधिः त्वं यदि, मे - मह्यं प्रसन्नस्तर्हि दुर्लभं किमु, अन्येष्वसम्भावितं समुद्रपानं कृतवतस्तवानुग्रहे सति समुद्रे सेतुबन्धनाद्यात्मकं मदिष्टमनायासेनैव सेत्स्यतीत्यर्थः ॥ १९ ॥

अतस्त्वं विरजां दीक्षां ब्रूहि मे मुनिसत्तम ॥ २० ॥

अत इति । हे मुनिसत्तम ! विरजां दीक्षां, अतः - ममानुग्राह्यत्वात् , मे - मह्यं, ब्रूहि ॥ २० ॥

अगस्त्य उवाच -

शुक्लपक्षे चतुर्दश्यामष्टम्यां वा विशेषतः।
एकादश्यां सोमवारे आर्द्रायां वा समारभेत् ॥ २१ ॥

शुक्लपक्ष इति । शुक्लपक्षे चतुर्दश्यामथवा अष्टम्यां सोमवारार्द्रानक्षत्राभ्याम् उपेतायामेकादश्यां, समारभेत् - आरभेत, परस्मैपदमार्षम् ॥ २१ ॥

यं वाममाहुर्यं रुद्रं शाश्वतं परमेश्वरम् ।
परात्परतरं चाहुः परात् परतरं शिवम् ॥ २२ ॥

यमिति । "यमेवंविधमाहुस्तं ध्यात्वा पाशुपतं व्रतं चरेत्" इति वक्ष्यमाणेनान्वयः। कथं भूतम् ? वामं - श्रेष्ठं पूर्णानन्दरूपत्वात्सुन्दरम् । संसारवामनाद्वाम इति तु स्वामी । रुद्रमिति । रुदन्तीति रुदस्संसारिणः, तान् राति आदत्ते कृपया अनुगृह्णातीति रुद्रः तम् । क्विबन्ते रुदिर् धातावुपपदे "आतोऽनुपसर्गे कः" (पा.सू. ३-२-३) इति रातेः कप्रत्ययः।

परात्परमिति । परः जगदुत्कृष्टो जीवः, तस्मात्परतरः तन्नियामकत्वात् । परादिति। परः स्वभिन्नः प्रपञ्चः, तं अतति सातत्येन व्याप्नोति अधिष्ठानतयेति परात्। परे - जीवाः, तरन्त्यनेनेति परतरः। पराच्चासौ परतरश्चेति कर्मधारयः, अतो न पौनरुक्त्यम् । शिवं - शुभकरम् , तत्करोतिण्यन्तात्पचाद्यच् ॥२२॥

ब्रह्मणो जनकं विष्णोर्वह्नेर्वायोस्सदाशिवम् ।
ध्यात्वाऽग्निनाऽऽवसथ्याग्निं विशोध्य च पृथक् पृथक्॥ २३॥

ब्रह्मणो विष्णोर्वह्नेर्वायोश्च जनकं - ब्रह्मविष्ण्वादिवाच्यानां सकललीला विग्रहाणामधिष्ठानभूतं विम्बचैतन्यमित्यर्थः। अत एव सदाशिवं - सर्वदा पूर्णानन्दात्मना व्यवस्थितम् , एवं विधं ध्यात्वा इति पूर्वांगम् । ततः भूतशुद्धिप्रकारमाह - ध्यात्वेत्यादिना ॥२३॥

पञ्चभूतानि संयम्य ध्यात्वा[31] गुणविधिक्रमात् ।
मात्राः पञ्च चतस्रश्च त्रिमात्राः द्विस्ततः परम् ॥२४॥

पञ्चभूतानि स्वीयदेहारम्भकाणि पृथक् पृथक् विशोध्य, वायुवीजेन वायुं ध्यानपूर्वकं शोषयित्वा, अग्निना अग्निबीजेन आवसथ्यं ध्यात्वा, तेनाग्निना तानि भूतानि संयम्य - दग्ध्वा, तत्र वास्तवदाहस्यासम्भवान्निष्कृष्टार्थमाह - ध्यात्वेति । 'मदीयदेहारम्भकभूतानि अग्निना दग्धानी'ति भावनां कृत्वेत्यर्थः। तत्र भावनायां प्रकारमाह - गुणविधीति । गुणाः शब्दादयः, तेषां विधिः बोधनं, तत्क्रमेणेत्यर्थः। तमेव क्रमं स्फुटतरमाह - मात्रा

---

३१ "गुणविधिं क्रमात्" इति पाठान्तरम् ।

इति । पञ्चमात्राः रूपरसगन्धस्पर्शशब्दतन्मात्राः। अत्र मात्रपदेन तत्सम्बन्धिनः पृथिव्यादयो लक्ष्यन्ते। तथा च पूर्वभूतस्योत्तरोत्तरं प्रति उपादानतया तदीयशब्दादीनामपि उत्तरोत्तरमन्वयात् पञ्चमात्रा इत्यनेन पृथिव्युक्ता भवति। चतस्र इत्यनेन जलम् , त्रिमात्र इति तेजः, द्विरिति वायुः ॥ २४॥

एकमात्रममात्रं हि द्वादशान्ते व्यवस्थितम् ।
स्थित्यां स्थाप्यामृतो भूत्वा व्रतं पाशुपतं चरेत् ॥ २५॥

एकमात्रमिति । एका मात्रा यस्य तथाभूतमाकाशम् । एतच्चोपलक्षणमित्याह - द्वादशान्त इति । द्वादश एकादशतत्त्वानामाधारः परमेश्वरः, अन्तः लयावधिर्यस्मिन् कर्मणि तद्यथा भवति तथा व्यवस्थितम् । ध्यात्वेति । एकादशतत्त्वानि तु भागवते (११-२२-१) "कति तत्त्वानि विश्वेशे"त्युपक्रम्य "नवैकादश पञ्च त्रीण्यात्थ त्वमिह शुश्रुमे"त्युपन्यस्य "मायां मदीयामुद्गृह्य वदतां किं नु दुर्घट"मित्यनेन स्वीकृतानि । स्थित्यां स्थाप्येति । तदनन्तरममृतबीजेन तद्ध्यानपूर्वकं सर्वलयाधारं ब्रह्मणः अमृतसेकेन सृष्टिक्रमेण देहोत्पत्तिपर्यन्तं ध्यात्वेत्यर्थः। अमृतो भूत्वेति । परमेश्वरोपासनायोग्यदिव्यदेहवान् इत्यभिमानं कृत्वेत्यर्थः ॥ २५॥

इदं व्रतं पाशुपतं करिष्यामि समासतः।
प्रातरेवं तु सङ्कल्प्य निधायाग्निं स्वशाखया ॥ २६॥

इदमिति । पाशुपतं - पशुपतिदेवताकं इदं व्रतं, समासतः - संक्षेपेण,

करिष्यामीत्येवं, प्रातस्तु - प्रातरेव, सङ्कल्प्य, स्वशाखोक्तविधिना अग्निं निधाय - प्रतिष्ठाप्येत्यर्थः ॥ २६ ॥

उपोषितश्शुचिः स्नातः शुक्लाम्बरधरस्स्वयम् ।
शुक्लयज्ञोपवीतश्च शुक्लमाल्यानुलेपनः ॥ २७ ॥

उपोषितः - कृतोपवासः, शुचिः - बाह्याभ्यन्तरशौचवान् , स्नातः शुक्लवस्त्रधारी तथा शुक्लयज्ञोपवीतवान् , शुक्ले माल्यानुलेपने यस्य तथाभूतस्सन् जुहुयादित्युत्तरेण सम्बन्धः ॥ २७ ॥

जुहुयाद्विरजामन्त्रैः प्राणापानादिभिस्ततः ।
अनुवाकान्तमेकाग्रः समिदाज्यचरून् पृथक् ॥ २८ ॥

जुहुयादिति । ततः - तदनन्तरम् , एकाग्रस्सन् प्राणापानादिभिः विरजामन्त्रैः, अनुवाकान्तं - अनुवाकसमाप्तिपर्यन्तं, पृथक् - प्रत्येकं, समिदाज्यचरून् - समिधः आज्यं चरुं च जुहुयात् ॥ २८ ॥

आत्मन्यग्निं समारोप्य या ते अग्नेति मन्त्रतः ।
भस्मादायाग्निरित्याद्यै र्विमृज्याङ्गानि संस्पृशेत् ॥ २९ ॥

आत्मनीति । अत्र अग्न इतीति वक्तव्ये अग्नेति सन्धिरार्षः । तदयमर्थः, "याते अग्ने यज्ञिया तनूः"(तै.ब्रा. २-५-८) इत्यादिना मन्त्रेण अग्निमात्मनि समारोप्य तदनन्तरं, भस्म - विरजानलजमेव, सन्निधानात् ; आदाय - गृहीत्वा, अग्निरित्याद्यैर्मन्त्रैर्विमृज्य - भस्माभिमन्त्रणं कृत्वेत्यर्थः ।

तच्चेत्थम् । भस्माभिमन्त्रणमन्त्रस्य पिप्पलाद ऋषिः, गायत्री छन्दः, रुद्रो देवता, भस्मशुद्ध्यर्थे जपे विनियोगः। "ओं अग्निरिति भस्मे"त्यारभ्य "मन एतानि चक्षूंषि भस्मानी"त्यन्तैः[३२] अथर्वशिखायां पठितैः भस्माभिमन्त्रणं कर्तव्यमिति। ततोऽङ्गानि संस्पृशेत् - ललाटादिषु भस्म धारयेदित्यर्थः। धारणं च शिवनाममन्त्रेण गायत्र्यादिभिर्वा । तथा च पुलस्त्यः "अग्निरित्यादिभिर्मन्त्रैश्शुद्धं भस्माभिमन्त्रितम् । शिवमन्त्रेणाष्टाक्षरेण वा गायत्र्या वाऽपि देवर्षिमन्त्रेण प्रणवेन वे"ति । तेषां फलविशेषं स एवाह - "करोति शिवमन्त्रेण यस्त्रिपुण्ड्रं द्विजोत्तमः। त्र्यक्षः शूलधरः सौम्यः शिवलोके महीयते ॥ अष्टाक्षरेण मन्त्रेण यः करोति त्रिपुण्ड्रकम् । विष्णोः पदमवाप्नोति नान्यथा श्रुतिचोदितम् ॥ सौरं पदमवाप्नोति गायत्र्या मुनिसत्तमः। प्राप्नोति ब्रह्मणो रूपं प्रणवेन न संशयः॥" इति । इह

३२ "अग्निरिति भस्म । वायुरिति भस्म । जलमिति भस्म । स्थलमिति भस्म । व्योमेति भस्म । सर्वं ह वा इदं भस्म । मनः एतानि चक्षूंषि भस्मानि " इति ।

अग्निरित्यादिमन्त्राणामयमर्थः। "**अग्निरिति भस्म** । अग्निः - प्रसिद्धो लौकिकः शास्त्रीयश्च इन्धनसंयोगात् सर्वाभावविधायको ज्वालावलीढः दाह्याभावात् प्रसरमलभमानः उपरतः, इति - अनेन प्रकारेण, परित्यज्य स्वं नामरूपं कर्म च, भस्म - भसितमात्रम् । **वायुरिति भस्म** । वायुः - पवनः विश्वविनाशार्थं प्रवृत्ते कुण्डलीकृतज्वालामण्डले वायुसखे सख्युर्वृद्ध्यर्थं विविधैः शब्दैः सर्वकर्णरन्ध्राणि पूरयन् स्वनीतैः रजोभिः सर्वचक्षूंषि मुष्णन् अतिप्रवलानि शिखरिशिखराणि सशाखीन्यपि पातयन् इन्धनाभावादुपरते स्वसखे स्वयमपि स्वसखिवत् पश्चात् अनुपलभ्यमानः, इति - अनेन प्रकारेण, भस्म भसितमात्रम् । **जलमिति भस्म** । जलं - पय आदिरूपमग्नौ प्रक्षिप्तं नीरं स्वेन रूपेण स्वस्मादभ्यधिक इति - अनेन प्रकारेण, भस्म - भसितमात्रम् । **स्थलमिति भस्म** । स्थलं -पृथिवीस्वरूपमग्निसंयुक्तम् इति - अनेन प्रकारेण, भस्म - भसितमात्रम् । किं वहुना ! सर्वं - निखिलं, ह प्रसिद्धं वा स्मर्यमाणम् , इदं - विविधप्रत्ययगम्यं जगत्, भस्म - भसितमात्रम् । मनः - मनोगम्यं समनस्कं चेदं भस्मेत्यन्वयः। एतानि - प्रसिद्धानि, चक्षूंषि - चक्षुःप्रधानानीन्द्रियाणि , भस्मानि - भसितमात्राणि " इति ।

यद्यप्यङ्गानि संस्पृशेदित्युक्तम्, तथापि धारणं उक्ताशेषेभ्यो ग्रन्थान्तरेभ्यो बोध्यम् । तत्र शौनकः "ललाटे हृदये कण्ठे बाह्वोः पृष्ठे तथा गले। त्रिपुण्ड्रं भस्मना कुर्यात् इष्टमन्त्रेण मानवः" इति । स्मृतिरत्नावल्यां - "मध्यमानामिकाङ्गुष्ठैरनुलोमविलोमतः। अतिस्वल्पमनायुष्यम् अतिदीर्घं तपःक्षयम् । नेत्रयुग्मप्रमाणेन त्रिपुण्ड्रं धारयेद्विजः॥" स्मृतिसंग्रहे - "धार्यं भस्म त्रिसन्ध्यं तु गृहिणो जलसंयुतम् । सार्वकालं भवेत् स्त्रीणां यतीनां जलवर्जितम् ॥ वानप्रस्थस्य कन्यानां दीक्षाहीननृणां तथा । मध्याह्नात् प्राग्जलैर्युक्तं परतो जलवर्जितम् ॥ मध्याङ्गुलित्रयेणैव स्वदक्षिणकरस्य च । त्रिपुण्ड्रं धारयेद्विद्वान् सर्वकल्मषनाशनम्॥" इति । एतच्च भस्मधारणं सर्वकर्माङ्गम् । "न तद्ध्यानं न तज्ज्ञानं न तद्दानं जपो न सः। त्रिपुण्ड्रेण विना येन विप्रेण यदनुष्ठितम् ॥" इति वचनात् । कात्यायनोऽपि "श्राद्धे यज्ञे जपे होमे वैश्वदेवे सुरार्चने । धृतत्रिपुण्ड्रः पूतात्मा मृत्युं जयति मानवः॥" इति। संयोगपृथक्त्वन्यायेन पुरुषार्थमेति[३३] । तथा च भविष्यत्पुराणे - "सितेन भस्मना कुर्यात् त्रिसन्ध्यं च त्रिपुण्ड्रकम् । सर्वपापविनिर्मुक्तश्शिवेन सह मोदते॥ सत्यं शौचं जपो होमस्तीर्थे देवादिपूजनम् । तस्य व्यर्थमिदं सर्वं यस्त्रिपुण्ड्रं न धारयेत् ॥" इति ।

एवं स्थिते प्रकृतव्याख्येयग्रन्थोक्तं भस्मधारणं प्रकरणाद्विरजाङ्गमिति न्याय्यम्, पञ्चदशाध्याये वक्ष्यमाणन्तु प्रकरणपाठाभावात् पुरुषार्थम् । विस्तरस्तु अन्यतो बोध्यः॥२९॥

---

३३ "एकस्य तूभयत्वे संयोगपृथक्त्वम्" इति जैमिनिसूत्रम् (४-३-५)। यथा "दध्नेन्द्रियकामस्य जुहुयात्" इत्यत्र दध्नः अग्निहोत्ररूपक्रत्वर्थत्वम्, इन्द्रियकामरूपपुरुषार्थत्वं च ।

भस्मच्छन्नो द्विजो विद्वान् महापातकसम्भवैः।
पापैर्विमुच्यते नित्यं[३४] मुच्यते च न संशयः॥ ३०॥

भस्मच्छन्नः - भस्मलिप्तसर्वाङ्गः, ब्रह्महत्यादिसम्भवैः पापैर्विमुच्यते । मुच्यत इति । अन्तःकरणशुद्धिपूर्वकं ज्ञानद्वारा संसारादपि मुच्यत इत्यर्थः॥ ३०॥

अग्निवीर्यं[३५] यतो भस्म भस्मवान् वीर्यसंयुतः।
भस्मस्नानरतो विप्रो भस्मशायी जितेन्द्रियः।
सर्वपापविनिर्मुक्तः शिवसायुज्यमाप्नुयात् ॥ ३१॥

अग्निवीर्यमिति । भस्मवान् भस्मधारी वीर्येण संयुतो भवति । अत्र यत्त्वर्थवादमाह "अग्निवीर्यं यतो भस्मे"ति , "तेन ह्यन्नं क्रियते"[३६] इतिवत्प्राशस्त्यलक्षणकमिदम् ॥ ३१॥

एवं कुरु महाभाग ! शिवनामसहस्रकम् ।
इदं तु संप्रदास्यामि तेन सर्वार्थमाप्स्यसि॥ ३२॥

एवं कुर्विति । एवं - प्रागुक्तरीत्या, भस्मधारणं कुर्वित्यर्थः। इदं -

---

३४ "सद्यः" इति पाठान्तरम् ।

३५ "वीर्यमग्नेर्यतो भस्म" इति पाठान्तरम् ।

३६ चातुर्मास्ययागप्रकरणस्थस्य "शूर्पेण जुहोति" (तै.ब्रा. १-६-५) इति विधिसन्निधौ श्रुतस्य "तेन ह्यन्नं क्रियते" इत्यस्य शूर्पस्तावकत्वमङ्गीकृतं हेतुवन्निगदाधिकरणे (पू.मी. १-२-३)।

बुद्धिस्थशिवनामसहस्रकं तु, सम्यक् सावधानतया प्रकर्षेण स्नेहातिशयेन दास्यामि । तेन - शिवनामसहस्रेण, त्वं सर्वार्थं - प्रयोजनम्, आप्स्यसि॥ ३२॥

सूत उवाच -

इत्युक्त्वा प्रददौ तस्मै शिवनामसहस्रकम् ।
वेदसाराभिधं नित्यं शिवप्रत्यक्षकारकम् ॥ ३३ ॥

इति पूर्वोक्तमुक्त्वा, तस्मै - रामाय, वेदसार इत्यभिधा अन्वर्थनामधेयं यस्येति तथाभूतं, नित्यं - प्रत्यहं, शिवप्रत्यक्षकारकं - भगवत्साक्षात्कारजनकं शिवनाम्नां सहस्रकम् - रहस्यभूतसहस्रकम् , "अज्ञाते" (पा.सू. ५-३-७३) इति कप्रत्ययः, प्रददौ ॥ ३३ ॥

उक्तं च तेन राम ! त्वं जप नित्यं दिवानिशम् ॥ ३४ ॥

उक्तश्चेति । तेन - अगस्त्येन उक्तं च । किमुक्तम् ? तदेवाह - हे राम ! त्वं, दिवानिशम् - अहोरात्रम् , इदं जप । तदपि न कस्मिंश्चिदहोरात्रे, किन्तु सर्वेष्वित्याह - नित्यमिति ॥ ३४ ॥

ततः प्रसन्नो भगवान् महापाशुपतास्त्रकम् ।
तुभ्यं दास्यति तेन त्वं शत्रून् हत्वाऽऽप्स्यसि प्रियाम् ॥ ३५ ॥

तत इति । ततः - सहस्रनामजपात् , प्रसन्नः - कृतप्रसादः, भगवान् शिवः, परैरज्ञातं महच्च यत् पाशुपतास्त्रं, तुभ्यं दास्यति, तेन शत्रुं - रावणं, तत्सहचरांश्च हत्वा, त्वं प्रियां - सीताम् ,अवाप्स्यसि ॥ ३५ ॥

तस्यैवास्त्रस्य माहात्म्यात् समुद्रं शोषयिष्यसि।
संहारकाले जगतामस्त्रं तत्पार्वतीपतेः॥ ३६॥

तस्यैवेति । समुद्रमपि तस्यैवास्त्रस्य, महात्म्यात् - सामर्थ्यात् , शोषयिष्यसि । तस्य समुद्रशोषणसामर्थ्यं कैमुतिकन्यायेन समर्थयते - संहारेति । पार्वती पतेः - शिवस्य, जगतां संहारकाले, तदेव अस्यते क्षिप्यते इत्यस्त्रं, प्रयोगार्हमित्यर्थः। 'असु क्षेपणे' कर्मणि, तद्योगात्कर्तरि षष्ठी ॥३६॥

तदलाभे दानवानां जयस्तव सदुर्लभः।
तस्माल्लब्धुं तदेवास्त्रं शरणं याहि शङ्करम् ॥३७॥

॥ इति श्रीपद्मपुराणे शिवगीतासूपनिषत्सु
विरजादीक्षानिरूपणं नाम तृतीयोऽध्यायः॥

तदिति । तस्यास्त्रस्यालाभे दानवानां जयस्तव सुदुर्लभः। कर्तरि शेषत्वविवक्षायां षष्ठी, तेन 'न लोके'ति (पा.सू. २-३-६९) निषेधस्याप्रवृत्तिः। उपसंहरति - तस्मादिति ॥३६॥

॥ इति श्रीमद्विशुद्धाद्वैतसिद्धान्तप्रतिष्ठापनैकधुरन्धर
श्रीमच्छङ्करानन्दभारतीविरचिते शिवगीताभाष्ये तृतीयोऽध्यायः॥

चतुर्थोऽध्यायः

श्रीरामकृतां तपश्चर्यां तद्बहुलाज्जातं सदाशिवप्रादुर्भावं च वर्णयितुं चतुर्थोऽध्याय आरभते - एवमिति ।

सूत उवाच -

एवमुक्त्वा मुनिश्रेष्ठे गते तस्मिन्निजाश्रमम् ।
अथ रामगिरौ रामः पुण्ये गोदावरीतटे ॥ १ ॥

शिवलिङ्गं प्रतिष्ठाप्य कृत्वा दीक्षां यथाविधि ।
भूतिभूषितसर्वाङ्गो रुद्राक्षाभरणैर्युतः ॥ २ ॥

मुनिश्रेष्ठे तस्मिन्नगस्त्ये एवमुक्त्वा निजाश्रमं गते सति अथ रामः रामगिरौ, पुण्ये - पवित्रे, गोदावर्यास्तटे, शिवलिङ्गं प्रतिष्ठाप्य, यथाविधि - पूर्वाध्यायोक्तं विधिमनतिक्रम्य, दीक्षां विरजाख्यां कृत्वा, 'स्थितः' इति अग्रेतनेनान्वयः। कीदृशो रामः? भूतिभूषितसर्वाङ्गः, रुद्राक्षा एवाभरणानि तैर्युक्तः ॥ १-२ ॥

अभिषिच्य जलैः पुण्यैर्गौतमीसिन्धुसम्भवैः ।
अर्चयित्वा वन्यपुष्पैस्तद्वद्वन्यफलैरपि ॥ ३ ॥

अभिषिच्येति - स्वयं प्रतिष्ठापितं शिवलिङ्गं पुण्यैर्जलैरभिषिच्य । किं विधैर्जलैः? गौतमीसिन्धुसम्भवैः - गोदावरीप्रभवैः। वन्यानि - वने जातानि, तादृशैः पुष्पैः फलैश्चार्चयित्वा, 'स्थित' इति

वक्ष्यमाणेनान्वयः ॥ ३ ॥

भस्मच्छन्नो भस्मशायी व्याघ्रचर्मासने स्थितः।
नाम्नां सहस्रं प्रजपन् नक्तंदिवमनन्यधीः ॥ ४ ॥

भस्मेति । भस्मना च्छन्नः, भस्मन्येव शेत इति भस्मशायी । व्याघ्रस्य चर्म, तदेवासनं, तस्मिन् स्थितः। नक्तं दिवम् - अहोरात्रम् । नाम्नां सहस्रं - वेदसाराख्यं शिवनामसहस्रम् । प्रकर्षेण भक्तिश्रद्धारूपेण जपन् । न विद्यते अन्यस्मिन् सदाशिवाद्भिन्ने धीर्यस्य सः अनन्यधीः ॥ ४ ॥

मासमेकं फलाहारो मासं पर्णाशनः स्थितः।
मासमेकं जलाहारो मासं च पवनाशनः ॥ ५ ॥

मासमिति । एकं मासं फलमेवाहारो यस्य तथाभूतः स्थितः। पर्णान्येव अश्यत इत्यशनं भक्ष्यं यस्य तथाभूतः। अत्र सर्वत्र मासमित्यत्यन्तसंयोगे द्वितीया ॥ ५ ॥

शान्तो दान्तः प्रसन्नात्मा ध्यायन्नेवं महेश्वरम् ।
हृत्पङ्कजे समासीनमुमादेहार्धधारिणम् ॥ ६ ॥

शान्त इति । पुनः किम्भूतो रामचन्द्रः? शान्तः - अन्तरिन्द्रियनिग्रहवान्, दान्तः - बहिरिन्द्रियनिग्रहवान् । हृत्पङ्कजे समासीनं महेश्वरम् , एवं - पूर्वोक्तनियमविशिष्टस्सन् ध्यायन् सन् ॥ ६ ॥

चतुर्भुजं त्रिणयनं विद्युत्पिङ्गजटाधरम् ।
कोटिसूर्यप्रतीकाशं चन्द्रकोटिसुशीतलम् ॥७॥

चतुर्भुजमिति । त्रिनयनमित्यत्र क्षुभ्नादित्वान्न णत्वमिति दुर्घटवृत्तिकारादयः। नायं क्षुभ्नादिः, किन्तु "पूर्वपदात्संज्ञायाम्" (पा.सू. ८-४-३) इति भवत्येवेह णत्वमिति न्यासव्याख्यातारः। विद्योतत इति विद्युत् - तटित् । तद्वत्पिङ्गानां जटानां धरं धारकम् , अन्यथा कर्मण्यणप्रसङ्गात्। कोटिसंख्याकाः सूर्याः कोटिसूर्याः, तैस्सदृशं कोटिसूर्यप्रतीकाशम् , नित्यसमासोऽयमिति प्रागुक्तम् ॥७॥

सर्वाभरणसंयुक्तं नागयज्ञोपवीतिनम् ।
व्याघ्रचर्माम्बरधरं वरदाभयधारिणम् ॥८॥

सर्वेति । नाग एव यज्ञोपवीतम् , तदस्यास्तीति नागयज्ञोपवीती ; न कर्मधारयान्मत्वर्थीय इति तु प्रायिकम् । नागैर्यज्ञोपवीतमिति वा ॥८॥

व्याघ्रचर्मोत्तरीयं च सुरासुरनमस्कृतम् ।
पञ्चवक्त्रं चन्द्रमौलिं त्रिशूलडमरूधरम् ॥९॥

व्याघ्रचर्मोत्तरीयं चेति । त्रिशूलं च डमरुश्च त्रिशूलडमरू, तौ धरं - धारयन्तमित्यर्थः। "कर्तृकर्मणोः कृति" (पा.सू. २-३-६५) इति सूत्रेण कर्मणि षष्ठी तु न भवति, "तदर्हम्" (पा.सू. ५-१-११७) इति सूत्रेण तदनित्यताज्ञापनात्, आर्षत्वाद्वा ॥९॥

इदानीं - जायते, अस्ति, वर्धते, विपरिणमते, अपक्षीयते, विनश्यतीत्येवं

रूपान् षड्भावविकारान् यास्केनोक्तान् निषेधति - नित्यमिति ।

नित्यं च शाश्वतं शुद्धं ध्रुवमक्षरमव्ययम् ।
एवं नित्यं प्रजपतो गतं मासचतुष्टयम् ॥१०॥

नित्यं - नियतम्, उत्पत्तिरहितमित्यर्थः, "त्यब्नेः" (वार्तिकम्) इति त्यप्, 'नियतं ध्रुव'मिति वृत्तिकृतः। शाश्वतमिति - जन्मान्तरास्तित्वलक्षण द्वितीयविकारशून्यमित्यर्थः। शुद्धम् - निर्धर्मकं, वृत्तिशून्यमित्यर्थः। ध्रुवं - एकरूपं, परिणामशून्यमित्यर्थः। अक्षरम् - अपक्षयरहितम् । अव्ययम् । यद्यपि जन्मादिषु त्रिष्वेव षण्णामन्तर्भावो भाष्यकारादिभिरुक्तः। इहापि शुद्धमित्यनेनैव शेषाणां त्रयाणां निषेधः सुलभः। तथापि स्थितस्यै गतिरिति वा गोबलीवर्दन्यायेन वा समाधेयमिति दिक् ॥१०॥

अथ जातो महानादः प्रलयाम्बुधिभीषणः [३७]।
समुद्रमथनोद्भूत मन्दरावनिभृद्ध्वनिः॥ ११॥

अथेति । अथ - मासचतुष्टयापगमानन्तरम्, महानादो जातः। कीदृशः? प्रलयाम्बुधिभीषणः - अम्बुधिशब्देन तदीयशब्दो लक्ष्यते । समुद्रेति। समुद्रमथनोद्भूतो मन्दरपर्वतस्य ध्वनिः, तत्सदृश इत्यर्थः, सिंहो माणवक इतिवत् ॥११॥

---

३७ "प्रलयाम्बुदभीषणः" इति पाठान्तरम् । प्रलयकालीनाम्बुदजन्यध्वनिरिव भीषण इत्यर्थः।

रुद्रबाणाग्निसन्दीप्त भृशत्रिपुरविभ्रमः [३८]।
तमाकर्ण्याथ सम्भ्रान्तो यावत्पर्यैति [३९] पुष्करम् ।
तावदेव महातेजो रामस्यासीत् पुरो द्विजाः! ॥ १२ ॥

रुद्रेति । रुद्रस्य बाणाग्निना सन्दीप्तभृशं संदीप्तबहुलं यत् त्रिपुरं तस्य यो विभ्रमः महासंरम्भ इति यावत् , तं करोतीति तथाभूतो महानादो जात इति पूर्वेणान्वयः। तत्करोतिण्यन्तात् पचाद्यच् । तमिति । अथ - महानादोत्पत्त्यनन्तरम् , तं नादम् आकर्ण्य - श्रुत्वा, सम्भ्रान्तः - जातसंवेगः, "समौ संवेगसम्भ्रमा"वित्यमरः। भयादिना कर्णस्य पाटवं संवेग इति क्षीरस्वामी । एवम्भूतो रामः यावत् , पुष्करं - गोदावरीजलं, तथैव प्रक्रान्तत्वात्, "पुष्करं सर्वतोमुख"मित्यमरः। पर्यैति - एष्यामीत्युपक्रान्तवान् , कठोरशब्दं श्रोतुमशक्नुवन्तो हि जले मज्जन्तीति भावः। "यावत्पुरानिपातयोर्लट्" (पा.सू. ३-३-४) इति भविष्यति लट् । तावन्मध्य एव रामस्य पुरो, महच्च तत् तेजश्च महातेजः, आसीत् । हे द्विजा इति मुनीन् सूतस्संबोधयति ॥ १२ ॥

तेजसा तेन सम्भ्रान्तो नापश्यत् स दिशो दश ।
अन्धीकृतेक्षणस्तूर्णं मोहं यातो नृपात्मजः ॥ १३ ॥
विचिन्त्य तर्कयामास दैत्यमायां द्विजेश्वराः ॥ १४ ॥

तेजसेति । तेन तेजसा भ्रान्तः स रामो दशापि दिशो नापश्यत् । किन्तु

---

३८ "भ्रश्यत्त्रिपुरविभ्रमः" इति पाठान्तरम् ।

३९ "यावत्पश्यति पुष्करम्" इति पाठान्तरम् । पुष्करं - शब्दवत्वेन आकाशम् , पश्यति - विलोकयतीत्यर्थः।

अन्धीकृते ईक्षणे नेत्रे यस्येत्येवम्भूतस्सन् , तूर्णं - शीघ्रं, मोहं यातः। विचिन्त्येति । हे द्विजेश्वराः! विचिन्त्य - विचार्य, दैत्यमायां तर्कितत्वात् दैत्यमाया एषेति ऊहितवान् ॥ १३-१४॥

अथोत्थाय महावीरः सज्यं कृत्वा धनुः स्वकम् ।
अविध्यन्निशितैर्बाणै र्दिव्यास्त्रैरभिमन्त्रितैः ॥ १५॥

अथ महावीरो रामः उत्थाय, स्वकं - आत्मीयं, धनुः तेजसि सज्यं कृत्वा, दिव्यास्त्राभिमन्त्रिताः शितास्तीक्ष्णबाणाः तैस्तु बाणैरस्त्रैश्चेत्यर्थः। तथा चानुपदं वक्ष्यति "तस्मिंस्तेजसि शस्त्राणि चास्त्राण्यस्य महीपतेः"(४-१८) इति । पूर्वोक्तं तेजोराशिम् , अविध्यत् - ताडितवान्। 'व्यध ताडने' इति धातोः कर्तरि लङ् ॥ १५॥

दिव्यास्त्राण्येवाह द्वाभ्याम् -

आग्नेयं वारुणं सौम्यं मोहनं सौरपार्वतम्[४०] ।
विष्णुचक्रं महाचक्रं कालचक्रं च वैष्णवम् ॥ १६॥

रौद्रं पाशुपतं ब्राह्मं कौबेरं कुलिशानिलम् ।
भार्गवादिबहून्यस्त्राण्ययं प्रायुङ्क्त राघवः॥ १७॥

आग्नेयमिति । आग्नेयम् - अग्निदेवताकम् । मोह्यन्तेऽनेनेति मोहनं - सम्मोहनास्त्रम् । अनिलो वायुर्देवता अस्येत्यनिलम् । कुलिशं च अनिलं

४० "सौरपार्वते" - इति पाठान्तरम् ।

चेति समाहारद्वन्द्वः। वायव्यं चेत्यर्थः। अयं राघवो बहून्यस्त्राणि प्रायुङ्क्त - प्रयुक्तवान् ॥१६ - १७॥

तस्मिंस्तेजसि शस्त्राणि चास्त्राण्यस्य महीपतेः।
विलीनानि महाभ्रस्य करका इव नीरधौ ॥१८॥

तस्मिन्निति । तस्मिन् - प्रागुक्ते तेजसि, अस्य महीपतेः शस्त्राण्यस्त्राणि च विलीनानि । महाभ्रस्य सम्बन्धिन्यः करकाः वर्षोपलाः नीरधाविवेति दृष्टान्तेन अत्यन्तमस्त्राणां कुण्ठीभावं दर्शयति ॥१८॥

ततः क्षणेन जज्वाल धनुस्तस्य कराच्च्युतम् ।
तूणीरं चाङ्गुलित्राणं गोधिकापि महीपतेः॥ १९॥

तत इति । तदनन्तरं तस्य कराच्च्युतं सत् धनुः जज्वाल, तथा तूणीरं - निषङ्गः, जज्वालेत्यनुषज्यते । यद्यपि "तूणोपासङ्गतूणीरनिषङ्गा इषुधिर्द्वयोः। तूण्या"मित्यमरेण तूणीरशब्दः पुल्लिङ्ग एवोक्तः, भिन्नलिङ्गानां न द्वन्द्व इति तेन परिभाषितत्वात् । तथाप्यार्षो लिङ्गव्यत्ययो बोध्यः। यद्वा तूणी राति आदत्ते इति तूणीरं, तूणीसहितमिति यावत् । ईदृशमङ्गुलित्राणं जज्वालेति योजना । तथा गोधिकापि - ज्याघातवारणार्थं कृतं चर्ममयं तलमपि जज्वाल। "गोधे तले ज्याघातवारणे" इत्यमरः। अत्र हि सव्यसाच्यभिप्रायेण गोधे इति द्विवचननिर्देश इति स्वामी। 'गुध परिवेष्टने' अस्मात्करणे "षिद्भिदादिभ्योऽङ्" (पा.सू. ३-३-१०४) इत्यङ्प्रत्यये गुणविशिष्टं भिदादिगणे निपातितम् । यद्वा "णे रणा"वित्यादिसूत्रोक्तरीत्या (पा.सू.

१-३-६७) निवृत्तप्रेषणाद्धेतुमण्णिचि प्रकृतार्थपर्यवसानात् 'असिश्छिनत्ति' इतिवत् करणकर्तृत्वविवक्षायां पचाद्यचि बोध्यम् । उक्तश्च हरिणा "निवृत्तप्रेषणाद्धातोः प्राकृतेऽर्थे णिजिष्यत" इति । न च शुद्धादेवास्त्विति वाच्यम् । इगुपधलक्षणेन केन बाधितत्वात् । न च वासरूपन्यायः, सरूपत्वात् । 'नानुबन्धकृतमसारूप्य'मिति सिद्धान्तात् इति दिक् ॥ १९॥

तद्दृष्ट्वा लक्ष्मणो-भीतः पपात भुवि मूर्छितः।
अथाकिञ्चित्करो रामो जानुभ्यामवनिं गतः॥ २०॥

तदिति । तत् - तेजसा धनुरादिज्वलनं, दृष्ट्वा लक्ष्मणो भीतो मूर्छितश्च सन् भुवि पपात। अथ - अनन्तरं, रामः, न कञ्चित्पराक्रमं करोतीति अकिञ्चित्करस्सन्, जानुभ्याम्, अवनिं - भूमिं, गतः॥ २०॥

मीलिताक्षो भयाविष्टः शङ्करं शरणं गतः।
स्वरेणाप्युच्चरन्नुच्चैः शम्भोर्नाम सहस्रकम् ॥ २१॥

मीलितेति । मीलिते अक्षिणी येन तथा भूतः भयाविष्टश्च सन् शङ्करं, शरणं - रक्षितारं, गतः - प्राप्तः। किं कुर्वन् ? शम्भोः नामसहस्रकं वेदसाराख्यम् , उच्चैस्स्वरेण - तारस्वरूपेणापि, उच्चरन् - उच्चारयन् इत्यर्थः। अन्तर्भावितण्यर्थाच्चरतेश्शतृप्रत्ययः॥ २१॥

शिवं च दण्डवद्भूमौ प्रणनाम पुनः पुनः।
पुनश्च पूर्ववच्चासीच्छब्दो दिङ्मण्डलं स्वनन्[४१] ॥ २२॥

---

४१ "ग्रसन्" इति पाठान्तरम्। "सौरपार्वते" - इति पाठान्तरम्।

चचाल वसुधा घोरं पर्वताश्च चकम्पिरे ॥२३॥

शिवं चेति । किञ्च शिवं भूमौ दण्डवत्साष्टाङ्गं पुनः पुनः प्रणनाम । पुनश्चेति। पुनश्च - पुनरपि, पूर्ववदेव शब्द आसीत् । कीदृशः शब्दः? दिङ्मण्डलं स्वनन् - स्वानयन् , प्रतिध्वनिभिर्दिशः पूरयन्नित्यर्थः। अन्तर्भावितण्यर्थाच्छतृप्रत्ययः। तथा वसुधा - भूमिः, घोरं - भयङ्करं, चचाल । पर्वताश्च कम्पिताः ॥२२-२३॥

अथ क्षणेन शीतांशुशीतलं तेज आदधत् ।
उन्मीलिताक्षो रामस्तु यावद्यावत्प्रपश्यति ।
तावद्ददर्श वृषभं सर्वालङ्कारसंयुतम् ॥ २४॥

अथेति । अथ - अनन्तरं, क्षणेन उन्मीलताक्षस्सन् रामः, शीतांशुः चंद्रः तद्वच्छीतलं शीतस्पर्शं तेजः आसमन्तात् दधत् अबिभ्रत् सादरमद्राक्षीदित्यर्थः। 'धेट् पाने' "विभाषा धेट्श्व्योः" (पा.सू. ३-१-४९) इति चङ् । न चात्र धात्वन्तरं वैयाकरणैश्शङ्कितुमप्यर्हम् । यावद्यावत्प्रपश्यति प्रकर्षेणावलोकयति तावद्वृषभं ददर्श । प्रथमं तेजःपुञ्जमात्रं दृष्टवान् , ततो वृषभत्वेनाज्ञासीदित्यर्थः। वृषभं विशिनष्टि 'सर्वालङ्कारे'त्यादिना 'पूरयन्तं दिशो दश'त्यन्तेन ॥२४॥

पीयूषमथनोद्भूत नवनीतस्य पिण्डवत् ।
प्रोतस्वर्ण[४२] मरकतच्छायशृङ्गद्वयान्वितम् ॥२५॥

---

४२ "प्रोथस्वर्णम्" इति पाठान्तरम् ।

पीयूषेति । पीयूषस्यामृतस्य मथनेनोद्भूतं यन्नवनीतं दधिमथनप्रभवं प्रसिद्धं, नवनीतापेक्षया कारणप्रकर्षादत्यन्तरमणीयमिति भावः, तस्य पिण्डवत् स्थितम् । प्रोतम् - शृङ्गाग्रे खचितं, स्वर्णं सुवर्णं यस्य तम् । मरकतच्छायेन शृङ्गद्वयेनाञ्चितं - पूजितं, रमणीयमित्यर्थः ॥ २५ ॥

नीलरत्नेक्षणं ह्रस्वकण्ठकम्बलभूषितम् ।
रत्नपल्याणसंयुक्तं निबद्धं श्वेतचामरैः ॥ २६ ॥

नीलेति । नीलरत्नं - इन्द्रनीलमणिः, तद्वदीक्षणे यस्य तम् । ह्रस्वेन कण्ठकम्बलेन सास्नया भूषितम् । रत्नमयेन पल्याणेन - आस्तरणेन युक्तम् । श्वेतचामरैः निबद्धम् - सम्वद्धम् ॥ २६ ॥

घण्टिकाघर्घरैश्शब्दैः पूरयन्तं दिशो दश ।
तत्रासीनं महादेवं शुद्धस्फटिकविग्रहम् ॥ २७ ॥

कोटिसूर्यप्रतीकाशं कोटिशीतांशुशीतलम् ।
व्याघ्रचर्माम्बरधरं नागयज्ञोपवीतिनम् ॥ २८ ॥

घण्टिकेति । घण्टिकाः - क्षुद्रघण्टाः, घर्घराः - भूषणविशेषाः, तैर्द्वितयैर्ये जनिताश्शब्दाः तैः दश दिशः पूरयन्तम् । एतादृशं वृषभं ददर्शेति सम्बन्धः। तत्रेति । तत्र - तस्मिन् पूर्वोक्तवृषभे, आसीनं महादेवं ददर्श रघुनन्दन इति वक्ष्यमाणेनान्वयः। महादेवस्य विशेषणानि शुद्धस्फटिकेत्यादीनि ॥ २७ - २८ ॥

सर्वालङ्कारसंयुक्तं विद्युत्पिङ्गजटाधरम् ।
नीलकण्ठं व्याघ्रचर्मोत्तरीयं चन्द्रशेखरम् ॥२९॥

नानाविधायुधोद्भासि दशबाहुं त्रिलोचनम् ।
युवानं पुरुषश्रेष्ठं सच्चिदानन्दविग्रहम् ॥३०॥

नानाविधेति । नानाविधानि यान्यायुधानि तैरुद्भासितुं शीलं येषां ते नानाविधायुधोद्भासिनः, तथा भूताः दश बाहवो यस्य तम् , तथाभूतम् । ननूद्भासीति णिनिप्रत्ययो अनुपपन्नः, "सुप्यजाता"विति (पा.सू. ३-२-७८) सूत्रे सुबुक्तिः प्रादिनिवृत्त्यर्थेति काशिकादौ सिद्धान्तिततत्वादिति चेन्न , उपसर्गस्योपपदतामाश्रित्य प्राप्तो णिनिर्न भवतीति तदर्थात् , अन्यथा 'ब्राह्मणानामन्त्रयिते'ति तदुदाहृतस्य अजातिप्रत्युदाहरणस्य असङ्गति प्रसङ्गादिति प्राञ्चः। वस्तुतस्तु "उपसर्गाद्दाति धातौ" (पा.सू. ६-१-९१) इति सूत्रे कैयटेन "सुप्यजाता"विति सुब्ग्रहणं प्रादिषु प्रवृत्त्यर्थम्, तेन प्रादावपि णिनिर्भवत्येवेत्युक्तत्वात्तद्रीत्या न चाशङ्का न चोत्तरमिति दिक् ॥२९ - ३०॥

तत्रैव च सुखासीनां पूर्णचन्द्रनिभाननाम् ।
नीलेन्दीवरदामाभा मुद्यन्मरकतप्रभाम् ॥३१॥

तत्रैव चेति । तत्रैव वृषभे सुखासीनां जगन्मातरमम्बिकां 'रघुनन्दनो ददर्शे'ति वक्ष्यमाणेनान्वयः। अम्बिकाया एव विशेषणानि पूर्णचन्द्रनिभाननामित्यादीनि । नीलानामिन्दीवरणां यद्दाम माला तदाभां तत्सदृशीम् । उद्यन्ती आविर्भवन्ती मरकतस्येव प्रभा यस्यां ताम् ॥३१॥

मुक्ताभरणसंयुक्तां रात्रिं ताराञ्चितामिव ।
विन्ध्यक्षितिधरोत्तुङ्ग कुचभारभरालसाम् ॥ ३२ ॥

मुक्तेति । मुक्ता एवाभरणानि तैस्संयुक्ताम्, अत एव ताराभिर्नक्षत्रैरञ्चितां रात्रिमिव स्थिताम् । विन्ध्यक्षितिधरवत् उत्तुङ्गयोः उन्नतयोः कुचयोर्यो भारः तस्य यो भरः अतिशयः तेन अलसाम्, "अप्यथातिशयो भरः" इत्यमरः ॥ ३२ ॥

सदसत्संशयाविष्ट मध्यदेशान्तरां पराम्[४३] ।
दिव्याभरणसंयुक्तां दिव्यगन्धानुलेपनाम् ॥ ३३ ॥

सदसदिति । सदसत्संशये - अस्ति न वेत्येवं रूपसन्देहे अविष्टं विषयीभूतं मध्यदेशान्तरं मध्यदेहावकाशो यस्यास्ताम्, "अन्तरमवकाशावधी"-त्याद्यमरः । परां - सर्वोत्कृष्टाम् ॥ ३३ ॥

दिव्यमाल्याम्बरधरां नीलेन्दीवरलोचनाम् ।
अलकोद्भासिवदनां ताम्बूलग्रासशोभिताम् ॥ ३४ ॥

दिव्येति । दिव्यानां माल्यानां अम्बराणां च धरां धारयित्रीम् । ताम्बूलस्य ग्रासेन भक्षणेन शोभिताम्, 'ग्रसु - अदने' ॥ ३४ ॥

शिवालिङ्गनसञ्जात पुलकोद्भासिविग्रहाम् ।
सच्चिदानन्दरूपाढ्यां जगन्मातरमम्बिकाम् ॥ ३५ ॥

---

४३ "वराम्" इति, "मध्यदेशां तलोदरीम्" इति च पाठान्तरम् ।

सौन्दर्यसारसन्दोहां ददर्श रघुनन्दनः।

शिवेति । शिवस्य आलिङ्गनेन सञ्जातैः पुलकैः रोमाञ्चैः उद्भासितुं शीलमस्य तथाभूतो विग्रहो यस्यास्ताम् । सौन्दर्येति । सौन्दर्यसारस्यैव सन्दोहो मेलनं यस्यास्ताम् । तेन बहुव्रीहेर्विशेष्यनिघ्नत्वात् स्त्रीत्वम् । सौन्दर्यस्य सारस्य सन्दोह इति षष्ठीतत्पुरुषे तु परवल्लिङ्गतया पुंस्त्वं स्यात् ॥३५॥

स्वस्ववाहनसम्बद्धान् नानायुधलसत्करान् ॥३६॥
बृहद्रथन्तरादीनि सामानि परिगायतः।
स्वस्वकान्तासमायुक्तान् दिक्पालान् परितः स्थितान् ॥३७॥

स्वस्वेति । रघुनन्दनः दिक्पालांश्च ददर्शेत्यन्वयः। कीदृशान् दिक्पालान्? स्वस्ववाहनैः - ऐरावतादिभिः सम्बद्धान् । नानायुधैः वज्राद्यायुधैः लसन्तः शोभमानाः कराः येषां तान् । बृहत्साम - "त्वामिद्धि हवामहे" (तै.सं. २-४-१४) इत्यस्यामृचि गीतम् । तथा रथन्तरसाम - "अभि त्वा शूरनो नुमः" (ऋ.सं. ७-३२-२२) इत्यस्यामृचि गीतम् । बृहच्च रथन्तरं च बृहद्रथन्तरे आदिर्येषां तानि। आदिशब्दात् राजन-रौहिण-पुरुषगत्वादीनां संग्रहः। तानि सामानि परिगायतः। "गीतिषु सामाख्या" (जै.सू. २-१-३६) इति सिद्धान्तात् । स्वस्वेति । स्वस्वकान्ताभिः शचीप्रभृतिभिः समायुक्तान्, परितः - शिवयोस्समन्तात्, स्थितान् ॥३६ - ३७॥

अग्रगं गरुडारूढं शङ्खचक्रगदाधरम् ।

कालाम्बुजप्रतीकाशं[४४] विद्युत्कान्त्या[४५] श्रिया युतम् ॥३८॥

जपन्तमेकमनसा रुद्राध्यायं जनार्दनम् ।
पश्चाच्चतुर्मुखं देवं ब्रह्माणं हंसवाहनम् ॥३९॥

चतुर्वक्त्रैश्चतुर्वेद रौद्रसूक्तैर्महेश्वरम् ।
स्तुवन्तं भारतीयुक्तं दीर्घकूर्चं जटाधरम् ॥४०॥

अग्रगमिति । अग्रगं जनार्दनं ददर्शेत्यन्वयः। कालाम्बुजं - नीलोत्पलम्, "कृष्णे नीलासितश्यामकालश्यामलमेचकाः" इत्यमरः। तेन सदृशं, नित्यसमासोऽयमित्युक्तः प्राक् । पश्चादिति । पश्चात् ब्रह्माणं ददर्शेत्यन्वयः। चतुर्भिर्मुखैः वेदचतुष्टयस्य रुद्रसूक्तैर्महेश्वरं स्तुवन्तम् । भारतीयुक्तं - सरस्वत्या सहितम् । दीर्घकूर्चः भ्रुवोर्मध्यं यस्य तं दीर्घकूर्चम् । "कूर्चमस्त्री भ्रुवोर्मध्य"मित्यमरः। दीर्घश्मश्रुमिति वा। "कूर्चो विकत्थने मध्ये भ्रुवोः श्मश्रुणि कैतवे" इति विश्वः॥३८-४०॥

अथर्वशिरसा देवं स्तुवन्तं मुनिमण्डलम् ।
गङ्गादितटिनीयुक्तमम्बुधिं नीलविग्रहम् ॥४१॥

अथर्वेति । मुनीनां मण्डलं सङ्घः, सन्ददर्शेति सम्वन्धः। मण्डलशब्दस्य

---

४४ "कालाम्बुदप्रतीकाश"मिति पाठान्तरम् ।

४५ "विद्युत्कान्तश्रियायुतम्" इति पाठान्तरम् । विद्युत् - तडित्, तद्वत् कान्ता स्फुरन्ती या श्रीः तया युतं, युक्तमित्यर्थः। "विद्युत्कान्त्या" इति पाठे विद्युतः इव कान्तिः यस्याः तया युतमित्यर्थः।

त्रिलिङ्गत्वेऽप्यत्र पुल्लिङ्गस्यैव निर्देशः। कथंभूतं मण्डलम् ? अथर्वशिरसा - अथर्ववेदप्रसिद्धेन "देवा ह वै सुवर्गं लोकमगमयन्" इत्यादिना उपनिषद्विशेषेण, देवं - सदाशिवम् , तं स्तुवन्तमम्बुधिं च ददर्श । कीदृशम् ? गङ्गादिभिः तटिनीभिः - नदीभिः युक्तम् , नीलविग्रहं - शरीरविशेषधारिणमित्यर्थः ॥ ४१ ॥

श्वेताश्वतरमन्त्रेण स्तुवन्तं गिरिजापतिम् ।
अनन्तादिमहानागान् कैलासगिरिसन्निभान् ॥ ४२ ॥

श्वेतेति । श्वेताश्वतरोपनिषद्रूपेण मन्त्रेण गिरिजापतिं स्तुवन्तम् इत्यम्बुधेर्विशेषणम् । अनन्तो आदिर्येषां तान् , महानागान् - महतः सर्पान् , ददर्श ॥ ४२ ॥

कैवल्योपनिषत्पाठान् मणिरत्नविभूषितान्[४६] ।
सुवर्णवेत्रहस्ताढ्यं नन्दिनं पुरतः स्थितम् ॥ ४३ ॥

कैवल्योपनिषदिति । कैवल्योपनिषदं पठन्तीति कैवल्योपनिषत्पाठाः तान् । सुवर्णप्रचुरो वेत्रः सुवर्णवेत्रः, तत्सहितेन हस्तेन आढ्यं पुरतः स्थितं नन्दिनं च ददर्शेत्यन्वयः ॥ ४३ ॥

दक्षिणे मूषिकारूढं गणेशं पर्वतोपमम् ।
मयूरवाहनारूढमुत्तरे षण्मुखं तथा ॥ ४४ ॥

---

४६ "फणिरत्नविभूषितान्" इति पाठान्तरम् । "विद्युत्कान्तश्रियायुतम्" इति पाठान्तरम्। विद्युत् - तडित्, तद्वत् कान्ता स्फुरन्ती या श्रीः तया युतं, युक्तमित्यर्थः। "विद्युत्कान्त्या" इति पाठे विद्युतः इव कान्तिः यस्याः तया युतमित्यर्थः।

दक्षिण इति । दक्षिणभागे गणेशं ददर्श। कीदृशम् ? पर्वतोपमम्, मूषिके आरूढो मूषिकारूढः, तम् । मूषिकशब्दः इकारमध्यः न तु अकारमध्यः इति धातुवृत्त्यादिषु स्फुटम् । मयूर एव वाहनं मयूरवाहनं, तदारूढं षण्मुखमुत्तरे ददर्शेति सम्बन्धः ॥ ४४ ॥

महाकालं च चण्डीशं पार्श्वयोर्भीषणाकृतिम् ।
कालाग्निरुद्रं दूरस्थं ज्वलद्दावाग्निसन्निभम् ॥ ४५ ॥

त्रिपादं कुटिलाकारं नटद्भृङ्गिरिटं पुनः।
नानाविकारवदनान् कोटिशः प्रमथाधिपान् ॥ ४६ ॥

नानावाहनसंयुक्तं परितो मातृमण्डलम् ।
पञ्चाक्षरीजपासक्तान् सिद्धविद्याधरादिकान् ॥ ४७ ॥

त्रिपादमिति । नटतीति नटन् , तथाभूतश्चासौ भृङ्गिरिटश्च । गणशेषं ददर्श । नानेति । नानाविकाराणि वदनानि येषां तान् प्रमथाधिपान् ददर्श ॥ ४५ - ४७ ॥

दिव्यरुद्रकगीतानि गायत्किन्नरबृन्दकम् ।
तत्र त्रैयम्बकं मन्त्रं जपद्द्विजकदम्बकम् ॥ ४८ ॥

दिव्यरुद्रकगीतानीति । दिवि भवानि दिव्यानि, रुद्राय कायन्ते उच्चार्यन्त इति रुद्रकाणि, रुद्रप्रीत्यर्थं जपार्हाणीत्यर्थः। एवम्भूतानि गीतानि गायन्तीति गायत्किन्नरबृन्दकं ददर्श। 'गै शब्दे' घञर्थे कविधानमिति

कप्रत्ययः। त्रीण्यम्बकानि लोचनानि यस्य असौ त्र्यबकः, तस्येमं त्रैयम्बकं मन्त्रं जपन्तं, द्विजकदम्बकं - ब्राह्मणबृन्दञ्च ददर्श॥ ४८॥

गायन्तं वीणया गीतं नृत्यन्तं नारदं दिवि।
नृत्यतो नाट्यनृत्येन रम्भादीनप्सरोगणान् ॥४९॥

नृत्यत इति । अप्सरोगणान् ददर्श । नृत्तं कुर्वतः, तथा नाट्यं च नृत्यं च तयोस्समाहारो नाट्यनृत्यम्, तेनोपलक्षितान् । केचन नृत्तं कुर्वन्ति, अपरे तु नृत्यम्, अन्ये तु नाट्यं कुर्वन्तीत्यर्थः। कः पुनस्तेषां भेद इति चेत् - श्रृणु । वाक्यार्थाभिनयो नाट्यम्, पदार्थाभिनयो नृत्यम्, यत् सर्वाभिनयवर्जितं गात्रविक्षेपमात्रं शास्त्रोक्ताङ्गभङ्गरूपं तु नृत्तम् । स्पष्टं चैतत् वृत्तिषु । क्षीरस्वामी त्वाह - "नृत्तं विवाहाभ्युदयकादिविषयम् अङ्गविक्षेपमात्रम्, नाट्यं तु सर्वरसं पञ्चसन्धिचतुर्वृत्तिदशरूपकाश्रयं नटकर्मे"ति । विस्तरोऽन्यत्र॥ ४९॥

गायच्चित्ररथादीनां गन्धर्वाणां कदम्बकम् ।
कम्बलाश्वतरौ शम्भुकर्णकुण्डलतां गतौ ॥५०॥

गायन्तौ पन्नगौ गीतं कपालं कम्बलं तथा ।
एवं देवसभां दृष्ट्वा कृतार्थो रघुनन्दनः॥ ५१॥

हर्षगद्गदया वाचा स्तुवन् देवं महेश्वरम् ।
दिव्यनामसहस्रेण प्रणनाम पुनः पुनः॥ ५२॥

॥ इति श्रीपद्मपुराणे शिवगीतासूपनिषत्सु
ईश्वरप्रत्यक्षं नाम चतुर्थोऽध्यायः॥

गायन्ताविति। कपालं कम्बलं च, एतन्नामधेयौ पन्नगौ ददर्श॥ ५० - ५२॥

॥इति श्रीमद्विशुद्धाद्वैतसिद्धान्तप्रतिष्ठापनैकधुरन्धर
श्रीमच्छङ्करानन्दभारतीविरचते शिवगीताभाष्ये चतुर्थोऽध्यायः॥

पञ्चमोऽध्यायः

सूत उवाच -

अथ प्रादुरभूत्तत्र हिरण्मयरथो महान् ।
अनेकदिव्यरत्नांशु किम्मीरितदिगन्तरः ॥ १ ॥

अथेति । अथ - रामकृतमहेश्वरप्रणामानन्तरम् , तत्र - तस्यां देवसभायाम् । हिरण्यप्रचुरः हिरण्मयः, 'दाण्डिनायना'दि सूत्रे (पा.सू. ६-४-१७४) निपातनात्साधुः। हिरण्मयश्चासौ रथश्च, सः प्रादुरभूत् - पादुर्भूतः। कीदृशो रथः? अनेकदिव्यरत्नानामंशुभिः किरणैः किम्मीरितं चित्रवर्णकृतं दिगन्तरं येन तथाभूतः, "चित्रं किम्मीरकल्माषशबलैताश्च कर्बुरे" इत्यमरः। तत्करोतिण्यन्तात्कर्मणि क्तः ॥ १ ॥

नव्योपान्तिकपङ्काढ्य महाचक्रचतुष्टयः।
मुक्तातोरणसंयुक्तः श्वेतच्छत्रशतावृतः॥ २॥

नव्येति । नवितुं स्तोतुं योग्यः, नव्येन स्तुत्यर्हेण उपान्ते भवेन औपान्तिकेन पङ्केन कर्दमेन आढ्यं लिप्तं महतां चक्राणां चतुष्टयं यस्मिन् सः तथोक्तः। चक्रप्रान्तस्थः पङ्कोऽपि कस्तूर्यादितोऽतिसुरभितया परमेश्वरसन्निधानविशेषवत्तया च स्तुतियोग्य एवेत्यर्थः। 'णु स्तुतौ', "अर्हे कृत्यतृचश्च" (पा.सू. ३-३-१६९) इत्यर्हेऽर्थे अचो यत् । मुक्तामयेन तोरणेन बहिर्द्वारेण संयुक्तः ॥ २ ॥

शुद्धहेमखुरैराढ्य[४७] तुरङ्गगणसंयुतः।
मुक्तावितानविलसदूर्ध्वं दिव्यवृषध्वजः॥ ३॥

शुद्धेत्यादि। शुद्धं यद्धेम सुवर्णं तत्प्रचुराः खुराः तैराढ्या ये तुरङ्गगणास्तैस्संयुतः। अत्राढ्यशब्दस्य सम्बन्धिशब्दत्वेन सापेक्षत्वेऽपि समासः, उक्तं हि वाक्यपदीये "सम्बन्धिशब्दस्सापेक्षो नित्यं सर्वस्समस्यते। वाक्यवत् सा व्यपेक्षा हि वृत्तावपि न हीयते" इति। मुक्तेति । मुक्तावितानं - मौक्तिकनिर्मित उल्लोचः, "वितानमुल्लोच" इत्यमरः। तेन विलसन् तद्वद्वा विलसन् शोभमानं ऊर्ध्वं ऊर्ध्वभागे स्थितो दिव्यवृषो यस्मिन् । एवं भूतो ध्वजो यत्र रथे स तथोक्तः ॥३॥

मत्तवारणिकायुक्तः[४८] पञ्चतत्त्वोपशोभितः[४९]।
पारिजाततरूद्भूत पुष्पमालाभिरञ्चितः॥ ४॥

मत्तेति । मत्ताभिर्वारणिकाभिर्हस्तिनीभिर्युक्तः। "नवैकादश पञ्च त्रीण्यात्थ

---

४७ "शुद्धहेमखलीनाढ्ये"ति पाठान्तरम् । शुद्धं यद्धेम तप्तकाञ्चनम्, तेन निर्मितं यत् खलीनं - अश्वमुखनियामकश्शृङ्खलाविशेषः, तेन युक्तो यस्तुरङ्गगणः, तत्संयुत इत्यर्थः।

४८ "मदवारणसंयुक्तः" इति पाठान्तरम् । मदयुक्ताः ये वारणाः गजाः तैर्युक्त इत्यर्थः।

४९ "पञ्चतल्पोपशोभितः" इति पाठे विस्तृततल्पोपशोभित इत्यर्थः, पञ्चास्य इतिवत् । "पट्टतल्पोपशोभितः" इति पाठे पट्टमयं तल्पम् , तेन शोभित इत्यर्थः। "पञ्चकल्पोपशोभितः" इति पाठे पञ्चः विस्तृतः कल्पः विधिः रचनेति यावत्, विविधरचनोपशोभित इत्यर्थः। अथ वा पञ्चकल्पाः - पञ्चविधाः देवतरवः मन्दार-पारिजात-सन्तान-कल्पवृक्ष-हरिचन्दनाख्याः, तैरुपशोभित इत्यर्थः।

त्व"मिति भागवतोक्तेः (११-२२-१)। पञ्चतत्त्वैः - तदधिष्ठात्रीभिः देवताभिः, उपशोभितः। पारिजाततरूद्भूतानां पुष्पाणां मालया, अभिरञ्जितः - भूषितः। ण्यन्तात् क्तः ॥४॥

मृगनाभिसमुद्भूत कस्तूरीमदपङ्किलः।
कर्पूरागरुधूपोत्थ गन्धाकृष्टमधुव्रतः॥ ५॥

मृगस्य नाभौ समुद्भूतो यः कस्तूरीरूपो मदः तेन, मृगमदरूपकस्तूर्येति यावत् , पङ्किलः सञ्जातपङ्कः। कस्तूर्यपेक्षया उत्कर्षविशेषं सूचयितुं मृगनाभीति विशेषणोपादानम् ॥५॥

संवर्तघनघोषाढ्यो नानावाद्यसमन्वितः।
वीणावेणुस्वनासक्त[५०] किन्नरीगणसङ्कुलः॥ ६॥

संवर्तेति। प्रलयकालीनाः ये घनास्तद्वन्महाघोषाढ्यः। नानाविधानि यानि वाद्यानि तैस्समन्वितः। वीणादिस्वनासक्तेन किन्नरीगणेन सङ्कुलः॥ ६॥

एवं दृष्ट्वा रथश्रेष्ठं वृषादुत्तीर्य शङ्करः।
अम्बया सहितस्तत्र पटतल्पेऽविशत्तदा ॥७॥

एवमिति । तत्र - रथे, पटतल्पे - पटमये आस्तरणे, शङ्करः, अविशत् - उपविष्टः ॥७॥

---

५० "वीणावेणुसमायुक्ते"ति पाठान्तरम् ।

सुरनीरजनेत्रीणां श्वेतचामरचालनैः ।
दिव्यव्यजनवातैश्च प्रहृष्टो नीललोहितः॥ ८॥

सुरेति । "कण्ठे नीलः, अन्यत्र लोहितः इति नीललोहित" इति वेदभाष्यकारादयः[५१]॥८॥

क्वणत्कङ्कणनिध्वानैर्मञ्जु मञ्जीरशिञ्जितैः।
वीणावेणुस्वनैर्गीतैः पूर्णमासीज्जगत्रयम्[५२] ॥९॥

क्वणदिति। क्वणतां कङ्कणानां निध्वानैः प्रतिशब्दैः। तथा मञ्जुभिः मनोहरैः मञ्जीराणां शिञ्जितैश्शब्दैः। "पादाङ्गदं तुलाकोटिर्मञ्जीरो नूपुरोऽस्त्रियाम्" इत्यमरः। "भूषणानां तु शिञ्जित"मिति च । शिञ्जितमिति तालव्यादिः, न तु दन्त्यादिः। "योषेव शिङ्क्ते" (ऋ.सं. ६-७५-३) इत्यादिदर्शनात् । अत एव अदादिप्रकरणे शिञ्जधातुः पठित इति दिक् ॥९॥

शुकवाक्यकलारावैः[५३] श्वेतपारावतस्वनैः।
उन्निद्रभूषाफणिनां दर्शनादेव बर्हिणः॥ १०॥
ननृतुर्दर्शयन्तस्स्वांश्चन्द्रकान् कोटिसंख्यया ।

शुकेति । शुकवाक्यरूपा ये कलरवाः अव्यक्तमधुरशब्दाः तैः जगत्त्रयं

---

५१ "द्रापे अन्धसस्पते दरिद्रन्नीललोहित" (तै.सं. ४-५-१०) इति मन्त्रभाष्ये सायणाचार्यः।

५२ "पूर्णमास जगत्त्रयम्" इति पाठान्तरम् ।

५३ "शुककेकिकुलारावै"रिति पाठान्तरम् । शुककुलस्य केकिकुलस्य चारावैरित्यर्थः।

पूर्णमासेति प्राक्तनेनान्वयः। "ध्वनौ तु मधुरास्फुटे। कलः" इत्यमरः। उन्निद्रेति। उन्निद्राणां हर्षादुल्लसतां भूषाफणिनां दर्शनादेव हेतोः, बर्हिणो मयूराः कोटिसङ्ख्यया उपलक्षितान् स्वान् आत्मजान्, चन्द्र इव चन्द्रकास्तान् मेचकापरपर्यायान् मण्डलविशेषान् । "इवे प्रतिकृतौ" (पा.सू. ५-३-९६) इति कन् । "समौ चन्द्रकमेचकौ" इत्यमरः। दर्शयन्तस्सन्तो ननृतुः॥१०॥

प्रणमन्तं ततो राममुत्थाप्य वृषभध्वजः।
आनिनाय रथं दिव्यं प्रहृष्टेनान्तरात्मना ॥ ११ ॥

कमण्डलुजलैस्स्वच्छैः स्वयमाचम्य यत्नतः।
समाचाम्याथ पुरतः स्वाङ्के राममुपानयत् ॥ १२॥

कमण्डलुः कुण्डिका, "अस्त्री कमण्डलुः कुण्डी"त्यमरः। तस्मिन् स्थितैर्जलैः स्वयमाचम्य रामं चाचाम्य - आचमनं च कारयित्वा, "न कम्यमी"ति (ग.सू. १९१) मित्वनिषेधान्न ह्रस्वः। स्वस्य अङ्के - उत्सङ्ग सङ्गे, "उत्सङ्गचिह्नयोरङ्क" इत्यमरः। उपानयत् - उपनीतवान् ॥ १२॥

अथ दिव्यं धनुस्तस्मै ददौ तूणीरमक्षयम् ।
महापाशुपतं नाम दिव्यमस्त्रं ददौ ततः॥ १३॥

अथेति । अथ - स्वाङ्कोपवेशानन्तरम्, तस्मै - रामाय, दिव्यं धनुः, तथा अक्षयं तूणीरं - निषङ्गम्, महापाशुपतास्त्रं च ददौ ॥ १३॥

उक्तश्च तेन रामोऽपि सादरं चन्द्रमौलिना ॥ १४ ॥
जगन्नाशकरं रौद्रमुग्रमस्त्रमिदं नृप ।
अतो नेदं प्रयोक्तव्यं सामान्ये समरादिके ॥ १५ ॥

किमुक्तम् ? तदेव दर्शयति - जगदिति । रौद्रं - रुद्रदेवताकम् , अत एवोग्रम् - भीषणम् । सामान्यैस्साधारणैः अनतिप्रबलैस्सह समरः सामान्यसमरः, आदिशब्दात्प्रबलैरपि सह अल्पकलहः, तत्रेदं न प्रयोक्तव्यम् ॥ १४-१५ ॥

अन्यन्नास्ति प्रतीघातमेतस्य भुवनत्रये ।
तस्मात् प्राणात्यये राम ! प्रयोक्तव्यमुपस्थिते ।
अन्यदैतत्प्रयुक्तं चेज्जगत्संक्षयकृद्भवेत् ॥ १६ ॥

अन्यदिति । एतस्य - पाशुपतास्त्रस्य, प्रतिहन्ता नैवेति । प्रतीघातं - कुण्ठीभावसाधनम् । "उपसर्गस्य घञि-" (पा.सू.६-३-१२२) इति दीर्घः। अन्यत् - पाशुपतास्त्रभिन्नं, नास्ति । तस्मात् प्राणात्यये तव उपस्थिते - सम्भाविते सति, एतत्प्रयोक्तव्यम् । विपक्षे बाधकमाह - अन्यदेति । भवत्स्वार्थे, अन्यदा - बलवद्बाधकोपस्थितिकालभिन्ने काले, प्रयुक्तं तु एतत् - पाशुपतास्त्रं, जगत्संक्षयं करोतीति तथाभूतं भवेत् ॥ १६ ॥

अथाहूय सुरश्रेष्ठान् लोकपालान् महेश्वरः।
उवाच परमप्रीतः स्वं स्वमस्त्रं प्रयच्छत ।

राघवोऽयं च तैरस्त्रै[५४] रावणं निहनिष्यति ॥१७॥

अथेति । महानीश्वरो महेश्वरः, निरवधिकैश्वर्यशाली । अत एव सुरश्रेष्ठानाहूयोवाच । किमुवाच? तदेवाह - स्वं स्वमिति । हे देवाः! यूयं आत्मीयमात्मीयमस्त्रं, प्रयच्छत - दद्ध्वं, रामायेति शेषः। एतेन भवदीयमेवेष्टं सेत्स्यतीत्याह - राघव इति । तैः - भवद्भिर्दत्तैरस्त्रैः, अस्त्री सन्, अयं राघव एव रावणं निहनिष्यति ॥१७॥

ननु तद्धेतोरेवास्त्विति न्यायात्[५५] वयमेव स्वस्वास्त्रैः तं हनिष्याम इति चेत्तत्राह - तस्मा इति ।

तस्मै देवैरवध्यत्वमिति दत्तो वरो मया ॥१८॥
तस्माद्वानरतामेत्य भवन्तो युद्धदुर्मदाः।
साहाय्यमस्य कुर्वन्तु तेन स्वस्था भविष्यथ ॥१९॥

तस्मै - रावणाय, देवैरवध्यत्वमित्येवं रूपो वरो मया दत्तः, न त्वन्येन, अतो भवद्भिर्नासौ हन्तुं शक्य इत्यर्थः। "ननु रावणेन सह योद्धव्यमिति वयमप्याकाङ्क्षामः, तत्कथमस्मदिष्टं सिध्येत्" तत्राह - तस्मादिति । भवन्तोऽपि युद्धदुर्मदाः युद्धे सोत्कृष्टाश्चेत्तर्हि वानरतामेत्य अस्य रामस्य साहाय्यं कुर्वन्तु । रावणवधे एतस्यैव मया दत्ताधिकारत्वादिति भवः॥१८-१९॥

---

५४ "तैरस्त्री" इति पाठान्तरम् । तैः - नारायणैन्द्रास्त्रादिभिः, अस्त्री - अस्त्रवान् सन् रावणं निहनिष्यतीत्यर्थः। तैरस्त्रीति 'धान्येन धनवान्' इत्यादिवद् द्रष्टव्यम् ।

५५ "तद्धेतोरेव तद्धेतुत्वे मध्ये किं तेन" इति न्यायादित्यर्थः।

तदाज्ञां शिरसा गृह्य सुराः प्राञ्जलयस्तदा ।
प्रणम्य चरणौ शम्भोः स्वं स्वमस्त्रं ददुर्मुदा॥ २०॥

गृह्येति । गृहीत्वेत्यर्थः। छान्दसोऽयं प्रयोगः, आप्रश्लेषो वा ॥२०॥

नारायणास्त्रं दैत्यारिरैन्द्रमस्त्रं पुरन्दरः ।
ब्रह्माऽपि ब्रह्मदण्डास्त्रमाग्नेयास्त्रं धनञ्जयः॥ २१॥

याम्यं यमोऽपि मोहास्त्रं रक्षोराजस्तथा ददौ ।
वरुणो वारुणं प्रादाद्वायव्यास्त्रं प्रभञ्जनः॥ २२॥

धनञ्जयः - अग्निः, "वीतिहोत्रो धनञ्जयः" इत्यमरः। प्रभञ्जनः - बायुः॥२१ - २२॥

कौबेरं च कुबेरोऽपि रौद्रमीशान एव च ।
सौरमस्त्रं ददौ सूर्यः सौम्यं सोमश्च पावकम् ।
विश्वेदेवा ददुस्तस्मै वसवो वासवाभिधम् ॥२३॥

ईशानः - लोकपालविशेषः। पावकमिति । इदञ्चोत्तरेण विश्वेदेवा ददुरित्यनेन सम्वध्यते ॥२३॥

अथ तुष्टः प्रणम्येशं रामो दशरथात्मजः।
प्राञ्जलिः प्रयतो भूत्वा भक्तिनम्रो व्यजिज्ञपत् ॥२४॥

अथेति । पूर्वोक्तदिव्यास्त्रलाभानन्तरं व्यजिज्ञपत् - विज्ञापितवान् , लुङ् ॥२४॥

विज्ञापनां प्रकारमेवाह - भगवन्निति त्रिभिः।

श्रीराम उवाच -

भगवन् ! मानुषेणैव नोल्लङ्घ्यो लवणाम्बुधिः।
तत्र लङ्काभिधं दुर्गं दुर्जयं देवदानवैः ॥२५॥

मानुषेणैवेति । एवकारस्सर्वोपरि, मनुष्यैरित्यर्थः। नोल्लङ्घ्यः - लङ्घयितुं शक्यो नेत्यर्थः। किञ्च तत्र दुर्गमस्ति तदपि न दुर्गान्तरसाधारणं, किन्तु देवदानवैरपि दुर्जयम् ॥२५॥

अनेककोटयस्तत्र राक्षसा बलवत्तराः।
सर्वे स्वाध्यायनिरताः शिवभक्ता जितेन्द्रियाः॥ २६ ॥

ननु तत्रापि सङ्कराः, न मनुष्यादयः येन जयेरन्नित्याह - अनेकेति । ननु एकशब्दस्य नित्यैकवचनान्ततया नञ्समासस्य चोत्तरपदार्थप्राधान्यमिति महाभाष्यादौ व्यवस्थापितत्वेन अनेकशब्दोऽपि नित्यैकवचनान्तः। अत एव सूत्रकारः प्रायुङ्क्त "अनेकमन्यपदार्थे" (पा.सू. २-२-२४) इति । अत एव माघेऽपि - "सेव्यतेऽनेकया सन्नतापाङ्ग्ये"ति प्रयोगः। तत्कथं कोटयः इत्यनेन सामानाधिकरण्यमिति चेत् अनेकशब्दानामेव बहूनामेकशेषे तदुपपत्तेः। उक्तश्चैतत् कैयटीयमहाविवरणादौ । एतेन "पतन्त्यनेके जलधेरिवोर्मयः" इति माघोऽपि व्याख्यातः। स्यादेतत् , तथापि कोटिशब्दस्य बहुवचनान्तत्वमनुपपन्नम् , "विंशत्याद्यास्सदैकत्वे

सर्वास्सङ्ख्येयसङ्ख्ययोः। सङ्ख्यार्थे द्विबहुत्वे स्तः तासु चानवतेः स्त्रियः" इत्यमरसिंहेन सङ्ख्येयपरतायामेकवचनस्य नियमितत्वादिति चेन्न, एकां सङ्ख्याव्यक्तिमादाय एकवचनमेवेति तदर्थः। ननु सङ्ख्याव्यक्तिबहुत्वेऽपि एकवचनमिति, तथा च उदाहृतामरस्योत्तरार्धमप्येवं व्याख्येयम् । सङ्ख्यारूपो योऽर्थः तद्गतद्वित्ववहुत्वे सङ्ख्यापरतायां वोभयथापि द्विवचनबहुवचनप्रवर्तके भवत एवेति। अत एव पूर्वार्धे सङ्ख्याग्रहणस्यापि सार्थक्यम् । इदमेव अभिसन्धाय मुरारिः प्रायुङ्क्त - "एकद्वित्रिचतुःक्रमेण गणनामेषामिवास्तंयतां कुर्वाणास्समरोचयद्दशशतान्यम्भोजसंवर्तिकाः। भूयोऽपि क्रमशः प्रसारयति तास्सम्प्रत्यमूतुद्यतः सङ्ख्यातुं सकुतूहलेन नलिनी भानोस्सहस्रं करान् ॥" इति ॥२६॥

अनेकमायासंयुक्ता बुद्धिमन्तोऽग्निहोत्रिणः।
कथमेकाकिना जेया मया भ्रात्रा च संयुगे ॥२७॥

श्रीमहादेव उवाच -

रावणस्य वधे राम ! रक्षसामपि मारणे ।
विचारो न त्वया कार्यस्तस्य कालोऽयमागतः॥ २८॥

अधर्मे तु प्रवृत्तास्ते देवब्राह्मणपीडने ।
तस्मादायुः क्षयं याति तेषां श्रीरपि सुव्रत! ॥२९॥

राजस्त्रीलङ्घनासक्तं रावणं निहनिष्यसि ।
पानासक्तो रिपुर्जेतुं सुकरः सङ्गराङ्गणे ॥३०॥

मूलश्लोकार्थस्तु स्पष्टः। राजस्त्री - सीता। पानासक्तः - मदिरापानतत्परः ॥२७-३०॥

अधर्मनिरतश्शत्रुर्भाग्येनैव हि लभ्यते ॥३१॥

अधीतवेदशास्त्रोऽपि सदा धर्मरतोऽपि वा ।
विनाशकाले सम्प्राप्ते धर्ममार्गाच्च्युतो भवेत् ॥३२॥

पीड्यन्ते देवतास्सर्वाः सततं येन पापिना ।
ब्राह्मणा ऋषयश्चैव तस्य नाशस्स्वयं स्थितः॥ ३३॥

पीड्यन्त इति । येन देवब्राह्मणादयः पीड्यन्ते तस्य नाशः स्वयमेव भवति , प्रयत्नं विनैव, स्थितः - जातसङ्कल्प इत्यर्थः॥३१-३३॥

किष्किन्धानगरे राम ! देवानामंशसम्भवाः।
वानरा बहवो जाता दुर्जया बलवत्तराः॥ ३४॥

साहाय्यं ते करिष्यन्ति ते बद्ध्वा च पयोनिधिम् ।
अनेकशैलसम्बद्धे सेतौ यान्तु वलीमुखाः।
रावणं सगणं हत्वा तामानय निजां प्रियाम् ॥३५॥

किष्किन्धेति । किं किं दधातीति किष्किन्धा, अनेकाद्भुतवस्तुशालिनी इत्यवयवार्थः। योगरूढश्चायं शब्दः, पारस्करादिगणे निपातितः। किष्किन्धाख्ये नगरे बहवो वानरा जाताः। ते देवांशोद्भवाः, तव साहाय्यं करिष्यन्ति । तैरेव सहायभूतैः पयोनिधिं बद्ध्वा, ततः, अनेकेति ।

अनेकैश्शैलैः सम्यग्बद्धे सेतौ, वलीमुखाः - मर्कटाः, वली मुखे येषां त इति विग्रहः। "कपिप्लवङ्गप्लवगशाखामृगवलीमुखाः" इत्यमरः। यान्तु - गच्छन्तु ॥३४-३५॥

शस्त्रैर्युद्धे जयो यत्र तत्रास्त्राणि न योजयेत् ।
निरस्त्रेष्वल्पशस्त्रेषु पलायनपरेषु च ।
अस्त्राणि मुञ्चन् दिव्यानि स्वयमेव विनश्यति ॥३६॥

"दुर्बलेषु महास्त्रं न प्रयोक्तव्यम्" इति प्रागुक्तमेवार्थं स्मारयति - शस्त्रैरिति॥३६॥

चिन्ता न कार्येति समाश्वासयन्नुपसंहरति - अथवेति त्रिभिः।

अथवा किं बहूक्तेन मयैवोत्पादितं जगत् ।
मयैव पाल्यते नित्यं मया संह्रियतेऽपि च ॥३७॥

अहमेको जगन्मृत्युः मृत्योरपि महीपते ।
ग्रसेऽहमेव सकलं जगदेतच्चराचरम् ॥३८॥

मम वक्त्रगतास्सर्वे राक्षसा युद्धदुर्मदाः।
निमित्तमात्रं त्वं भूयाः कीर्तिमाप्स्यसि सङ्गरे ॥३९॥

॥इति श्रीपद्मपुराणे शिवगीतासूपनिषत्सु
दिव्यास्त्रप्राप्तिर्नाम पञ्चमोऽध्यायः॥

स्पष्टोऽर्थः। "अत्ता चराचरग्रहणात्" (ब्र.सू. १-२-९) इत्याद्यधिकरणेषु सिद्धमेतत् ॥३७-३९॥

॥ इति श्रीमद्विशुद्धाद्वैतसिद्धान्तप्रतिष्ठापनैकधुरन्धर
श्रीमच्छङ्करानन्दभारतीविरचिते शिवगीताभाष्ये पञ्चमोऽध्यायः॥

षष्ठोऽध्यायः

श्रीराम उवाच -

भगवन्नत्र मे चित्रं महदेतत् प्रजायते ।
शुद्धस्फटिकसङ्काशस्त्रिणेत्रः चन्द्रशेखरः ॥१॥

श्रीराम उवाच - भगवन्निति । हे भगवन् ! अत्र - सृष्टिस्थितिसंहाराणाम् अहमेव कर्तेत्येवं रूपे त्वदुक्तेऽर्थे, मे महच्चित्रं प्रजायते । "विस्मयोऽद्भुतमाश्चर्यं चित्रम्" इत्यमरः। आश्चर्यबीजमह - शुद्धेत्यादिना ॥१॥

मूर्तस्त्वं तु परिच्छिन्नाकृतिः पुरुषरूपधृक् ।
अम्बया सहितोऽत्रैव रमसे प्रमथैस्सह ॥२॥

मूर्त इति । मूर्तः - समुच्छ्रितः, महाभाग्यशालीति यावत् । मुर्च्छधातोः समुच्छ्रायवाचकात्कर्तरि क्तः। "राल्लोपः" (पा.सू. ६-४-२१) इति छलोपः, "र्वोरुपधायाः" (पा.सू. ८-२-७६) इति दीर्घः। "आदितश्च" (पा.सू. ७-२-१६) इति नेट् । परिच्छिन्ना आकृतिः शरीरं यस्य सः। पुरुषरूपधारी च त्वं पार्वत्या सहितस्सन् अत्रैव रमसे । पुरुषरूपेण धृष्णाति प्रगल्भत इति पुरुषरूपधृक् । 'ञि धृषा प्रागल्भ्ये', क्विप्रत्ययः, यस्मादिति बहुव्रीह्याश्रयणात् दृगिति च निपातनात्कुत्वम् । तथा च धृषा धृषणा इत्यादिरूपं बोध्यम् । 'धृज-गतौ' भ्वादिः, तस्मात् धर्जतीति धृक् इति क्विपि धृजौ धृज इत्यादिवोध्यम् । पुरुषरूपं गच्छतीति प्राप्नोतीति च अस्मिन् पक्षे अर्थः ॥२॥

तत्कथं पञ्चभूतादि जगदेतच्चराचरम् ।
तद्ब्रूहि गिरिजाकान्त! मयि तेऽनुग्रहो यदि ॥३॥

तत्कथमिति । एवम्भूतं पञ्चभूतान्यादिर्यस्य तथाभूतम् , चराचरं कृत्स्नं जगत्, कथम् ? करोषि, पालयसि, हिंससि वा इति शेषः। सर्वात्मकत्वे तु नाक्षिप्यते । तस्मात् पूर्वाध्यायशेषेण अवतारणात् तथाव्याख्यायां सप्तमाध्यायप्रथमभागेन सह विरोधाच्च, तत्र हीत्थं वक्ष्यति - "भगवन् ! यन्मया पृष्टं तत्तथैव स्थितं विभो । परिच्छिन्नपरीमाणे देहे भगवतस्तव। उत्पत्तिः पञ्चभूतानां स्थितिर्वा विलयः कथम्" (७-१) इति। तथा च पूर्वपक्षस्यायमाशयः। कुलालादौ घटकर्तरि देशान्तरकार्योत्पादनसामर्थ्यं क्वापि न दृष्टम् । अतः त्वयापि विप्रकृष्टं कथं जनयेत् । किञ्च शरीरिणः कर्तृत्वं बाधितम् । अतः शरीरे तद्वत्संयोगादिषु च कर्तृत्वासम्भवात्। अपि च भोगासक्तस्य क्व क्षित्यादिजनकत्वम् ? एवं पालकत्वे च अनुपपत्तिरिति ॥३॥

श्रीभगवानुवाच -

शृणु राम ! महाभाग दुर्ज्ञेयममरैरपि।
तत्प्रवक्ष्यामि यत्नेन[५६] ब्रह्मचर्येण सुव्रत ।
पारं यास्यस्यनायासाद्येन संसारनीरधेः॥ ४॥

शृणु रामेति । हे सुव्रत राम ! यत्नेन ब्रह्मचर्येण च शृणु , यतो दुर्ज्ञेयं प्रवक्ष्यामि । येन ज्ञानेन सता अनायासात् संसारसागरस्य पारं यास्यसीति सम्बन्धः ॥४॥

---

५६ "तत्प्रवक्ष्यामि ते भक्त्या" इति पाठान्तरम् । तव भक्त्या तुष्टस्सन् प्रवक्ष्यामीत्यर्थः।

दृश्यन्ते पञ्चभूतानि ये च लोकाश्चतुर्दश ।
समुद्राः पर्वता देवा राक्षसा ऋषयस्तथा ॥५॥

दृश्यन्ते यानि चान्यानि स्थावराणि चराणि च ।
गन्धर्वाः प्रमथा नागास्सर्वे ते मद्विभूतयः॥ ६॥

ननु कुलालादेर्घटादिकर्तृत्वं अहङ्कारोपाधिकं शरीरादिसापेक्षं च, अतो व्यवहितविप्रकृष्टादेः कर्ता कुलालादिर्न भवतीति युक्तम् । मम जगत्कर्तृत्वं तु नाहङ्कारवृत्तिसापेक्षम् , किन्तु स्वरूपज्ञानेनैव कल्पितभेदेन निर्वाह्यते, मायावृत्त्या वा , उभयथापि शरीरापेक्षा तत्र नास्ति । तथा च कर्तृभूतस्य मायोपहितविम्वचैतन्यात्मनो मम सकलप्रपञ्चेन सह व्यवधानमेव । उपादानमपि चैतन्यं वा मायासमुदितं वेति पक्षेऽपि न तेन सह प्रपञ्चस्य विप्रकर्षोऽस्ति । लीलाविग्रहस्य तु परिच्छिन्नत्वेपि कर्तृत्वांशेऽनुपयोगान्न कश्चिद्दोष इत्यभिसन्धाय सर्वप्रपञ्चो मद्वृत्तिमात्रमित्याह - दृश्यन्त इत्यादिना । पञ्चभूतानि समुद्रा इत्यादीनि यानि यानि वस्तूनि दृश्यन्ते सर्वेऽपि ते पदार्था मद्विभूतय एव न तु स्वतन्त्रा इति॥५-६॥

इममेवार्थं प्राक्तनकथोपन्यासेन दृढयति - पुरेति ।

पुरा ब्रह्मादयो देवा द्रष्टुकामा ममाकृतिम् ।
मन्दरं प्रययुस्सर्वे मम प्रियतरं गिरिम् ॥७॥
स्तुत्वा प्राञ्जलयो देवाः मां तथा पुरतस्स्थिताः॥ ८॥

आकृतिमिति । लीलाविग्रहविशेषमित्यर्थः। स्तुत्वेति । मां स्तुत्वा

प्राञ्जलयः सन्तः तथैव पुरतः स्थिताः। लीलाविग्रह एव परमार्थभूत इति बुद्ध्या परिच्छिन्नस्यैव ध्याने आसक्ता इत्यर्थः ॥ ७-८ ॥

तान् दृष्ट्वाऽथ मया देवान् लीलाकुलितचेतसः [५७]।
तेषामपहृतं ज्ञानं ब्रह्मादीनां दिवौकसाम् ॥ ९ ॥
आसंस्तेऽसकृदज्ञानान्मा [५८] माहुः को भवानिति ॥ १० ॥

तानिति । लीलाकुलितं लीलाविग्रहमात्रे परिनिष्ठितं चेतो येषां तथाभूतान् देवान् दृष्ट्वा मया तेषां ज्ञानं सगुणे पारमार्थिकमुत्कृष्टं चेदमिति ज्ञानमपहृतम् । प्रश्नावतारणपूर्वकं परमतत्त्वमुपदिश्य संसाराब्धेः तानुद्धरिष्यामीत्याशयेन प्रश्नप्रयोजकीभूतं संशयादि मया तेषां सम्पादितमिति भावः। आसन्निति । ते - देवाः, अज्ञानात् - अज्ञानं प्राप्य, ल्यब्लोपे कर्मणि, आसन् - अतिष्ठन् । 'अस भुवि' धातोर्लङ्। 'भवान् कः?' इति असकृदाहुश्च - पप्रच्छुरित्यर्थः। भूते लङ्प्रतिरूपको निपातोऽयम् ॥ ९-१० ॥

अथाब्रुवमहं देवानहमेव पुरातनः।
आसं प्रथममेवाहं वर्तामि च सुरेश्वराः।
भविष्यामि च लोकेऽस्मिन् मत्तो नान्योऽस्ति कश्चन ॥ ११ ॥

---

५७ "लीलाकुलितचेतसा" इति पाठान्तरम् । लीलया मन्मायया आकुलितानि उत्कण्ठितानि देवानां चेतांसि यस्मात् तेन मया ।

५८ "आसंस्तेऽसकृदज्ञानाः" इति पाठे अज्ञानाः अपहृतज्ञाना आसन्नित्यर्थः। "अथ तेऽपहृतज्ञानाः" इति पाठान्तरम् ।

अथ - प्रश्नानन्तरम् , अहं देवान् , अब्रुवम् - उक्तवान् । पुराभवः पुरातनोऽहमेव। ननु "षडस्माकमनादयः"[५९] इति शास्त्रकाराणामुद्धोषः। तथा च "अहमेव पुरातनः" इत्यवधारणमसङ्गतमित्याशङ्क्य प्रागुक्तमेव सोपपत्तिकमाह - आसमिति । प्रथमं अहमेव आसम् , वर्तामि च - इदानीं वर्ते । अहमेव भविष्यामि - स्थास्यामीत्यर्थः। मत्तोऽन्यः अविद्यातत्सम्बन्धी, कश्चन - कोऽपि, नास्ति, सन्नपि पारमार्थिको नेत्यर्थः। तथा च मिथ्याभूतानामविद्यादीनामधिष्ठाने त्रैकालिकनिषेधस्य सत्वात् अहमेवेत्यवधारणबलेन प्रतीयमान इतरव्यवच्छेदो नासङ्गत इत्यर्थः। अत्र 'वर्ते' इति वक्तव्ये परस्मैपदप्रयोगः आर्षः, श्रुतिस्थस्यानुकरणं वा । तथा च श्रुतिः " ते देवा रुद्रमपृच्छन् को भवानिति सोऽब्रवीदहमेकः प्रथममासं वर्तामि च भविष्यामि चे"त्यादिः ॥ ११ ॥

व्यतिरिक्तं च मत्तोऽस्ति नान्यत्किञ्चित् सुरेश्वराः।
नित्योऽनित्योऽहमनघो ब्रह्मणां ब्रह्मणस्पतिः[६०] ॥ १२ ॥

व्यतिरिक्तं चेति । पूर्वमुक्तोऽप्यर्थोऽत्र पुनरभ्यस्यते तात्पर्यनिर्णयाय। अभ्यासो हि तात्पर्यलिङ्गम्[६१] । तथा च छान्दोग्ये (६-८-७)

---

५९ "जीव ईशो विशुद्धा चित् तथा जीवेशयोर्भिदा । अविद्या तच्चितोर्योगः षडस्माकमनादयः ॥"

६० "ब्रह्माहं ब्रह्मणस्पतिः" इति पाठान्तरम् । ब्रह्म अहमिति छेदः। ब्रह्म - वृहत्, देशकालवस्तुपरिच्छेदशून्यः अहमित्यर्थः।

६१ उपक्रमोपसंहारावभ्यासोऽपूर्वता फलम् । अर्थवादोपपत्ती च लिङ्गं तात्पर्यनिर्णये॥

"तत्त्वमसी"ति नवकृत्वोऽभ्यस्तम् । उक्तञ्च भामत्यां[६२] "अभ्यासे हि भूयस्त्वं अर्थस्य भवति, यथाऽहो दर्शनीयाहो दर्शनीयेति न न्यूनत्वम्, प्रागेवोपचरितत्व"मिति । हे सुरेश्वराः! अन्यदपि अविद्यादिभ्योऽनादिभ्यो भिन्नमपि घटपटादिकं यत्किञ्चिद् दृश्यते तन्मत्तो व्यतिरिक्तं नास्ति । किन्तु मय्यध्यस्तत्वादात्मभावापन्नमेवेत्यर्थः। तादात्म्यं च 'घटस्सन्' इत्यादिसामानाधिकरण्यप्रतीतिनिर्वाहकः कश्चिदाविद्यको धर्मः। न चैवमनन्तपदार्थस्वीकारगौरवम् । व्यतिरिक्ततायाः वैशेषिकादेरपि दुर्वचत्वात् । विभाजकोपाधीयत्ताऽस्मत्सिद्धान्तेऽपि सुलभा । अविद्याजडत्वाभ्यां विभजनात् । उक्तं सार्वतादात्म्यमेव विवृणोति - नित्येति। नित्योऽहं स्वरूपेण । अनित्योऽहम्, घटाद्यनित्यतादात्म्यात् । ब्रह्मणां - वेदानाम्, ब्रह्मणः - हिरण्यगर्भस्य च, पतिः - नियन्ता, ईषद्भेदस्यापि सत्वात्॥ १२॥

दक्षिणाञ्च उदञ्चोऽहं प्राञ्चः प्रत्यञ्च एव च ।
अधश्चोर्ध्वं च विदिशो दिशश्चाहं सुरेश्वराः॥ १३॥

दक्षिणाञ्चेति । दक्षिणस्यामञ्चतीति दक्षिणाञ्चः। दक्षिणदिक्स्थाः पदार्थाः। उत्तरस्यामञ्चतीत्युदञ्चः। प्र पूर्वस्यामञ्चतीति प्राञ्चः। प्रति पश्चिमायाम् अञ्चतीति प्रत्यञ्चः। अधः - अधरस्यामित्यर्थः। "पूर्वाधरावराणामसि पुरधवश्चैषाम्" (पा.सू. ५-३-३९) इति साधुः। विदिशः - दिशोर्मध्यम्, दक्षिणपूर्वादि॥ १३॥

सावित्री चापि गायत्री स्त्री पुमानपुमानपि ।

---

६२ भामत्याम् अध्यासभाष्यव्याख्यानावसरे उक्तम् ।

त्रिष्टुब्जगत्यनुष्टुप् च पङ्क्तिश्छन्दस्त्रयीमयः॥ १४॥

सावित्रीति । सविता देवता यस्यां सावित्री । गायत्रीति । गायन्तं जपकर्तारं त्रायत इति गायत्री । तदाह व्यासः - "गायत्री प्रोच्यते तस्माद्गायन्तं त्रायते यतः। सवितृद्योतनात्सैव सावित्री परिकीर्तिता॥" इति । एकस्या एव गायत्र्याः कालभेदान्नामभेदः। तथा च व्यासः "गायत्री नाम पूर्वाह्णे सावित्री मध्यमे दिने" इति । अपुमानिति - नपुंसकमित्यर्थः। त्रिष्टुबिति - यस्या एकादशाक्षरः पादः। जगतीति यस्याः द्वादशाक्षरः पादः। अनुष्टुबिति । यस्या अष्टाक्षरः पादः। पङ्क्तिश्छन्द इति । पञ्चानां सङ्घः पञ्चत् , द्वौ पञ्चताविति पङ्क्तिः। "पङ्क्तिविंशती"त्यादिपाणिनिसूत्रे (५-१-५९) निपातनात् साधुः। दशाक्षरघटितपादशालित्वात् पङ्क्तिश्छन्द इत्युच्यते॥ १४॥

सत्योऽहं सर्वत[६३]श्शान्तः त्रेताग्निर्गौरवं गुरुः।
[६४]गौर्यहं गह्वरं चाहं द्यौरहं जगतां विभुः॥ १५॥

सत्येति। गुरोः कर्म गौरवम् , अध्यापनादीति ॥ १५॥

ज्येष्ठस्सर्वसुरश्रेष्ठो वर्षिष्ठोऽहमपां पतिः।

---

६३ "सत्त्योऽहं सर्वगः" इति पाठान्तरम्। सत् - पृथिव्यप्तेजांसि, त्यत् - वाय्वाकाशौ, सच्च त्यच्च सत्त्यम् - भूतपञ्चकम् , तत्स्वरूपोऽहमित्यर्थः। सर्वगः - सर्वं गच्छति प्राप्नोतीति सर्वगः, सर्वसम्बद्ध इत्यर्थः।

६४ "गौरह"मिति पाठान्तरम्। गौः - वाक्। गह्वरम् - गुहा।

.क्षरः सर्वाणि भूतानि दान्तिश्शान्तिरहं खगः॥२०॥

गुह्योऽहं सर्ववेदेषु अरण्योऽहमजोऽप्यहम् ।
पुष्करञ्च पवित्रञ्च मध्यं चाहं ततः परः॥२१॥

बहिश्चाहं तथा चान्तः पुरस्तादहमव्ययः।
ज्योतिश्चाहं तमश्चाहं तन्मात्राणीन्द्रियाण्यहम् ॥२२॥

दत्तो दत्तमिति । दत्तः - दानकर्मीभूतो गवादिः, दत्तं - दानम्, लोकः - इहलोक इत्यर्थः। बहिश्चाहमित्यादि । यद्यपि दक्षिणाञ्च इत्यादिना स्फुटं पुनरुक्तम्, तथापि प्रागुक्तरीत्या 'तत्त्वमसी'ति (छा. ६-८-७) नवकृत्वोऽभ्यासवदेव नेयम् । तथा चाहुर्भाष्यकाराः पूर्वमीमांसायां - "न पुनरुक्तता महान् दोषः" इति। एतदेवास्मिन् प्रकरणे प्रतीयमानेषु सर्वेषु पौनरुक्त्येषु समाधानं मन्तव्यम् । इयं च सिद्धस्य गतिरुच्यते, अतो नातिप्रसङ्ग आपादनीयः। अत एव वाजसनेयिनां उषस्तकहोलब्राह्मणयोः पठ्यमानं "यत्साक्षादपरोक्षाद्ब्रह्म य आत्मा सर्वान्तर" (बृ.उ. ३-४-१) इति वाक्यं व्याकुर्वद्भिर्भाष्यकारादिभिरित्थमेव निर्णीतम् । तथा च व्याससूत्रमपि "अन्तरा भूतग्रामवत्स्वात्मनः" (ब्र.सू. ३-३-३५), "अन्यथा भेदानुपपत्तिरिति चेन्नोपदेशान्तरवत्" (ब्र.सू. ३-३-३६) इति । तन्मात्राणीति - अपञ्चीकृतपञ्चभूतानीत्यर्थः॥२१-२२॥

बुद्धिश्चाहमहङ्कारो विषयाण्यहमेव हि ।
ब्रह्मा विष्णुर्महेशोऽहमुमा स्कन्दो विनायकः॥२३॥

विषयाणि - विषयत्वेन ख्यायमानवस्तूनि । यद्यपि विषयशब्दो नित्यपुल्लिङ्गः, तथापि 'तदाचष्ट' इति णिजन्तात्कर्मणि एरचि समाधेयम् । एरजण्यन्तानामित्यस्य भाष्यकारैरनादृतत्वात् । न चैवमप्यजन्तत्वात् पुंस्त्वापत्तिः। भावे "घञजपाः पुंसि" (लिं.सू. ३६-३७) इति सिद्धान्तात् । इह च कर्मार्थस्य दर्शितत्वात् । एतच्च "सम्बन्धमनुवर्तिष्यत" इति महाभाष्यव्याख्यानावसरे कैयटादिभिः स्फुटीकृतमिति दिक् ॥ २३ ॥

इन्द्रोऽग्निश्च यमश्चाहं निरृतिर्वरुणोऽनिलः।
कुबेरोऽहं तथेशानो भूर्भुवस्स्वर्महर्जनः ॥ २४ ॥

तपस्सत्यं च पृथिवी चापस्तेजोऽनिलो ह्यहम् ।
आकाशोऽहं रविस्सोमो नक्षत्राणि ग्रहाण्यहम् ॥ २५ ॥

ग्रहाणीति - ग्रह इत्याख्यायमानानि वस्तूनीत्यर्थः ॥ २४-२५ ॥

प्राणः कालस्तथा मृत्युरमृतं भूतमप्यहम् ।
भव्यं भविष्यत् कृत्स्नं च[६९] विश्वं सर्वात्मकोऽप्यहम् ॥ २६ ॥

ओमादौ च तथा मध्ये भूर्भुवस्स्वस्तथैव च ।
ततः परं पठ्यते यद्गायत्र्यपि तथैव च ।
ततोऽहं विश्वरूपोऽस्मि शीर्षं च जपतां सदा[७०] ॥ २७ ॥

---

६९ "भव्यं भविष्यत् कृत्यं च" इति पाठान्तरम् । अतीतं वर्तमानम् उत्पत्स्यमानं च यत्कार्यं तदहमित्यर्थः।

७० "जनदों तथा" इति पाठान्तरम् ।

ओमादाविति । जपताम् - गायत्रीजपं कुर्वताम् , मुनीनां मध्ये इति शेषः। आदौ - उपझे भान ओंकारः अहमेव । मध्ये पठ्यमानं भूर्भुवस्सुवरित्येतदप्यहमेव । ततः तदनन्तरं यत्पठ्यते गायत्रीशब्दवाच्यं तदपि, तथैव - अहमेवेत्यर्थः। शीर्षं चेति - ओमाप इत्यादि अहमेव। ततोऽहम् , विश्वं रूपयति स्वरूपात्मकतया स्फूर्त्या भासयतीति विश्वरूपः। तथा च सर्वात्मकतादार्ढ्यमेव असाधारणस्वशब्देन कतिपयपदार्थतादात्म्यं प्रतिपाद्यत इत्यर्थः॥ २६-२७॥

अशितं पाचितं चाहं कृतं चाकृतमप्यहम् ।
परं चैवापरं चाहमहं सर्वपरायणः॥ २८॥

अहं जगद्धितं दिव्यमक्षरं सूक्ष्ममव्ययम् [७१] ।
प्राजापत्यं पवित्रं च सौम्यमग्राह्यमग्रियम् [७२] ॥२९॥

अक्षरमिति । न क्षरतीत्यक्षरम् , अश्नुते व्याप्नोतीति वा अक्षरम्। तदुक्तं महाभाष्ये (झभञ्सूत्रे) "अक्षरं न क्षरं विद्यादश्नोतेर्वा सरोऽक्षरम्" इति। तथा च व्याससूत्रेऽपि "अक्षरमम्बरान्तधृतेः" (ब्र.सू. १-३-१०) इत्यस्मिन् 'एतस्य वा अक्षरस्य' (बृ.उ. ३-८-९) इतिश्रुतिस्थमक्षरपदं ब्रह्मपरतया निर्णीतम्। प्राजापत्यमिति। प्राजपत्यं - प्रजापतिदेवताकम् , तथा सौम्यं - सोमदेवताकम् , अग्राह्यं - दुरवगाहार्थम् , अग्रे भवमग्रियं - श्रेष्ठतमम्, ईदृग्गुणोपेतम् । पवित्रं - पूयतेऽनेनेति व्युत्पत्त्या पापक्षयकरं सूक्तम् ।

---

७१ "सूक्ष्ममप्यहम्" इति पाठान्तरम् ।

७२ "प्राजापत्यं च सौरं च सौम्यमग्राह्यमग्रिमम्" इति पाठान्तरम् । अग्रिमम् - श्रेष्ठमित्यर्थः।

तत्र प्राजापत्यं 'हिरण्यगर्भ' इत्यादिप्रसिद्धम् , सौम्यं - ऋग्वेदसंहितायां नवमं मण्डलम् , तत्सर्वमहमेवेत्यन्वयः। अत्र प्राजापत्यशब्दे "दित्यदित्यादित्यपत्युत्तरपदाण्ण्यः" (पा.सू. ४-१-८५); सौम्यशब्दे "सोमाट्ट्यण्" (पा.सू. ४-२-३०); अग्रियशब्दे "अग्राद्यत्" (पा.सू. ४-४-११६) "घच्छौ च" (पा.सू. ४-४-११७) इति; पवित्रशब्दे "पुवस्संज्ञायाम्" (पा.सू. ३-२-१८५) इति त्रप्रत्ययः ॥ २८-२९ ॥

अहमेवोपसंहर्ता महाग्रासौजसांनिधिः[७३]।
हृदयं देवतात्वेन[७४] प्राणत्वेन प्रतिष्ठितः ॥ ३० ॥

महान्तो सागराः, ग्रस्यन्त इति ग्रासाः, भक्ष्याः येषां तानि महाग्रासानि, तादृशानि च तानि ओजांसि च प्रलयानलादीनि, तेषां निधिः - अधिष्ठानम् । उपसंहर्ता - संहारकश्चाहमेव । हृदयं - सर्वप्राणिनाम् अन्तःकरणम्, तत्र देवतात्वप्राणत्वाभ्यां प्रतिष्ठितश्चाहमेव ॥ ३० ॥

शिरश्चोत्तरतो यस्य पादौ दक्षिणतस्तथा ।
यस्य सर्वोऽन्तर[७५]स्साक्षादोङ्कारोऽहं त्रिमात्रकः ॥ ३१ ॥

विराड्रूपोऽप्यहमेव, प्रणवात्मकश्चेत्याह - शिरश्चेति । यस्य मम, उत्तरतः - उत्तरस्यां दिशि वर्तमानास्सर्वे पदार्थाश्शिरः, तथा दक्षिणतः -

---

७३ "महाग्रासो जगन्निधिः" इति पाठान्तरम् ।

७४ "हृदये देवतात्वेन" इति पाठान्तरम् । हृदये - हृदयकमले देवतात्वेन प्रतिष्ठितश्चाहमेवेत्यर्थः।

७५ "यश्च सर्वोत्तरः" इति पाठान्तरम् ।

दक्षिणदिक्स्थाः पदार्थाः सर्वे, पादौ - चरणौ । यस्य अवशिष्टः सर्वोऽपि प्रपञ्चः अन्तरः - मध्यभागः, सोऽहं साक्षात् ओङ्कारः। कीदृशः ओङ्कारः? तिस्रो मात्रा यस्य सः त्रिमात्रकः। पूर्वं 'शिरः चरणौ मध्यं' चेति सकलप्रपञ्चस्य त्रेधा कल्पनं कृतम् , तत्रैव त्रितये मात्रात्रितयमिति बुद्धिं कृत्वा प्रणवाभेदेनाहमुपास्यः इत्यर्थः॥ ३१॥

ऊर्ध्वमुन्नाययेे यस्मादधश्चापनयाम्यथ [७६] ।
तस्मादोंकार एवाहमेको नित्यस्सनातनः॥ ३२॥

ओंकारे अकारस्य उकारस्य च कल्पनया अक्षरसाम्येनार्थं निर्वक्ति - ऊर्ध्वमिति । स्वर्गादिकं प्रति उन्नायये - नयामि, यस्मादेवं तस्मादुकारः। अत्र ह्रस्वदीर्घयोरुवर्णयोः सवर्णदीर्घो बोध्यः। अथ - पुण्ये क्षीणे सति, अधः अपनयामि च, यस्मादेवं तस्मादकारः। अत्र ह्रस्वयोरेव द्वयोरवर्णयोः सवर्णदीर्घः। तथा चाकारादूकारे "आद्गुणः" (पा.सू. ६-१-८७) इत्योकारः। एवं रूपस्सन् नम्यते गम्यते इति ओं। इदं चाक्षरसाम्येन निर्वचनं वैयाकरणानामपि सम्मतम् । तथा च कात्यायनः "नाम च धातुजमाह निरुक्ते व्याकरणे शकटस्य च तोक"मित्यादि। निरुक्तकारश्चाह "अप्यक्षरसाम्यान्निर्ब्रूया"दिति। त्रिमात्रत्वं च प्रातिशाख्यादौ वैकल्पिकतयोक्तमिति दिक्॥ ३२॥

तदेवमोङ्कारं निर्वचनपूर्वकं स्वस्मिन् योजयति, एवमन्येऽपि योज्या इत्याशयेन कतिपयानां निर्वचनं प्रदर्शयति - ऋच इति ।

---

७६ "अधश्चपनयाम्यहम्" इति पाठान्तरम् ।

ऋचो यजूंषि सामानि यो ब्रह्मा यज्ञकर्मणि।
प्रणामये ब्राह्मणेभ्यस्तेनाहं प्रणवो मतः॥ ३३॥

सोऽहं तेन हेतुना प्रणवो मतः, स कः? योऽहं ब्रह्माख्यऋत्विग्विशेषस्सन्, यज्ञकर्मणि ब्राह्मणेभ्यः - होतृप्रभृतिभ्यः, यथायोग्यं ऋचः यजूंषि सामानि च, प्रणामये - प्रणतानि उपस्थितानि कुर्वे। यज्ञे हि हौत्रं ऋक्साध्यम् , आध्वर्यवं यजुस्साध्यम् , औद्गात्रं सामसाध्यम् , ब्रह्मा अध्वर्युहोतृ प्रभृतिभ्यः तत्तत्कालापेक्षितान् ऋगादीनुपस्थापयति । इदञ्च ऋग्वेदे अष्टमाष्टके "ऋचां त्वः पोषमास्ते" (ऋ.सं. १०-७१-११) इत्यस्या ऋचो व्याख्यायां वेदभाष्यादौ स्फुटम् । 'णू स्तवने' तुदादिः। 'णु स्तुता'वित्यदादिः। प्रणुवति प्राणौति वा प्रणवः - प्रस्तावक इत्यर्थः, पचाद्यच् ॥ ३३॥

स्नेहो यथा मांसखण्डं[७७] व्याप्नोति व्यापयत्यपि ।
सर्वलोकानहं तद्वत्सर्वव्यापी ततोऽस्म्यहम् ॥ ३४॥

स्नेह इति । स्नेहः - घृतादिद्रव्यम् , मांसखण्डं कर्म , व्याप्नोति - रसात्मना धातुरूपेण परिणम्य मांसं प्रति परिणामी सन् अनुगच्छति, तथा व्यापयति च मांसस्याप्यभिवृद्धेः, तद्वदहमपि सर्वलोकान् अधिष्ठानत्वेन अनुस्यूतस्सन् व्याप्नोमि, तांश्च व्यापयामि - स्थूलावस्थापन्नान् करोमि, ततो हेतोः सर्वं व्याप्नोति व्यापयतीति व्युत्पत्त्या सर्वव्यापी अस्मि ॥ ३४॥

---

७७ "मांसपिण्ड"मिति पाठान्तरम् ।

ब्रह्मा हरिश्च भगवानाद्यन्तं नोपलब्धवान् ।
ततोऽन्ये च सुरा यस्मादनन्तोऽहमतो मतः ॥ ३५ ॥

आदिश्च अन्तश्च तयोः समाहारः आद्यन्तम् , ब्रह्मादयोऽपि नोपलब्धवन्तः, अतोऽहं अन्ताभावात् अनन्तः ॥ ३५ ॥

गर्भजन्मजरामृत्यु संसारभयसागरात् ।
तारयामि यतो भक्तं तस्मात्तारोऽहमीरितः ॥ ३६ ॥

चतुर्विधेषु देहेषु जीवत्वेन वसाम्यहम् ।
सूक्ष्मो भूत्वाऽथ हृद्देशे ततस्सूक्ष्मः प्रकीर्तितः ॥ ३७ ॥

तारयतीति तारः, तरतेर्ण्यन्तात्पचाद्यच् । चतुर्विधेषु जरायुजाण्डज स्वेदजोद्भिज्जेषु अहं जीवो भूत्वा वसामि हृद्देशे । सूक्ष्मो भूत्वेति । सूक्ष्मवतोऽपि सूक्ष्मत्वात् । स्वभावतः सूक्ष्मत्वाभावेऽप्यन्तःकरणौपाधिकं सूक्ष्मत्वमस्तीत्यर्थः । "एषोऽणुरात्मा चेतसा वेदितव्यः" (मुण्ड.उ. ३-१-९) इत्यादिश्रुतयोऽपि औपाधिकाणुत्वपरा इति स्फुटीकृतं भवति । एतेन स्वाभाविकमणुत्वं जीवस्येति वदन्तः पाञ्चारात्रागमोपजीविनः परास्ताः। स्वभावतोऽणुत्वे अणुना प्रकाशेन सहात्यन्ताभेदे तैरेव स्वीकृतस्य व्याघातापत्तेः। विरुद्धधर्मोऽपीश्वरे शक्तिबलेन स्वीक्रियत इति तु जीवे ब्रह्मभेदस्य तदभिमतस्य व्याघातापादकत्वादुपेक्ष्यमित्यन्यत्र विस्तरः ॥ ३६-३७ ॥

महातमसि मग्नेभ्यो भक्तेभ्यो यत्प्रकाशये।

विद्युद्वदतुलं रूपं तस्माद्वैद्युतमस्म्यहम् ॥३८॥

यत् - यस्मात्कारणात्, महातमसि मग्नेभ्यो भक्तेभ्यः, विशेषेण द्योतत इति विद्युत् - सौदामिनी, तत्सदृशं प्रकाशम् । प्रकाशशब्दार्थत्वेन तमश्शब्दार्थनिवर्तकत्वेन च साम्यात् । परमार्थतस्तु अतुलम् - तुलारहितं रूपं, प्रकाशये, तस्माद्वैद्युतमिति शब्दभागस्मि॥ ३८॥

एक एव यतो लोकान् विसृजामि सृजामि च ।
विवासयामि गृह्णामि तस्मादेकोऽहमीश्वरः [७८] ॥ ३९॥

एक एवेति। विसृजामि - संहरामीत्यर्थः। उपसर्गविशेषसमभिव्याहार लभ्योऽयमर्थः। विवासयामि - लोकाल्लोकान्तरं प्रापयामि । गृह्णामि - अनुगृह्णामि । तथा च सर्वजगतः सृष्टिस्थितिसंहारेषु परलोकादिप्रापणे च ममैकस्यैव यस्मात् स्वातन्त्र्यं तस्मात् एकशब्दभागस्मीत्यर्थः ॥ ३९॥

इदानीं निर्गुणेऽप्येकशब्दप्रयोगबीजमाह - न द्वितीय इति ।

न द्वितीयो यतस्तस्थे तुरीयं ब्रह्म यत्स्वयम् ।
भूतान्यात्मनि संहृत्य चैको रुद्रो वसाम्यहम् ॥४०॥

यतः - यस्मात्, ब्रह्मणः द्वितीयो न तस्थे, किन्तु आत्मनि भूतानि संहृत्य एक एव वसामि । मोक्षदशायां सर्वप्रपञ्चमूलभूताज्ञानस्य सविलासस्य निवृत्तेः। ननु संहर्तृत्वादिगुणविशिष्टस्यास्थानाभ्युपगमे वियदादिप्रपञ्चेन

---

७८ "तस्मादेकोऽहमीरितः" इति पाठान्तरम्। ईरितः - उक्तः।

किमपराद्धमित्याशङ्क्याह - भूतानीति । आत्मानं विशिनष्टि - तुरीयमिति। गुणत्रयोपाधिकास्त्रयो भेदाः, इदं तु तेभ्यः भिन्नं, तुरीयम् - चतुर्थम्, निर्गुणमित्यर्थः। अत एवाह - यत्स्वयमिति । आत्मनो निजरूपं श्रुत्या निर्दिष्टमिति भावः। तस्थ इत्यत्र "छन्दसि लुङ्लङ् लिटः" (पा.सू. ३-४-६) इति कालविशेषनिरपेक्षो लिट्॥ ४०॥

सर्वलोकान् यदीशेऽहमीशानीभिश्च शक्तिभिः।
ईशानमस्य जगतः स्वर्दृशं चक्षुरीश्वरम् ॥ ४१ ॥

ईशानमिन्द्र तस्थुषः सर्वेषामपि सर्वदा ।
ईशानस्सर्वविद्यानां यदीशानस्तदस्म्यहम् ॥ ४२ ॥

सर्वलोकानिति । यत् - यस्मात्कारणात्, ईशयन्त्याभीक्ष्ण्यं इति ईशिन्यः, ईश्वरत्वादिसम्पादिकाः, णिजन्तादाभीक्ष्ण्ये णिनिः। तादृगीशिभिः सर्वान् लोकान्, ईशे - नियमये । तत् - तस्मात्कारणात्, अहमीशानोऽस्मीति सम्बन्धः।

अत्रार्थे ऋग्वेदपञ्चामाष्टकतृतीयाध्यायस्थां श्रुतिमर्थतः पठति 'ईशान'मित्यादिना 'सर्वदे'त्यन्तेन । श्रुतिपाठस्त्वित्थं "अभि त्वा शूर नो नुमो दुग्धा इव धेनवः। ईशानमस्य जगतः स्वर्दृशमीशानमिन्द्र तस्थुषः॥"(ऋ.सं. ७-३२-२२) (तै.सं. २-४-१४)। श्रुतेरर्थस्त्वित्थम् - हे शूर ! इन्द्र - परमात्मन्, इन्दतीति इन्द्र इति व्युत्पत्तेः। इन्द्रपरमेश्वरयोः "ऋजेन्द्रे"त्यादिसूत्रेण (उणादि.सू. २-२८) रन्प्रत्ययान्तो निपातितः। अस्य जगतो - जङ्गमस्य, ईशानं - ईश्वरम्, तस्थुषः - स्थावरस्य च

ईशानं, स्वर्दृशं - स्वर्गे पुण्यातिरेकशालिनामेव वासः। "तदुपर्यपि बादरायणस्सम्भवात्" (ब्र.सू. १-३-२६) इति व्याससूत्राच्च। स्वं स्वर्गे ईदृशं दृश्यमानं वयं, अभिनोनुमः - अभिमुखाः तात्पर्यविशेषभाजः सन्तः पुनःपुनः अतिशयेन वा स्तुमः। 'णु स्तुतौ' - यङ्लुकि लट् । ईदृशा वयं दुग्धा धेनव इव स्थिताः। "यथा अभिनवक्षीरपूर्णोधश्शालिन्यो गावः, तद्वदभिषेकार्थं क्षीरपूर्णभाण्डशालिनः यज्ञानुष्ठानकाले सोमरसपूर्णचमस धारिणश्च भावमः" इति भाष्यकारः॥

यद्यपि मोषुत्वेति (ऋ.सं. ७-३२-१) सप्तविंशतिके इन्द्रदेवताके सूक्ते इयं द्वाविंशी ऋक्। तथापि सर्वनियामकत्वादिलिङ्गानां जीवेऽसम्भवेन "आकाशस्तल्लिङ्गात्" (ब्र.सू. १-१-२२) इत्याद्यधिकरणन्यायाद्ब्रह्मपरता बोध्या । तथा च मन्त्रवर्णे "इन्द्रं मित्रं वरुणमग्निमाहुः" (ऋ.सं १-१६४-४६) इत्युपक्रम्य "एकं सद्विप्रा बहुधा वदन्ती"ति दर्शयति। अनुक्रमणिकाकाराश्चाहुः "एकैव महानात्मा देवता, तत्तत्स्थानात् तत्तद्विभूतयः तत्तन्मया" इति ।

एवं स्थिते शिवगीताश्लोकस्येत्थं योजना । "ईशानमस्य जगतः" "ईशानमिन्द्रतस्थुषः" इति तृतीयचतुर्थचरणाभ्यां श्रुतप्रतीकं गृहीतम् । तत्र 'जगतः' 'तस्थुषः' इति पदद्वयं तात्पर्यतो व्याचष्टे - सर्वेषामपीति । ईशानमित्यस्य विवरणमीश्वरमिति । अत्र 'ईश ऐश्वर्ये' इति धातोः "स्थेशभासे"ति (पा.सू. ३-२-१७५) सूत्रविहितेन तच्छीलार्थकेन वरच्प्रत्ययेन ईशानशब्दस्थं शानच् प्रत्ययं विवृण्वन् अयमपि "ताच्छील्यवयोवचनशक्तिष्वि"ति (पा.सू. ३-२-१२९) सूत्रेण विहितः ताच्छीलिकः चानश् न तु शानजिति ताच्छील्यं विवृणोति । सर्वदेति -

आमोक्षमित्यर्थः। यद्यपि सार्वधातुकत्वाभावेन तस्यानुदात्तेत्वस्याप्रवृत्तौ अन्तोदात्ततापत्तिः। तथापि स्वरव्यत्ययो भविष्यतीति भावः। वरचो कर्तृत्वमात्रे तात्पर्येच्छाजने वा यमिति वा । तथा च स्वरदोषलेशोपि नेति दिक्। स्वर्दृशमित्येतद्व्याचष्टे - चक्षुरिति। अयमर्थः, चक्षुष्टे इति चक्षुरभिव्यञ्जकं सत्ता, सत्कीर्तिप्रदमित्यर्थः। चक्षिङ्धातोः व्यक्तवाग्वाचिनः अभिव्यक्तरूपे विशेषणांशे निरूढा भागत्यागलक्षणेति, तत्रामृतस्य च लक्षणमिति श्रुतिव्याख्यायां भाष्यकारः। "चक्षेः शिच्चे"त्यादिसूत्रेण (उणादि सू. ३-११९) उसिप्रत्ययः। स्वशब्दस्य सकलभुवनरक्षक इति श्रुतिस्थस्य स्वर्दृशमित्यस्य व्याख्यानानन्तरं प्रागुक्तम् । याजुषं श्रुत्यन्तरमुदाहरति - ईशान इति । यत् - यस्मात्, "ईशानः सर्वविद्यानामीश्वरस्सर्वभूताना"मित्यादि याजुषेऽपि (तै.आ. १०-२१) पठ्यते, तत् - तस्मादित्यन्वयः ॥४१-४२॥

सर्वभावान्निरीक्षेऽहमात्मज्ञानं निरीक्षये ।
योगं च संश्रये[७९] यस्माद्भगवान् महतो मतः॥ ४३ ॥

अजस्रं यच्च गृह्णामि विसृजामि सृजामि च ।
सर्वान् लोकान् वासयामि तेनाहं वै महेश्वरः॥ ४४ ॥

यस्मात्कारणात् , सर्वान् - अतीतागतान् व्यवहितादींश्च भावान् , अहं

---

७९ "योगं च समये" इति पाठे "समये - तत्त्वसाक्षात्कारप्रयोजकशमदमादिरूप समवधानसमये, योगं - तत्त्वसाक्षात्कारप्रयोजकीभूतश्रवणमननाद्युपायं, आत्मज्ञानं - अपरोक्षमात्मतत्त्वज्ञानं च, निरीक्षये - कारयामि" इत्यर्थः। "योगं च गमये" इति पाठे योगं - जीवब्रह्मतादात्म्यसम्बन्धं, गमये - प्रापयामि । तथा चात्मज्ञानं मोक्षं च प्रापयामीत्यर्थः।

निरीक्षे - पश्यामि । तथा महतः - महापुरुषान् , साधनचतुष्टयसम्पन्नानिति यावत् । आत्मज्ञानम् - आत्मा ज्ञायतेऽनेनेति तथाभूतम्, अत्मसाक्षात्कारसाधनं योगं , निरीक्षये - बोधयामि । तथा सम्यक् श्रये गच्छामि व्याप्नोमीत्यर्थः, अतः कारणादहं भगवान्मतः। "भगः श्रीकाममाहात्म्यवीर्ययत्नार्ककीर्तिषु" इत्यमरवचनान्माहात्म्यवाची भगशब्दः। महात्म्यं चेह सर्वज्ञत्वं तत्त्वोपदेष्टृत्वं व्यापकत्वं चेत्यादि ग्राह्यमित्यर्थः ॥ ४३-४४ ॥

महत्स्वात्मज्ञानयोगैरैश्वर्यैस्तु महीयते ।
सर्वान् भावान् महादेवः सृजत्यवति सोऽस्म्यहम् ॥ ४५ ॥

महत्स्विति । सोऽहं महादेवोऽस्मीति सम्बन्धः। दीव्यति क्रीडतीति देवः, महांश्चासौ देवश्चेति विग्रहः। नन्वन्येष्वपि क्रीडत्सु कथमिहैव महत्वमित्याशङ्क्य क्रीडाविशेषं प्रकटयति - यः पुरुषः आत्मज्ञानं च योगाश्च तैर्महीयते । सर्वान् भावान् सृजति - ब्रह्माख्यः, अवति - रक्षति नारायणाख्यः, सोऽहमेव । महत्सु मध्ये महादेव इति सम्बन्धः। जगत्सृष्टिस्थितिसंहाररूपा क्रीडा ममैव नान्येषाम् , अतो महत्वमुचितमिति भावः ॥ ४५ ॥

महत्वमेव द्रढयन् "एष हि देवः प्रदिशोनु सर्वाः" (तै.आ. १०-१) इत्यादिश्रुतिमर्थतः पठति - एषोऽस्मीति ।

एषोऽस्मि देवः प्रदिशो नु सर्वाः
पूर्वो हि जातोऽस्म्यहमेव गर्भे ।

अहं हि जातश्च जनिष्यमाणः
प्रत्यङ्मुखस्तिष्ठति विश्वतो मुखः ॥ ४६ ॥

'सर्वतो मुखस्तिष्ठती'ति श्रुत्या यो देवः पुरुषः उक्तः, एषः - अहमेव देवोऽस्मीति सम्बन्धः। सर्वतोमुखतामेव विवृणोति - सर्वाः प्रदिशोऽस्मि, सर्वत्रास्मीत्यर्थः। "देशकालाध्वगन्तव्याः कर्मसंज्ञा ह्यकर्मणा"मिति कर्मत्वम् । दिगुपाधीनामपीदृशत्वात् । पूर्वो हि जातः - अतीत इत्यर्थः। तथा गर्भे जातो ह्यहमस्मि । तथा जातः - गर्भाद्बहिर्निर्गतः, निर्गमिष्यमाणः उत्पत्स्यमानश्च अहमेव । अत एव सर्वतोमुखः। भूतभविष्यदादिभिरभेदे विकारित्वापत्तिरित्याशङ्क्याह - प्रत्यगिति । प्रति - जडानृतादिभ्योऽहङ्कारादिभ्यः प्रातिकूल्येन सत्यज्ञानानन्दतया अञ्चति शेत इति प्रत्यक् , विवर्ताधिष्ठानमात्रमित्यर्थः ॥ ४६ ॥

विश्वतश्चक्षुरुत विश्वतो मुखो
विश्वतो बाहुरुत विश्वतस्पात् ।
संबाहुभ्यां धमति सम्पतत्रै-
र्द्यावाभूमी जनयन् देव एकः ॥ ४७॥

बाहुशब्दस्थाने हस्तशब्देन घटितो याजुषः पाठः (तै.आ. १०-१)। पृथिवीशब्दस्थाने भूमिशब्दघटितस्तु ऋग्वेदपाठः (ऋ.सं. १०-८१-३)। तदित्थं श्रुतिद्वयं समानार्थकमर्थतः पठति - विश्वत इत्यादि । विश्वतश्चक्षुः - सर्वसाक्षीत्यर्थः। विश्वतोमुखः - सर्ववक्त्रः। सर्गाद्यकालीनव्यवहार प्रवर्तकत्वात् सर्वकर्तृत्वाद्वा। विश्वतोबाहुः - विश्वविषयकप्रयत्नवान् , 'बाहृ प्रयत्ने' उप्रत्ययः। प्रयत्नश्चेह मायावृत्तिरूपः, "तदात्मानं स्वयमकुरुत"

(तै.उ. २-७) इति श्रुतिप्रसिद्धः। स च यद्यपि न कर्तृत्वशरीरघटितः, वृत्तिमालाप्रसङ्गात् । तथापि न स्वरूपतो निराकारः, देवताविग्रहन्यायसिद्धत्वात् । उतेति - अपिचेत्यर्थः। विश्वतस्पात् - लक्षणया सर्वगत इत्यर्थः। बाहुभ्यां तथा पतत्रैः गमनशीलैः पादैश्च, दिवं पृथिवीं च सन्धमति । धमति - गतिकर्म प्रेरयतीत्यर्थः। पाणिपादग्रहणं चोपलक्षणमात्रम् , पाणिपादस्थानापन्नैः सहकारिभिः अज्ञान धर्माधर्मादिभिरित्यर्थः। द्यावापृथिवी इत्यपि कार्यमात्रोपलक्षणम् , सर्वं जगत्सृजतीत्यर्थः। तथापि देव एक एव, सृष्टेर्मायिकत्वादिति भावः। उक्तं चैतत् "य इमा विश्वे"ति (ऋ.सं. १०-८१-१) (तै.सं. ४-६-२) चतुर्दशार्चे सूक्ते । प्रथममन्त्रेण सृष्टेरुपक्षये कृते सति द्वितीयमन्त्रेण "किं स्विदासीदधिष्ठानमारम्भणम्" मित्यन्तेन । अधिष्ठानाद्यसम्भवात कथं सृष्टिरिति प्रश्नेऽवतारिते सति तदुत्तरं दातुं प्रवृत्तेनानेन तृतीयमन्त्रेण अधिष्ठानभूतब्रह्मण एवोच्यमानतया सन्दर्भस्वरसेन प्रपञ्चमिथ्यात्वस्य लाभात् । परिणममानाज्ञानाविषयत्वाधिष्ठानपरिणामस्तु एक एव, बाधकबाध्योऽन्यथाभाव इति दिक् । अत एव 'किं स्विद्वन'मित्यादिना तत उत्तरमन्त्रेणापि प्रपञ्चास्यानिर्वचनीयतैव स्फुटीक्रियते । उक्तञ्च "यथा सतो जनिर्नैवमसतोऽपि जनिर्न वा । जन्यत्वमेव जन्यस्य मायिकत्वसमर्पकम्" इति ॥४७॥

वालाग्रमात्रं हृदयस्य मध्ये
विश्वं देवं जातवेदं वरेण्यम् ।
मामात्मस्थं येऽनुपश्यन्ति धीरा-
स्तेषां शान्तिश्शाश्वती नेतरेषाम् ॥४८॥

धियं बुद्धिम् , ईरयन्ति प्रेरयन्तीति धीराः - विचारकुशलाः ये पुरुषाः, आत्मा जीवस्सन् तिष्ठतीति जीवस्थः, शुद्धतत्त्वंपदार्थाः मदभिन्नं पश्यन्ति श्रवणादिभिः पश्चात्साक्षात्कुर्वन्ति, तेषाम् - अप्रतिबद्धम् अभेदसाक्षात्कारवताम्, शाश्वती शान्तिः - मोक्षसुखम्, आविर्भवति, इतरेषां तु नेति सम्बन्धः। कीदृशो जीवः? हृदयस्य मध्ये, वालाग्रमात्रं - केशाग्रप्रमाणम् , स्वरूपेणाव्यापकत्वेऽप्यौपाधिकपरिच्छेदवन्तामित्यर्थः। कीदृशं माम् ? विश्वं देवम् - विश्वाधिष्ठानत्वाद्विश्वात्मकं, तदन्तर्यामिणं चेत्यर्थः। ननु "जागर्षि त्वं भुवने जातवेदः" (ऋ.सं. ५-४४ परि.मन्त्रः) इति ऋङ्मन्त्रे अग्नेस्सर्वान्तर्यामित्वं श्रुतम् , न तु तवेत्याशङ्क्य सोऽप्यहमेवेत्याह - जातवेदमिति। "इन्द्रं मित्रं वरुणमग्निमाहुः" (ऋ.सं १-१६४-४६) इत्यादिश्रुतिबलात् अग्निप्रभृतिशब्दा अपि मामेवाहुरित्यर्थः। वेदो धनम् , स तु जातः यस्मात्तथा , "अग्नेः प्रजातं परि यद्धिरण्यं" इति श्रुतिः। 'विद्लृ लाभे' इति धातोः घञ् , अकारान्तः पुल्लिङ्गो वेदशब्दः। असुन् प्रत्यये कृते सकारान्तो नपुंसकः। तथा जातवेदसमित्यपि भवति । वरेण्यं - भजनीयम् ॥४८॥

ननु विश्वात्मकत्वं पूर्वश्लोके उक्तम् । तच्चाधिष्ठानतया वाच्यम् । न च तत्सम्भवति । शुक्त्यादेरेव रजताधिष्ठानत्वादित्याशङ्क्याह - अहमिति ।

अहं योनिं योनिमधितिष्ठामि चैको
मयैवेदं पूर्णं पञ्चविधं च सर्वम् ।
मामीशानं पुरुषं देवमित्थं
विचार्यमाणं[८०] शान्तिमत्यन्तमेति ॥४९॥

---

८० "मामीशानं पुरुषं देवमित्थं निचाय्येमाम्" "मामीशीनं परुषं देवमीड्यम्" इति च

योनिम् - अधिष्ठानत्वेन सम्भाव्यमानं शुक्त्यादिकम् , अहमधितिष्ठामि। शुक्त्याद्युपहितोऽहमेव रजतादेरधिष्ठानम् , जडस्याज्ञानविषयतया अधिष्ठानत्वानुपपत्तेरिति भावः। मूलाज्ञानकार्येषु तु वियदादिषु अनवच्छिन्नोऽहमेवाधिष्ठानमित्याह - मयेदमिति । पञ्चभूतात्मकं सर्वं मयैवाधिष्ठानभूतेन पूर्णम् , आविद्यकतादात्म्यापन्नमित्यर्थः। इत्थं - पूर्वोक्तरीत्या, विचार्यमाणं माम् , एति - प्राप्नोति, अर्थाद्विचारकर्तैव विचार्यमाणं प्राप्नोतीति लभ्यते। तथा च श्रुतिः "ब्रह्म वेद ब्रह्मैव भवति" (मु.उ. ३-२-९) इति । कीदृशं माम् ? अत्यन्तं शान्तिं - "प्रपञ्चोपशमं शान्तं शिवमद्वैतम्" (मा.उ. ७) इति श्रुतेरिति भावः ॥ ४९॥

प्राणेष्वन्तर्मनसो लिङ्गमाहुः
यस्मिन्नशनाया तृष्णा क्षमा च ।
तृष्णां छित्वा हेतुजालस्य मूलं
बुध्या चित्तं स्थापयित्वा मयीह ॥
एवं ये मां ध्यायमाना भजन्ते
तेषां शान्तिः शाश्वती नेतरेषाम् ॥५०॥

प्राणेष्विति । यस्मिन् - मनसि, अशनाया - अशनविषयणी इच्छा अस्ति । अशनशब्दात् क्यचि "अशनायोदन्ये"ति (पा.सू. ७-४-३४) निपातनादीत्वाभावे "अ प्रत्ययात्" (पा.सू. ३-३-१०२) इति अप्रत्ययः। तथा च यस्मिन् मनसि तृष्णा क्षमा च अस्ति तादृशस्य मनसो लिङ्गं तत्कार्यभूतामिच्छादिवृत्तिं प्राणेष्वाहुः। तथा अन्तः - आत्मनि, आहुः।

पाठान्तरम् ।

अन्तःकरणपरिणामरूपाः कामादयः अन्यत्रापि अध्यस्यन्त इत्यर्थः। तस्मान्मनोनिग्रह एवावश्यक इत्याह - तृष्णां छित्वेति । ननु धर्माधर्मयोर्जये कृते तृष्णा किं करिष्यतीत्याशङ्क्य इतरजय एव दुर्लभ इत्याशयेन तृष्णां विशिनष्टि - हेतुजालस्येति । हेतुजालस्य - अनर्थहेतूनां धर्माधर्मादीनां सङ्घस्य, मूलभूतामित्यर्थः। तृष्णाजयानन्तरं कर्तव्यमाह - बुद्ध्येति । इह - एवं पूर्वोक्तरूपे मयि, चित्तम् - अन्तःकरणम् , बुद्ध्या - पातञ्जलोक्तयोगाभ्यासप्रकारेण स्थापयित्वा, एवं - पूर्वोक्तरीत्या, ध्यायमानाः - ध्यायन्तः, चानश् न तु शानच् , परस्मैपदित्वात् , एवंभूतास्सन्तो ये भजन्ते तेषां, शान्तिः - मोक्षसुखं, भवति ॥५०॥

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह।
आनन्दं ब्रह्म मां ज्ञात्वा न बिभेति कुतश्चन ॥५१॥

उपसंहरति - यतो वाच इति । वाचः - शब्दाः, यतः - यस्माच्छुद्धब्रह्मणः निवर्तन्ते । नन्वेवं सति औपनिषदत्वं भज्येतेत्याशङ्क्याह - अप्राप्येति । शक्तिमलभ्येत्यर्थः। तथा च विशिष्टे सत्यज्ञानानन्दादिपदानां जडांशपरित्यागेन लक्षणया अखण्डचिद्घनबोधकत्वाभ्युपगमान्न कश्चिद्दोष इति भावः। मनसा सहेति । तथा च मनोऽपि निवर्तत इति भावः, श्रूयते च "यन्मनसा न मनुते" (केन.उ १-५) इति । न चैवं "मनसैवानुद्रष्टव्य"मिति श्रुतिविरोधः, परिपक्केन मनसा दृश्यत इत्येवं तदर्थात्, निषेधस्य तु अपरिपक्वमनोविषयत्वादिति दिक् ॥५१॥

श्रुत्वेति देवा मद्वाक्यं कैवल्यज्ञानमुत्तमम् ।
जपन्तो मम नामानि मम ध्यानपरायणाः॥ ५२॥

सर्वे ते स्वस्वदेहान्ते मत्सायुज्यं गताः पुरा ।
ततो ये परिदृश्यन्ते पदार्था मद्विभूतयः ॥ ५३ ॥

केवलस्य भावः कैवल्यम् - निष्प्रपञ्चमात्मस्वरूपम्, तत् ज्ञायतेऽनेनेति कैवल्यज्ञानम् - अद्वैतात्मज्ञानसाधनमित्यर्थः। ततः कारणात् ये ये पदार्थाः दृश्यन्ते दृग्विषयाः ते सर्वे मद्विभूतयः। यच्छब्दबलात्तच्छब्दोऽध्याहार्यः ॥ ५२-५३ ॥

उक्तमेवार्थं कैवल्योपनिषत्संवादेन द्रढयति - मय्येवेत्यादिभिः अध्यायसमाप्तिपर्यन्तम्। कैवल्योपनिषदेव कतिपयवर्णव्यत्यासेन पठ्यते।

मय्येव सकलं जातं मयि सर्वं प्रतिष्ठितम् ।
मयि सर्वं लयं याति तद्ब्रह्मास्म्यहमव्ययम्॥ ५४ ॥

अणोरणीयानहमेव तद्व-
न्महानहं विश्वमहं विशुद्धः।
पुरातनोऽहं पुरुषोऽहमीशो
हिरण्मयोऽहं शिवरूपमस्मि ॥ ५५ ॥

अणोरप्यतिशयेन अणुः - अणीयान् , औपाधिकपरिच्छेदवानित्यर्थः। महानिति - स्वरूपतो परिच्छिन्नः। विश्वं - सर्वाधिष्ठानत्वात् तत्तादात्म्यापन्नः। विशुद्ध इति - प्रपञ्चस्य मिथ्यात्वात्तल्लेपरहितः। न ह्यारोपितेनारुणिम्ना स्वाभाविकं स्फटिकस्वच्छत्वमपैतीति भावः। पुरातनः पुरुषः ईशो हिरण्मय इत्यादिशब्दैः तासु उपनिषत्सु बहुधा

व्यवह्रियमाणोऽहमेवास्मीति सम्बन्धः ॥५४-५५॥

अपाणिपादोऽहमचिन्त्यशक्तिः
पश्याम्यचक्षुस्स शृणोम्यकर्णः।
अहं हि जानामि विविक्तरूपो
न चास्ति वेत्ता मम चित्सदाऽहम् ॥५६॥

अपाणीति । लोके पाणिपादविकलः सर्वकार्येष्वशक्त इति जीवानां स्थितिः। अहं तु, पाणी च पादौ च पाणिपादम् , अविद्यमानं पाणिपादं यस्य तथाभूतस्सन्नपि अचिन्त्यशक्तिः। तथा चक्षुषा रहितस्सन्नपि पश्यामि - चक्षुर्ग्राह्यसकलपदार्थानां द्रष्टा । कर्णरहितस्सन्नपि शृणोमि - सकलशब्दसाक्षात्कारवानस्मि । कारणं विना कथं कार्यमित्याशङ्क्याह - अहमिति । विविक्तं विनाकृतं रूपं यस्य तथाभूतः। तथा च स्वरूप ज्ञानेनैव सर्वद्रष्टाऽहम् , न तु वृत्तिबलेन । चक्षुश्श्रोत्रादि तु वृत्तावेव हेतुः। सा च निवृत्ता । आवरणरहितत्वात् तान्यपि नापेक्षत इति भावः ॥५६॥

वेदैरनेकैरहमेव वेद्यो
वेदान्तकृद्वेदविदेव चाहम् ।
न पुण्यपापे मम नास्ति नाशो
न जन्मदेहेन्द्रियबुद्धिरस्ति ॥५७॥

वेदैरिति । वेदैर्वेद्यः - उपनिषज्जन्यवृत्तिविषय इत्यर्थः। न चास्ति वेत्ता ममेत्यव्यवहितपूर्वोक्तं तु फलं व्याप्तिविरहपरम् । तत्र हेतुस्तत्रैव चित्सदाऽहमिति चिद्रूपत्वं प्रागुक्तम् । वृत्तिविषयता तु न निवार्यते । अत

एव शास्त्रयोनित्वाधिकरणद्वितीयवर्णकं न विरुध्यते । उक्तं च वार्तिककृद्भिः "फलव्याप्यत्वमेवास्य शास्त्रकृद्भिर्निवार्यते। ब्रह्मण्यज्ञाननाशाय वृत्तिव्याप्यत्वमिष्यत" इति । इह च अहं वेद्य इति वक्तव्ये अहमेवेत्येवकारेण अखण्डार्थता स्फुटीक्रियते । युक्तश्चैतत् । अन्वयव्यतिरेकाभ्यां निवर्तनाय अज्ञानकार्यगोचरस्यैव ज्ञानस्य अज्ञाननिवर्तकत्वादिति दिक् । नास्ति नाश इति, ममेति शेषः। जन्मदेहेन्द्रियसहिता बुद्धिः जन्मदेहेन्द्रियबुद्धिः,सापि नास्तीति सम्बन्धः। श्रुतौ "न जन्मदेहेन्द्रियबुद्धिरस्तीति"पाठः। बुद्ध्यन्तानां च समाहारद्वन्द्वः। तथा चेत्थं योजना , जन्म नास्ति, देहादि चं नास्तीति ॥५७॥

न भूमिरापो न च वह्निरस्ति
न चानिलो मेऽस्ति न मे नभश्च ॥५८॥

एवं विदित्वा परमात्मरूपं
गुहाशयं निष्कलमद्वितीयम् ।
समस्तसाक्षिं सदसद्विहीनं
प्रयाति शुद्धं परमात्मरूपम् ॥५९॥

न भूमिरित्यादि । मिथ्यात्वघटकीभूतः प्रपञ्चभावो बोध्यते । गुहायामज्ञाने शेत इति गुहाशयान् जीवान् प्रत्यावृतमित्यर्थः। समस्तेति । साक्षीत्याख्यायमानः साक्षी, आख्यानण्यन्तात्कर्मणि औणादिक इन् , साक्षिणमिति फलितोऽर्थः। सदसद्भ्यां कार्यकारणाभ्यां विहीनम् ॥५५॥

एवं मां तत्त्वतो वेत्ति यस्तु राम ! महामते ।

स एव नान्यो लोकेषु कैवल्यफलमश्नुते ॥६०॥

॥ इति श्रीपद्मपुराणे शिवगीतासूपनिषत्सु
विभूतियोगो नाम षष्ठोऽध्यायः॥

स एव नान्य इति । कर्ममात्रासक्तो वा सगुणमात्रासक्तो वा न मोक्षभागित्यर्थः। न चैवं कर्मवैयर्थ्यम् , विविदिषादिसम्पादनद्वारा सार्थक्यात् । सगुणोपासनस्यापि परम्परयैवोपयोगात् । तदुक्तं "निर्विशेषं परं ब्रह्म साक्षात्कर्तुमनीश्वराः। ये मन्दास्तेऽनुकम्प्यन्ते सविशेष निरूपणैः"[८१] इति। कैवल्यफलमिति । कैवल्यमेव फलम् , कैवल्यमिति कर्मधारयः॥६०॥

॥ इति श्रीमद्विशुद्धाद्वैतसिद्धान्तप्रतिष्ठापनैकधुरन्धर
श्रीमच्छङ्करानन्दभारतीविरचिते शिवगीताभाष्ये षष्ठोऽध्यायः॥

---

८१ श्लोकोऽयं श्रीमदमलानन्दसरस्वतीयतिभिः प्रणीते वेदान्तकल्पतरौ "अन्तस्तद्धर्मोपदेशात्" (ब्र.सू. १-१-२०)" इत्यधिकरणे उपलभ्यते ।

सप्तमोऽध्यायः

पूर्वाध्याये अहं सर्वाधिष्ठानमिति सप्रपञ्चं भगवता उक्तम् । तत्राहंशब्दप्रयोगबलात् अहङ्काराद्यवच्छिन्नस्य अधिष्ठानतेति प्रतीयते। तच्चासङ्गतमिति प्रतिपादयति द्वाभ्यां श्लोकाभ्यां - भगवन्निति ।

श्रीराम उवाच -

भगवन् ! यन्मया पृष्टं तत्तथैव स्थितं विभो।
अत्रोत्तरं मया लब्धं त्वत्तो नैव महेश्वर! ॥ १ ॥

परिच्छिन्नपरीमाणे देहे भगवतस्तव ।
उत्पत्तिस्सर्वभूतानां स्थितिर्वा विलयः कथम् ॥ २ ॥

परिच्छिन्नेति । परिच्छिन्नं परीमाणं यस्य तथाभूते "उपसर्गस्य घञि-" (पा.सू.६-३-१२२)" इति सूत्रे वहुलग्रहणाद्दीर्घः। भगवतो देहे सर्वभूतानामुत्पत्तिः स्थितिः प्रलयो वा कथम् ? ब्रह्माण्डाद्युचितस्य अवकाशस्य परिच्छिन्नदेहे अभावात् कथं सृष्टिः। न हि घटमध्ये पर्वतादयो मान्तीति भावः ॥ १-२ ॥

स्वस्वाधिकारसम्बद्धाः कथं नाम स्थितास्सुराः।
ते सर्वे त्वं कथं देव ! भुवनानि चतुर्दश ॥ ३ ॥

स्वस्वेति । स्वस्वाधिकारैस्सम्वद्धास्सुराः परिच्छिन्नपरिमाणे तव देहे कथं वा स्थिताः? अधिकारानुसारेण स्वर्गमर्त्यपातालादिषु यथायथं

विप्रकीर्णानां परिच्छिन्ने देहे एकत्र वास इत्यपि कथं सङ्गच्छत इति भावः। ननु अहङ्काराद्यवच्छिन्नस्य जडाधिष्ठानतां न ब्रूमः, किन्त्वनवच्छिन्न चिन्मात्रस्य । अहंशब्दप्रयोगोऽपि लक्षणया चिन्मात्रपरः, अतो नोक्तदोष इत्याशङ्क्य तत्राप्यनुपपत्तिरेवेत्याह - सर्वे इति । ते देवास्सर्वे त्वम् , तथा चतुर्दश भुवनानि च त्वमेवेति कथम् ? न ह्येकस्य उत्पत्तिविनाशरहितस्य चिद्रूपस्य तव बहुभिरुत्पत्तिविनाशवद्भिर्जडैस्सह अभेदस्सम्भवति, विरुद्धधर्माध्यस्तत्वादिति भावः ॥ ३ ॥

त्वत्तः श्रुत्वाऽपि देवात्र सन्देहो मे महानभूत् ।
अप्रत्यायितचित्तस्य संशयं छेत्तुमर्हसि ॥ ४ ॥

मे - मम, त्वत्तः श्रुत्वाऽपि - श्रवणानन्तरमपि, अत्रार्थे सन्देहोऽभूत् । अप्रत्यायितं निश्चयमप्रापितं चित्तं यस्य तथाभूतस्य मे संशयं त्वमेव छेत्तुमर्हसि । जगदन्तर्यामिणा भवतैव कृपया बोधनीयोऽहम् । अत्यन्तगहनानां गुरूपदेशं विना दुरधिगमत्वादिति भावः ॥ ४ ॥

परिच्छिन्नस्य सर्वाधिष्ठानत्वं यद्यपि न सिद्धान्तसम्मतम् , तथापि शङ्कितुराशयमनुरुध्य तदपि समर्थयितुं दृष्टान्तमाह - वटेति ।

श्रीभगवानुवाच -

वटबीजेऽतिसूक्ष्मेऽपि महावटतरुर्यथा ।
सर्वदाऽऽस्तेऽन्यथा वृक्षः कुत आयाति तद्वद ।
तद्वन्मम तनौ राम ! भूतानामागतिर्लयः ॥ ५ ॥

सुतरां सूक्ष्मेऽपि वटस्य बीजे सर्वदा महावटतरुरास्ते यथा तद्वन्मम तनौ भूतानामागतिर्लयश्चेत्यन्वयः। ननु दृष्टान्तोऽप्यसम्प्रतिपन्नः। प्रागसत एव वृक्षस्य सहकारिसमवहिताद्बीजादुत्पत्तेः। अत एव गौतमकाणादादिग्रन्थे तथैव व्युत्पादितमित्याशङ्क्याह - अन्यथेति । अन्यथा - सूक्ष्मरूपानभ्युपगमे, वृक्षः कुतो हेतोरायाति तद्वदेति सम्बन्धः। अयं भावः, असतोऽप्युत्पत्तौ शशशृङ्गमप्युत्पद्येत, अविशेषात् । प्रागभावप्रतियोगित्वमेव घटादेर्विशेष इति चेत् तद्घटस्यासत्वे तत्स्वरूपात्मिकायाः अप्रतियोगिताया अप्यसत्वात् । अखण्डोपाधिरूपा प्रतियोगितेति चेत् अखण्डोपाध्यभ्युपगमे जातिविलयापत्तेः। समवायस्यापि तत्रासत्वात् व्याप्त्यादिनिर्वचनस्यापि वैयर्थ्यापत्तेश्च । किञ्चाखण्डप्रतियोगितावलेन घट इव शशशृङ्गादिकमप्युत्पद्येत । शशशृङ्गं नास्तीति चेत्, तत्किं घटोऽस्ति? ओमिति चेत्, सिद्धस्तर्हि प्रागुत्पत्तेरपि घटः। न चात्र तत्सत्वे कारणव्यापारवैयर्थ्यम् , स्थूलावस्थायाः तदधीनत्वात् । न च तस्यामपि सत्त्वासत्त्वविकल्पः। स्वप्ने स्वशिरोभक्षणादेरिव अघटनघटनापटीयस्या मायया अनिर्वचनीयवादे तत्समाधातम् । न चैवं सूक्ष्मरूपं कैवल्यम् , कृतहानाकृताभ्यागम-दोषपरिहारार्थम् "स एव तु कर्मानुस्मृतिशब्दविधिभ्यः" (ब्र.सू. ३-२-९) इत्याद्यधिकरणेषु तत्साधनात् । विस्पष्टं चैतज्जीर्णग्रन्थेष्विति गौरवभयादुपरम्यते ॥५॥

ननूक्तरीत्या कुलालादिव्यापारात्पूर्वमपि घटादेस्सत्वात् तदुपलम्भः कुतो नेत्याशङ्कायां सूक्ष्मत्वादेव विद्यमानस्यापि अनुपलम्भ इति समाधानमभिप्रेत्य सतोऽप्यनुपलम्भे दृष्टान्तमाह - सैन्धवेति ।

महासैन्धवपिण्डोऽपि जले क्षिप्तो विलीयते।
न दृश्यते पुनः पाकात्तत आयाति पूर्ववत् ॥ ६ ॥

महानपि सैन्धवपिण्डः जले क्षिप्तस्सन् विलीयते - सूक्ष्मावस्थापन्नो भवति, ततो न दृश्यते । ततः पुनः पाकात् स्थूलावस्थापन्नस्सन् आयातीत्युच्यते, तद्वत्सर्वकार्यमित्यर्थः। न च दृष्टान्ते विप्रतिपत्तिः। विलयदशायामपि जले लवणरसोपलम्भेन अपलापायोगात् ॥ ६ ॥

प्रातः प्रातर्यथाऽलोको जायते सूर्यमण्डलात् ।
एवं मत्तो जगत्सर्वं जायतेऽस्ति विलीयते ।
मय्येव सकलं राम ! तद्वज्जानीहि सुव्रत ॥ ७ ॥

प्रातः प्रातरिति । सूर्यमण्डलात् यथा आलोकः प्रातः एवं मत्तो जगत्सर्वं जायते । तद्वदेव सकलं मय्येवास्ति विलीयते च इति जानीहि ॥ ७ ॥

ननूक्तदृष्टान्तो विषमः, बीजमध्ये हि सूक्ष्मो वृक्षस्तिष्ठति न तु स्थूलवृक्षोऽपि । त्वयि तु स्थूलप्रपञ्चस्थितिरनुपपन्नैव । एवञ्च एकस्य बहुभिस्सह कथमभेद इति पूर्वोक्तमदीयप्रश्ने उत्तरं न लब्धमेव । यदि तु गूढाभिसन्धिना भगवता सर्वत्रास्मिन्नर्थे स्पष्टमुत्तरं दीयेत तदा संक्षिप्य कथितमपि मत्संशयनिवृत्तावसमर्थमेवेत्याह - कथितेऽपीति ।

श्रीराम उवाच -

कथितेऽपि महाभाग ! दिग्जडस्य यथा दिशि।
निवर्तते यथा नैव तद्वन्मम करोमि किम् ? ॥ ८ ॥

दिग्जडस्य दिङ्मोहो यथा कथितेऽपि दोषप्राबल्यादनुवर्तते तद्वन्मदीयोऽपि भ्रम इत्यर्थः ॥८॥

यद्यपि पूर्णं ब्रह्मैव सर्वाधिष्ठानम्, न तु लीलाविग्रहविशिष्टम्, अतो नोक्तदोष इति समाधातुं शक्यत एव । तथापि स्वप्नप्रपञ्चमिव परिच्छिन्नविग्रहादेतत्प्रपञ्चं दर्शयित्वा मामकतां स्फुटीकरिष्यामि, अविद्यातादात्म्यं च व्युत्पादयिष्यामि, तेन द्वितीयप्रश्नेऽप्युत्तरं भविष्यतीत्याशयेन भगवानाह - मयीत्यादि ।

श्रीभगवानुवाच-

मयि सर्वं यथा राम ! जगदेतच्चराचरम् ।
वर्तते तद्दर्शयामि न द्रष्टुं क्षमते भवान् ॥९॥

दर्शयामि - दर्शयिष्यामि, "वर्तमानसामीप्ये वर्तमानवद्वे"ति (पा.सू. ३-३-१३१) लट् ॥९॥

दिव्यं चक्षुः प्रदास्यामि तुभ्यं दशरथात्मज! ।
तेन पश्य भयं त्यक्त्वा मत्तेजोमण्डलं ध्रुवम् ॥१०॥

न चर्मचक्षुषा द्रष्टुं शक्यते मामकं महः ।
नरेण वा सुरेणापि तन्ममानुग्रहं विना ॥ ११ ॥

दिव्यं चक्षुरिति । मयि प्रपञ्चविशेषदर्शनानुकूलं सामर्थ्यमित्यर्थः । तत् - दर्शयिष्यमाणं मामकं महः, प्रपञ्चविशेषविशिष्टस्वरूपम्, मदनुग्रहं विना

द्रष्टुं न शक्यते ॥ १०-११ ॥

सूत उवाच -

इत्युक्त्वा प्रददौ तस्मै दिव्यं चक्षुर्महेश्वरः।
अथादर्शयदेतस्मै वक्त्रं पातालसन्निभम् ॥ १२ ॥

विद्युत्कोटिप्रभं दीप्तमतिभीमं भयावहम्।
तद् दृष्ट्वैव भयाद्रामो जानुभ्यामवनिं गतः ॥ १३ ॥

विद्युदिति । रामः , अतिभीमं, भयावहम् - पश्यतामन्येषामपि भयंकरम्, तद्वक्त्रं दृष्ट्वा, अवनिं गतः ॥ १२-१३ ॥

प्रणम्य दण्डवद्भूमौ तुष्टाव च पुनः पुनः।
अथोत्थाय महावीरो यावदेव प्रपश्यति ॥ १४ ॥

वक्त्रं पुरभिदस्तत्र ह्यन्तर्ब्रह्माण्डकोटयः।
चटका इव लक्ष्यन्ते ज्वलज्ज्वालासमाकुलाः ॥ १५ ॥

तत्र - वक्त्रे, अन्तः ब्रह्माण्डकोटयः, ज्वलन्ति ज्वालाभिस्समाकुलाः, चटकाः कलविङ्का इव विनाशोन्मुखाः दृश्यन्ते इत्यन्वयः ॥ १४-१५ ॥

मेरुमन्दरविन्ध्याद्या गिरयस्सप्तसागराः।
दृश्यन्ते चन्द्रसूर्याद्याः पञ्चभूतानि ते सुराः ॥ १६ ॥

ते सुराः - परमेश्वरस्य समन्तात्पूर्वं दृष्टाः देवा अपि ॥ १६ ॥

अरण्यानि महानागा भुवनानि चतुर्दश ।
प्रतिब्रह्माण्डमेवं तु दृष्ट्वा दशरथात्मजः ॥ १७॥

प्रतीति । प्रतिब्रह्माण्डमेवं मेरुमन्दरसूर्यचन्द्रादिकं सर्वं दृष्ट्वा भयाविष्टस्सन् प्रणनामेति वक्ष्यमाणेनान्वयः ॥ १७॥

सुरासुराणां सङ्ग्रामांस्तत्र पूर्वापरानपि ।
विष्णोर्दशावतारांश्च तत्कर्तव्यानि च द्विजाः ॥ १८॥

पराभवांश्च देवानां पुरदाहं महेशितुः।
उत्पद्यमानानुत्पन्नान् सर्वानपि विनश्यतः॥ १९॥

पूर्वापरान् - अतीतानागतान्, तत्कर्तव्यानीति । तेष्ववतारेषु कर्तव्यानि - रावणवधादीनि । देवानां पराभवमिति । दैत्येभ्य इति शेषः ॥ १८-१९॥

दृष्ट्वा रामो भयाविष्टः प्रणनाम मुहुर्मुहुः।
उत्पन्नतत्त्वज्ञानोऽपि बभूव रघुनन्दनः॥ २०॥
अथोपनिषदां सारैरर्थैस्तुष्टाव शङ्करम् ॥ २१॥

उत्पन्नेति । दृश्यमानस्य सङ्घटितरूपतया तद्दृष्टान्तेन पूर्वानुभूतप्रपञ्चे मिथ्यात्वं, ब्रह्मणो निर्गुणतां च निश्चितोऽपीति - निश्चितवानपीति भावः ॥ २०-२१ ॥

श्रीराम उवाच -

देव ! प्रपन्नार्तिहर ! प्रसीद
प्रसीद विश्वेश्वर ! विश्वरूप ! ।
प्रसीद गङ्गाधर! चन्द्रमौले!
मां त्राहि संसारभयादनाथम् ॥२२॥

देवेति । मां त्राहि - त्रायस्व । आर्षं रूपम् । यद्वा त्रायत इति त्राः रक्षकः, स इव आचर, त्राहि । रक्षितृत्वादिधर्माणामविषयत्वेन विषयसत्ताकता आचारक्विपा लभ्यते । यथा अरुण इव स्फटिको दृश्यते इत्यादौ इव शव्देनेव । एवं कर्तरि क्विबन्तादाचारक्विपि परस्मैपदानुपपत्तिरपि नेति दिक् ॥२२॥

त्वत्तो हि जातं जगदेतदीश !
त्वय्येव भूतानि वसन्ति नित्यम् ।
त्वय्येव शम्भो ! विलयं प्रयान्ति
भूमौ यथा वृक्षलतादयोऽपि ॥२३॥

त्वत्तो हीति । अपादानत्वं कर्तृत्वं च पञ्चम्यर्थः। "जनिकर्तुः प्रकृति"रिति (पा.सू. १-४-३०) सूत्रे प्रकृतिशब्दो हेतुमात्रोपलक्षक इति शाव्दिकसिद्धान्तात्। उभयथा चेह सम्भवात् ॥२३॥

ब्रह्मेन्द्ररुद्राश्च मरुद्गणाश्च
गन्धर्वयक्षासुरसिद्धसङ्घाः।

गङ्गादिनद्यो वरुणालयाश्च
वसन्ति शूलिन्! तव वक्रमन्ति ॥२४॥

ब्रह्मेन्द्रेति । हे शूलिन्! ब्रह्मादयस्सर्वे तव वक्रं अन्ति वक्रस्य समीपे, तन्मध्य इति यावत्। अन्तिशब्दो अन्तिकपर्यायः प्रसिद्धतरो वेदे "यदन्ति यच्च दूरके" (ऋ.सं. ९-६७-२१) इत्यादौ । तद्योगे यद्यपि षष्ठीपञ्चम्यौ अपेक्षिते, "दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्"(पा.सू.२-३-३४) इति सूत्रात्। तथाप्यार्षो विभक्तिव्यत्ययः। यद्वा वक्रे वसतीति सप्तम्यर्थे "देशकालाध्व गन्तव्याः कर्मसंज्ञाः ह्यकर्मणा"मिति कर्मत्वेन द्वितीया ॥२४॥

ननु जगदुपादानत्वे सविकारतापत्तिरित्याशङ्क्याह - त्वन्माययेति ।

त्वन्मायया कल्पितमिन्दुमौले !
त्वय्येव दृश्यत्वमुपैति विश्वम् ।
भ्रान्त्या जनः पश्यति सर्वमेत-
च्छुक्तौ यथा रूप्यमहिं च रज्जौ ॥२५॥

जनः एतत्सर्वं प्रपञ्चजातं भ्रान्त्या पश्यति शुक्तौ रूप्यं यथेति सम्बन्धः। ननु यदि मयि प्रपञ्चमस्तीति भ्रमरूपा तर्हि नाहं तदुपादानमित्यागतम् , अन्यत्र सतोऽन्यत्र भानं भ्रम इत्याशङ्क्याह - त्वन्मायया कल्पितमिति, त्वय्येव दृश्यत्वमुपैतीति च । अयं भावः। भ्रमः अन्यथाख्यातिरूपः, देशान्तरस्यासन्निकृष्टत्वेनेन्द्रियग्राह्यत्वासम्भवात् । वैशिष्ट्यस्यात्यन्तासत्वे भानायोगाच्च । तथात्वेन अरजतस्याप्यसतो भानापत्तौ असत्ख्यातिप्रवेशापत्तेः। अन्यथाख्यातावसत्ख्यातौ च परोक्षत्वानुपपत्ति

साम्याच्च । तस्मादिहैवाविद्यया कल्पितमित्यभ्युपेयमिति ॥ २५ ॥

परमते अपरोक्षानुभूतिं ध्वनयन् सिद्धान्ते परोक्षतां समर्थयते - तेजोभिरिति ।

तेजोभिरापूर्य जगत्समस्तं
प्रकाशमानः कुरुषे प्रकाशम् ।
विना प्रकाशं तव देवदेव !
न दृश्यते विश्वमिदं क्षणेन ॥ २६ ॥

समस्तं जगत् - शुक्तिरूप्यरज्जुसर्पादि वियदादि च, तेजोभिः - शुक्त्याद्युपहितचैतन्यैः स्वरूपचैतन्येन च, आपूर्य - तादात्म्येनावच्छिद्य, प्रकाशमानस्सन् , प्रकाशत इति प्रकाशं, कुरुषे। अनावृतसाक्षितादात्म्याद्यपरोक्षत्वम् । तच्च देशान्तरीयस्य तुच्छस्य च न सम्भवतीति भावः। तदेवं वैशेषिकादिसिद्धान्यथाख्यातिः बार्हस्पत्यासत्ख्यातिश्च निराकृता । अस्तु तर्हि दिगम्बरमतसिद्धा असत्ख्यातिरेवेत्याशङ्क्याह - विनेति । इदं विश्वं क्षणेन न दृश्यम् , अधिष्ठानसाक्षात्कारेण शीघ्रतरं नश्यतीत्यर्थः। तथा च ज्ञाननिवर्त्यत्वान्मिथ्यात्वमिति भावः। अस्तु तर्हि अधिष्ठानमपि मिथ्यैवेत्याशङ्क्याह - तव प्रकाशं विनेति । तव स्वरूपभूतः प्रकाश एव परं न वाध्यते । निस्साक्षिकस्य वाधस्यासम्भवेन सर्वबाधावधिभूतत्वादिति भावः॥ २६ ॥

परिदृश्यमानस्य प्रपञ्चस्य मिथ्यात्वं युक्त्यन्तरेणापि समर्थयति - अल्पेति।

अल्पाश्रयो नैव बृहन्तमर्थं

धत्तेऽणुरेको न हि विन्ध्यशैलम् ।
त्वद्ध्रूक्रमात्रे जगदेतदस्ति
त्वन्माययैवेति च निश्चिनोमि॥ २७॥

अल्पश्चासावाश्रयश्च अल्पाश्रयः, स्वस्वापेक्षया बृहन्तमर्थं न धत्ते । अत्र दृष्टान्तः एकोऽणुर्विन्ध्यशैलं न हि धत्त इति । ततः किम् ? तत्राह - एतज्जगत् त्वद्ध्रूक्रमात्रे अस्ति । त्वन्माययैव कृतम् , न तु वास्तवमिति निश्चिनोमि - निर्णयामि, स्वप्नसृष्टिवदिति भावः। तथा च भगवता बादरायणेन स्वप्नसृष्टिप्रतिभासकत्वे देशकालाद्यनौचित्यं साधकतया सूत्रितम् "मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्" (ब्र.सू. ३-२-३) इति । सूत्रार्थस्तु - तत्स्वप्नसृष्टिः मायामात्रमेव, कुतः? कार्त्स्न्येन साकल्येन अनभिव्यक्तं उचितदेशकालाद्यसम्बद्धस्वरूपं स्यात्तथा, न ह्यतिसूक्ष्मनाडीमध्ये गिरिनदीसमुद्रादीनामुचितो देशोऽस्ति, न वा निशीथे सूर्यग्रहाद्युचितः कालोऽस्ति इति । स्यादेतत् ॥ २७॥

ननु प्रपञ्चस्य मिथ्यात्वे कार्यक्षमता न स्यात् , तथा च बन्धनिवृत्त्यर्थं शास्त्रमप्यनारम्भणीयं स्यादित्याशङ्क्याह - रज्जाविति ।

रज्जौ भुजङ्गो भयदो यथैव
न जायते नास्ति न चैति नाशम् ।
त्वन्मायया केवलमात्तरूपं
तथैव विश्वं त्वयि नीलकण्ठ॥ २८॥

यथा रज्जौ भुजङ्गो न जायते, नास्ति, नाशं च नैति, तथापि भयं ददातीति

भयदः। तथा त्वन्मायया आत्तरूपम्, असद्विलक्षणस्वरूपवत्। तथा च प्रातिभासिकस्यापि प्रतीतिबलादर्थक्रियाकारितास्ति, किमुत व्यावहारिकस्य प्रपञ्चस्य। तस्मात्तदुच्छेदाय श्रवणादि सार्थकमेवेति भावः। आत्तरूपमित्यनेन सद्विलक्षणस्य कथं कारणतेति शङ्कां व्यावर्तयति - विद्यमानतामात्रेण तदुपपत्तेः। उक्तञ्च खण्डनकृद्भिः - "पूर्वसम्बन्धनियमे हेतुत्वं तुल्यमेव नौ। हेतुसत्त्वबहिर्भूतसत्त्वासत्त्वकथा वृथा॥" इति ॥२८॥

ननु दृश्यस्य सर्वस्य मिथ्यात्वे नीलकण्ठशब्देन सम्बोध्यमानस्य विग्रहविशेषस्यापि मिथ्यात्वापत्तौ तत्र विश्वस्याध्यासं कथमिहैव ब्रूषे, व्याघातात् इत्याशङ्क्य उपलक्षितचिन्मात्राभिप्रायेणेदं ब्रवीमीत्याह - विचार्यमाण इति।

विचार्यमाणे तव यच्छरीरमाधारभावं जगतामुपैति।
तदप्यवश्यं मदविद्ययैव पूर्णश्चिदानन्दमयो यतस्त्वम् ॥२९॥

अविचारदशायां परं परिच्छिन्नस्याधिष्ठानतेति मम भ्रमः स्थितः, यद्वशात् "परिच्छिन्नपरीमाणे देहे भगवतस्तव" (७-२) इत्यादि प्रागप्राक्षम्। इदानीं तु त्वत्कृपाबलादित्थं निरचैषमिति भावः। यदि दण्डवत् शरीरं जगतामाधारभावमुपैति आधारतया उपलक्ष्यते तच्छरीरमपि मम अविद्ययैव, चिदानन्दमयो यतः त्वम्। तथा च पूर्णे त्वयि लीलाविग्रह प्रपञ्चयोराधाराधेयभावश्चेति सर्वमध्यस्तम्। अत एव "अपाणि पादोऽहम्" (६-५६) इत्यादि पूर्वोक्तमपि सङ्गच्छत इति भावः॥२९॥

तदेवं परिच्छिन्नपरिमाण इत्यत्रोपन्यस्ते प्रथमप्रश्ने उत्तरं लब्धमित्युक्तम्।

इदानीं एकस्य वहुभिरभेदः कथमित्येवं रूपे द्वितीयप्रश्नेऽपि उत्तरं लब्धं मयेत्याह - पूजेष्टेति ।

पूजेष्टपूर्तादिफलं क्रियाणां[८२]
भोक्तुः फलं यच्छति शस्तमेव[८३] ।
मृषैतदेवं वचनं पुरारे !
त्वत्तोऽस्ति भिन्नं न च किञ्चिदेव ॥३०॥

हे पुरारे ! किञ्चित् - एकमपि, प्रपञ्चजातं त्वत्तो भिन्नं नास्ति । तत्किं कर्मकाण्डादिश्रुतिर्मिथ्यार्थबोधिका ? एवमेवेत्याह - मृषेति । एतत् - पूर्वार्धप्रतिपादितार्थकं एवं तज्जातीयमन्यच्च वचनं मृषा इत्यन्वयः। तत्किमप्रमाणमेवेत्याह - शस्तमेवेति । अवान्तरतात्पर्यपर्यालोचनायां व्यावहारिकलाभाद्यर्थबोधकत्वेन, महातात्पर्यपर्यालोचनायां तु "वेदैश्च सर्वैरहमेव" इति कैवल्योपनिषत्प्रतिपादितरीत्या ब्रह्मपरत्वेन प्रमाणमेवेत्यर्थः। एतद्वचनमित्यत्र एतच्छब्देन निर्दिष्टमर्थमाह - पूजेति । पूजा - देवपूजा, इष्टं - यागः, पूर्तं - तटाकारामादि । तथा क्रियाणां फलं - स्वर्गादि । तच्च भोक्तुः - यज्वनः, फलं प्रयच्छति, "फलमत उपपत्तेः" (ब्र.सू. ३-२-३८) इति न्यायात् । "तृप्त एवैनमिन्द्रः प्रजया पशुभिस्तर्पयति" (तै.सं. २-५-४) इत्यादिश्रुतेश्चेति भावः॥३०॥

---

८२ "पूजेष्टपूर्तादिवरक्रियाणा"मिति पाठान्तरम् ।

८३ "विश्वमेवे"ति पाठान्तरम् ।

अज्ञानमूढा मुनयो[८४] वदन्ति
पूजोपचारादिबहिःक्रियाभिः।
तोषं गिरीशो भजतीति मिथ्या
कुतस्त्वमूर्तस्य तु भोगलिप्सा ॥३१॥

अयं भावः। दूरस्थवनस्पत्योरैक्यवदाविद्यकमैक्यं मिथ्याभूतमेव गृहीत्वा सर्वं ब्रह्मेति व्यवहारः। न चैवमपि व्यावहारिकतया समानसत्ताकयोः भेदाभेदयोरनुपपत्तिरेवेति वाच्यम् । चन्द्रप्रादेशिकत्वादेः प्रतिबिम्बे अधिष्ठानावच्छिन्नाकाशादौ चागत्या समानसत्ताकयोरपि भेदाभेदयोः अभ्युपगमात् । अस्तु वा कश्चिदाविद्यको धर्म एव तादात्म्यं पराभ्युपेतसमवायादिस्थानापन्नः। अस्तु भिन्नत्वे सत्यभिन्नसत्ताकत्वम् , सर्वथाप्यद्वैताविरोधिन्यां प्रक्रियायां आग्रहाभावात् । अत एवाविद्यावद्विषयकाणि शास्त्राणीत्याह - अज्ञानेति । अज्ञानेन मूढाः, अत एव मननशीला मुनयः, मननस्योपलक्षणत्वात् , अन्तःकरणशुद्ध्युपायासम्भावनादिनिवृत्त्युपायान् अन्वेषयन्तः पुरुषाः, पूजादिभिः गिरीशस्तोषं भजतीति वदन्ति । यद्वा अज्ञानमूढाः - अज्ञानजडास्सन्तः, वदन्ति - अविद्यादशामाश्रित्य प्रतिपादयन्तीत्यर्थः। तस्य अविद्यादोषस्य मायावृत्तिरूपत्वात् । न ह्यमूर्तस्य लिप्सादयो वास्तवास्सन्तीति भावः॥३१॥

अस्यैव प्रपञ्चः - किञ्चिदिति ।

---

८४ "अज्ञानमूढामुनयः" इति पाठान्तरम् । अज्ञानेन मूढाश्च ते अमुनयश्च अमननशीलाश्च इत्यर्थः।

किञ्चिद्दलं वा चुलुकोदकं वा
यत्त्वं महेश ! प्रतिगृह्य दत्से।
त्रैलोक्यलक्ष्मीमपि यज्जनेभ्यः
सर्वं त्वविद्याकृतमेव मन्ये ॥३२॥

दलं - तुलसीविल्वादिपत्रम् , यत्किञ्चिदेव भक्तेनोपहृतम् । प्रतिगृह्य - स्वीकृत्य, जनेभ्यः - भक्तेभ्यः, त्रैलोक्यलक्ष्मीमपि दत्से - ददासीति यत् तत्सर्वम् - उपहारप्रतिग्रहः त्रैलोक्यदानं चेति सर्वम् , अविद्याकृतमेव - आविद्यकमेवेति, मन्ये - निश्चिनोमि । अविद्याकृतमित्यनेन पूर्वश्लोकस्थमिथ्याशब्दस्यानिर्वचनतावचनत्वं न त्वपह्नवपरत्वमिति स्फुटीकृतम् । यथाहुः वार्तिककाराः - "यया यया भवेत्पुंसां व्युत्पत्तिः प्रत्यगात्मनि । सा सैव प्रक्रियेह स्यात् साध्वी सा चानवस्थिता॥" (बृ.वा. १-४-४०२) इति । भिन्नं किमपि नास्त्येवेति तु निष्कर्षः। तदुक्तं वाचस्पतिमिश्रैः - "न ह्यभेदं ब्रूमः किन्तु भेदं व्यासेधाम" इति । इदमेवोच्यते बाधायां सामानाधिकरण्यमिति दिक् ॥३२॥

व्याप्नोषि सर्वा विदिशो दिशश्च
त्वं विश्वमेकः पुरुषः पुराणः।
नष्टेऽपि तस्मिंस्तव नास्ति हानिः
घटे विनष्टे नभसो यथैव॥३३॥

व्याप्नोषीति । एकः पुराणपुरुषः त्वं विश्वं व्याप्नोषि अधिष्ठानत्वेन तादात्म्यापन्नस्सन् । यथैव घटे विनष्टे नभसो हानिर्नास्ति तद्वत् तस्मिन्

विश्वस्मिन् नष्टेऽपि तव हानिर्नास्ति । वास्तवेऽभेदे ह्येवं स्यात् कल्पित तादात्म्ये तु नायं दोषः। रजतादिबाधेऽपि शुक्त्याद्यवस्थानदर्शनादिति भावः। घटे विनष्ट इति तु एकसम्बन्धिनाशेऽपि अपरसम्बन्धिनो न क्षतिरित्यस्मिन्नंशे दृष्टान्त इति बोध्यम् ॥३३॥

ननूक्तरीत्या वियदादेर्मिथ्यात्वेऽपि जीवानां वहुत्वादद्वैतक्षतिः स्यादेव। न हि वियदादिवज्जीवोऽपि मिथ्येति युक्तम् , बन्धमोक्षयोर्वैयधिकरण्यापत्ते-रित्याशङ्क्याह - यथेति ।

यथैकमाकाशगमर्कबिम्बं
क्षुद्रेषु पात्रेषु जलान्वितेषु ।
भजत्यनेकप्रतिबिम्बभावं
तथा त्वमन्तःकरणेषु देव ! ॥३४॥

हे देव ! त्वमन्तःकरणेषु तथा अनेकप्रतिबिम्बभावं भजसि । कथम् ? यथा आकाशगमेकमेवार्कबिम्बं क्षुद्रेषु जलान्वितेषु पात्रेषु अनेकप्रतिबिम्बभावं भजति । अनेन "यथा ह्ययं ज्योतिरात्मे"ति[८५] श्रुतिः अर्थतः उपनिबद्धा । तथा जीवानामपारमार्थिकत्वेऽपि भेदस्याध्यस्तत्वान्नाद्वैतक्षतिरिति भावः॥३४॥

ननु परमार्थतः सच्चिदानन्दरूपत्वं मिथ्याभूतशरीरवत्त्वं च जीवब्रह्मणोरविशिष्टम् । तथा च संसारिता भगवतोऽपि स्यादित्याशङ्क्याह - सुसर्जन इति ।

---

८५ "यथा ह्ययं ज्योतिरात्मा विवस्वानपो भिन्ना वहुधैकोऽनुगच्छन् । उपाधिना क्रियते भेदरूपो देवः क्षेत्रेष्वेवमजोऽयमात्मा ॥" इति श्रुतिः।

सुसर्जने वाप्यवने विनाशे
विश्वस्य किञ्चित्तव नास्ति कार्यम् ।
अनादिभिर्देहभृतामदृष्टैः
तथापि तत्स्वप्नवदातनोषि ॥३५॥

विश्वस्य सृष्टिस्थितिविलयेषु सत्सु तत्प्रयुक्तं कार्यं तव किमपि नास्ति। अनाहितस्वरूपत्वेन पूर्णानन्दस्य सर्वदा प्राप्तत्वात् । यद्यप्येवम् , तथाऽपि अनादिभिः - प्रवाहानादिभिः, देहभृतां - जीवानाम्, अदृष्टैस्सहकारिभूतैः, स्वप्नवत् , तत् - सर्गादि, आतनोषि । तथा च सूत्रं "वैषम्यनैर्घृण्ये न सापेक्षत्वात्तथा हि दर्शयति" (ब्र.सू. २-१-३४) इति । एवं चावरणतदभावाभ्यां वैलक्षण्यम्, औपाधिकवशादात्मत्वम्, प्रतिबिम्ब मुखमिव आवरणस्यापि जीवेष्वेव व्यवस्थितत्वादिति भावः॥३५॥

ननु स्थूलशरीरस्यैव प्रमातृत्वकर्तृत्वादिकमिति लोकायतिका आहुः। अहङ्कारात्मकसूक्ष्मदेहस्य प्रमातृत्वादिकमिति साङ्ख्याः। तदुभयं विहाय चैतन्ये तथाऽन्वयः किमर्थं स्वीकर्तव्य इत्याशङ्क्याह - स्थूलस्येति ।

स्थूलस्य सूक्ष्मस्य जडस्य भोगो
देहस्य शम्भो ! न चिदं विनाऽस्ति।
अतस्त्वदारोपणमातनोति
श्रुतिः पुरारे ! सुखदुःखयोस्सदा ॥३६॥

हे शम्भो ! स्थूलस्य सूक्ष्मस्य वा देहस्य परिणामभूता चेतना चेत्तर्हि

जडस्य परिणामभूता सा जडैव स्यात् । ततः किम् ? तत्राह – चित् अं विनेति । अततीति अः, आत्मा । 'अत सातत्यगमने' डप्रत्ययः। यद्वा अयते प्रकाशयते इति अतः, साक्षी। 'अय गतौ' णिच् , क्विप् , तुक् । अतिप्रसङ्गात् तं विना नास्ति । अयं भावः, जडपरिणामो जडः स्यात् । स चास्य प्रकाशात्मन एव । अस्य सम्बन्धादेव भासत इत्यभ्युपेयम् । सम्बन्धश्चाध्यासिक एवेति सिद्धश्चैतन्येऽपि कर्तृत्वादिसम्बन्धः। स च जन्यज्ञानमेव स्वप्रकाश इति युक्तम् । बहूनां स्वप्रकाशत्वे गौरवेण सुषुप्त्यनुसन्धानबलसिद्धस्य एकस्यैव स्वप्रकाशत्वकल्पनात् , तस्यैव चात्मत्वात् । स चायं केवलस्तवैव । किन्तु एतदवष्टम्भा श्रुतिरपि चैतन्ये सम्बन्धं दर्शयतीत्याह - अत इति । अतः - उक्तरीत्या, निर्णीततात्पर्यका कैवल्योपनिषत्प्रभृतिका श्रुतिः, जीवः सुखदुःखभोक्तेति, सुखदुःखयोः, त्वदारोपणम् - प्रतिविम्बीभूते त्वय्यारोपं, सदा - यावद्ध्वंसम्, आतनोति। उत्तरमीमांसायां "कर्ता शास्त्रार्थवत्त्वात्" (ब्र.सू. २-३-३३) इत्यधिकरणमपीहानुसन्धेयम् ॥ ३६ ॥

नमस्सच्चिदम्भोधिहंसाय तुभ्यं
नमः कालकण्ठाय कालात्मकाय ।
नमस्ते समस्ताघसंहारकर्त्रे
नमस्ते मृषा चित्तवृत्त्येकभोक्त्रे ॥ ३७ ॥

सच्चिदम्भोधौ हंस इव तस्मै । लीलाविग्रहस्य कर्पूरगौरतया हंसत्वेनोत्प्रेक्षा। मृषाभूतानां चित्तवृत्तीनां एकस्मै असाधारणाय भोक्त्रे - सुखदुःखादिनिखिलमनोवृत्तिसाक्षिणे इत्यर्थः ॥ ३७ ॥

सूत उवाच -

एवं प्रणम्य विश्वेशं पुरतः प्राञ्जलिः स्थितः।
विस्मितः परमेशानं जगदे रघुनन्दनः॥ ३८॥

पुरत इति । सन्निधानाद्विश्वेश्वरस्य पुरतः स्थितः, जगदे - जगाद । जगदेत्यार्षमात्मनेपदम् ॥ ३८॥

श्रीराम उवाच -

उपसंहर विश्वात्मन् ! विश्वरूपमिदं तव।
प्रतीतं जगदैकात्म्यं शम्भो ! भवदनुग्रहात् ॥ ३९॥

श्रीभगवानुवाच -

पश्य राम ! महाबाहो मत्तो नान्योऽस्ति कश्चन ॥ ४०॥

सूत उवाच -

इत्युक्त्वैवोपसंजह्रे स्वदेहे देवतादिकान् ।
मीलिताक्षः पुनर्हर्षाद्यावद्रामः प्रपश्यति ।
तावदेव गिरेः शृङ्गे व्याघ्रचर्मोपरिस्थितम् ॥ ४१॥

ददर्श पञ्चवदनं नीलकण्ठं त्रिलोचनम् ।
व्याघ्रचर्माम्बरधरं भूतिभूषितविग्रहम् ॥ ४२॥

फणिकङ्कणभूषाढ्यं नागयज्ञोपवीतिनम् ।

व्याघ्रचर्मोत्तरीयं च विद्युत्पिङ्गजटाधरम् ॥४३॥

पश्येति पूर्वार्धं भगवद्वाक्यं उत्तरार्धादारभ्य सूतवाक्यम् । व्याघ्रचर्मैवाम्बरं तस्य धरम् - अन्तरीयरूपेण धारकम् । उत्तरीयस्योत्तरश्लोके पृथगुपादानात् ॥३९-४३॥

एकाकिनं चन्द्रमौलिं वरेण्यमभयप्रदम् ।
चतुर्भुजं खण्डपरशुं मृगहस्तं जगत्पतिम् ॥४४॥

अथाज्ञया पुरस्तस्य प्रणम्योपविवेश सः ॥४५॥

अथाह रामं देवेशो यद्यत्प्रष्टुमभीच्छसि ।
तत्सर्वं पृच्छ राम ! त्वं मत्तो नान्योऽस्ति ते गुरुः ॥४६॥

॥ इति श्रीपद्मपुराणे शिवगीतासूपनिषत्सु
विश्वरूपदर्शनं नाम सप्तमोऽध्यायः॥

मृगहस्तमिति । मृगो हस्ते यस्येति विग्रहे आहिताग्न्यादित्वाद्वा गड्वादेः परा सप्तमीति वा समर्थयितव्यम् । यद्वा मृगाध्यासितो हस्तो यस्येति तथा, लक्षणया च साहित्यलाभः। न तु मध्यमपदलोपी समासः, प्रकृते तद्विधायकानामप्रवृत्तेः, भाष्यकारैस्सर्वत्र तत्प्रत्याख्यानाच्चेति दिक् । परशुमृगावूर्ध्वहस्तद्वये बोध्यौ । तथा च द्वादशाध्याये वक्ष्यति "पराभ्यामूर्ध्वहस्ताभ्यां बिभ्राणं परशुं मृगम्" (१२-३०) इति॥४४-४६॥

॥ इति श्रीमद्विशुद्धाद्वैतसिद्धान्तप्रतिष्ठापनैकधुरन्धर
श्रीमच्छङ्करानन्दभारतीविरचिते शिवगीताभाष्ये सप्तमोऽध्यायः॥

अष्टमोऽध्यायः

सप्तमाध्यायशेषे शम्भुनोक्तं "यद्यत्प्रष्टुमभीच्छसि तत्सर्वं पृच्छ राम ! त्व"मिति । तदेवोपजीव्य लोकान् प्रति विरक्त्यादिदार्ढ्योपायभूतं शरीरादिनिस्सारत्वं महेश्वरमुखेनैव प्रकटीकर्तुं स्वयं प्रागुक्तरीत्या निर्णीततत्त्वस्सन्नपि पृच्छति - पाञ्चभौतिकेति।

श्रीराम उवाच -

पाञ्चभौतिकदेहस्य चोत्पत्तिर्विलयः स्थितिः।
स्वरूपं च कथं देहे[८६] भगवन् ! वक्तुमर्हसि ॥ १ ॥

देहे - लिङ्गशरीरे, पाञ्चभौतिकदेहस्य - स्थूलशरीरस्य, उत्पत्त्यादिकं कथम् ? वक्तुमर्हसि ॥ १ ॥

श्रीभगवानुवाच -

पञ्चभूतैस्समारब्धो देहोऽयं पाञ्चभौतिकः।
तत्र प्रधानं पृथिवी शेषाणां सहकारिता ॥ २ ॥

प्रधानमिति। पृथिव्यंशभूतस्य भूयस्त्वादिति भावः। शेषाणामिति - जलादीनामित्यर्थः, तदंशस्याल्पीयस्त्वादिति भावः ॥ २ ॥

जरायुजोऽण्डजश्चैव स्वेदजश्चोद्भिदस्तथा ।
एवं चतुर्विधः प्रोक्तो देहोऽयं पाञ्चभौतिकः ॥ ३ ॥

---

८६ "स्वरूपं च कथं देवे"ति पाठान्तरम् ।

उद्भिनत्ति भूमिमित्युद्भिदः वृक्षादिः, इगुपधलक्षणः कप्रत्ययः ॥ ३ ॥

मानसोऽपि परः प्रोक्तो देवानामेव स स्मृतः।
तत्र वक्ष्ये प्रथमतः प्रधानत्वाज्जरायुजम् ॥ ४ ॥

प्रधानत्वादिति । धर्माधर्मादिसाधनतया पुरुषार्थसाधनत्वेन मनुष्यदेहस्य अभ्यर्हितत्वादिति भावः ॥ ४ ॥

शुक्लशोणितसम्भूत वृत्तिरेव[८७] जरायुजः।
स्त्रीणां गर्भाशये शुक्लमृतुकाले विशेद्यदा ।
रजसा योषितो युक्तं तदेतत् स्याज्जरायुजम् ॥ ५ ॥

शुक्लशोणिताभ्यां सम्भूता वृत्तिरुत्पत्तिर्यस्य तथाभूत एव, न तु तन्निरपेक्षोत्पत्तिकोऽपि । जरायोर्जातः जरायुजः। स्त्रीणामिति । गर्भ आशेतेऽस्मिन्निति गर्भाशयः, पेशीविशेषो जरायुशब्दवाच्यः। "गर्भाशयो जरायुस्स्या"दित्यमरः। तस्मिन् यदा शुक्लमृतुकाले वक्ष्यमाणलक्षणे विशेत् तदा योषितो रजसा युक्तं तदेव शुक्लं जरायुजं स्यात् ॥ ५ ॥

बाहुल्याद्रजसः स्त्री स्याच्छुक्लाधिक्ये पुमान् भवेत् ।
शुक्लशोणितयोस्साम्ये जायते तु नपुंसकः ॥ ६ ॥

बाहुल्यादिति । रजसो बाहुल्यात् स्त्री, शुक्लाधिक्यात् पुमान् , शुक्लशोणितयोः साम्ये तु नपुंसको भवति, षण्डो भवतीत्यर्थः। न स्त्री

---

८७ "शुक्लशोणितसम्भूतावृत्तिरेवे"ति पाठान्तरम्।

पुमान् नपुंसकः "नभ्राण्नपा"दिति (पा.सू. ६-३-७५) साधुः। "तृतीयाप्रकृतिष्षण्डो क्लीवः पण्डो नपुंसक" इत्यमरः। "नपुंसको भवे"दिति महाभाष्यप्रयोगात् पुल्लिङ्गपाठोऽपि साधुरेव॥ ६ ॥

ऋतुस्नाता भवेन्नारी चतुर्थदिवसे ततः।
ऋतुकालस्तु निर्दिष्ट आषोडशदिनावधि ॥७॥
तत्रायुग्मदिने स्त्री स्यात् पुमान् युग्मदिने भवेत् ॥८॥

ऋतुस्नातेति । अत्रोत्तरार्धं पृथग्वाक्यम् , प्रथमतृतीयार्धयोश्च सम्वन्धः। तद्यथा षोडशदिनरूपो अवधिष्षोडशदिनावधिः। तमभिव्याप्येत्याषोडश दिनावधि । तथा च रजोदर्शनादारभ्य षोडशदिवसात्मकः ऋतुकालो निर्दिष्टः, शास्त्रकारैरिति शेषः। एवं स्थिते नारी चतुर्थदिवसे ऋतुस्नाता भवेत् । ततः - चतुर्थदिवसानन्तरम्, तत्र - ऋतौ, अयुग्मदिने - पञ्चमादौ, स्त्री स्यात् । युग्मदिने - षष्ठादौ, पुमान् भवेत् । यद्यपि रजोबाहुल्यादिकं स्त्रीत्वादौ हेतुतया प्रागुक्तम् । तथाप्ययुग्मायां रजोबाहुल्ये युग्मायां शुक्लबाहुल्ये च तावदविरोध एव । यदा त्वयुग्मायां शुक्लबाहुल्यं तदा तु पुमानेव भवति, न तु स्त्र्याकृतिः। कालरूपनिमित्तकारणापेक्षया उपादानकारणीभूतस्य रजसः प्राबल्यादिति विज्ञानेश्वरप्रभृतयः। एवं युग्मायां रजोबाहुल्येऽपि स्त्रीवपुराकृतिर्भवतीति बोध्यम् ।

अत्र च षोडशदिनात्मकं ऋतुं निर्दिश्य चतुर्थदिवसानन्तरमेव पुत्राद्युत्पत्तिं वदता आद्यचतुष्टयं वर्ज्यमिति सूचितम् । तथा च याज्ञवल्क्यः - "षोडशर्तुर्निशाः स्त्रीणां तस्मिन् युग्मासु संविशेत् । ब्रह्मचर्येण पर्वाण्याद्याश्चतस्रश्च वर्जयेत्॥" इति। तत्र चतुर्थ्यां रात्रौ वैकल्पिकं गमनं

बोध्यम् । विहितप्रतिषिद्धत्वात् । तथा च हारीतो विदधाति "चतुर्थेऽहनि स्नातायां गर्भाधान"मिति, व्यासस्तु निषेधति "चतुर्थे सा न गन्तव्ये"ति । व्यवस्थितश्चायं विकल्पः, रजोनिवृत्तौ सत्यां चतुर्थ्यां गन्तव्या, तदनिवृत्तौ प्रतिषेधति । तथा च मनुः - "रजस्युपरते साध्वी स्नानेन स्त्री रजस्वला" इति । साध्वी - गर्भाधानयोग्येत्यर्थ इति माधवादयः। आपस्तम्बोऽपि "स्नानं रजस्वलायास्तु चतुर्थेऽहनि शस्यते। गम्या निवृत्ते रजसि नानिवृत्ते कथञ्चन ॥" इति॥८॥

षोडशे दिवसे गर्भो जायते यदि सुभ्रुवः।
चक्रवर्ती तदा राजा जायते च न संशयः॥९॥

राजा क्षत्रियः। तथा चावेष्ट्यधिकरणे राजशब्दः क्षत्रियत्वजातिवाचकः, न तु प्रजापरिपालनमात्रनिमित्त इति स्थितम् । ब्राह्मणष्षोडश्यां ज्ञानसम्पन्नो भवतीति बोध्यम् । तदुक्तं लिङ्गपुराणे - "चतुर्थे सा न गम्याऽहि गन्ताऽल्पायुः प्रसूयते। विद्याहीनं व्रतभ्रष्टं पतितं पारदारिकम्। दारिद्र्यार्णवमग्नञ्च तनयं वा प्रसूयते ॥ कन्यार्थी नैव गन्तव्या पञ्चम्यां विधिवत्पुनः॥ षष्ठ्यां गम्या महाभाग ! सत्पुत्रजननी भवेत् । सप्तम्यां चैव कन्यार्थी गच्छेत् सैव प्रसूयते॥ अष्टम्यां चैव तनयं सम्पन्नं सम्प्रसूयते। नवम्यां दारिकार्थः स्याद्दशम्यां पण्डितं तथा । एकादश्यां कन्यका स्याद् द्वादश्यां कुशलस्सुतः। त्रयोदश्यां तथा नारी वर्णसङ्करकारिणी । चतुर्दश्यां यदा गच्छेत् सुपुत्रजननी भवेत् । पञ्चदश्यां च धर्मज्ञं षोडश्यां ज्ञानपारगम् ॥" इति ।

स्यादेतत् । शिवगीतासु प्रकृतश्लोकस्य क्षत्रियविषयत्वमसङ्गतम् , तेषां

चतुर्दशदिवसस्यैव ऋतुगमनचरमावधिभूतत्वात् । तथा च जातिभेदन उपगमनकालविशेषमाह देवलः - "ब्राह्मणं द्वादशाहं स्याद्वेदोक्त ऋतुसङ्गमः। दशाष्टौ षट् च शेषाणां विधीयन्तेऽनुपूर्वशः॥" इति। पञ्चमदिवसादारभ्य द्वादशाहादिसङ्ख्या अवगन्तव्येति माधवादयः। न च ऋतौ गच्छेदेवेति नियमस्य क्षत्रियं प्रति चतुर्दशदिवसपर्यन्तमेवोक्तरीत्या प्रवृत्तावपि तदुत्तरकाले गमनाप्रसक्तिः केन वार्यत इति वाच्यम् । अनृतौ गमनस्य निषिद्धत्वात् । यथाऽऽह बोधायनः - "ऋतौ नोपैति यो भार्यामनृतौ यश्च गच्छति। तुल्यमाहुस्तयोः पापं योनौ यश्च निषिञ्चति॥" इति । अस्य च निषेधस्य क्षत्रियं प्रति पञ्चदशदिवसमारभ्य प्रवृत्तिः। न च निषेधोल्लङ्घनेन प्रवृत्तस्य षोडशदिवसर्तुकालबलेन चक्रवर्ती पुत्रो भवतीति प्रकृतग्रन्थार्थ इति युक्तम् । चतुर्थदिवसे तत इत्यादिपूर्वग्रन्थस्वरसेन अनिषिद्धानामेवेह वक्तुमुचितत्वादिति चेन्न । "यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्" इति याज्ञवल्क्यादिवचनैः स्त्रीकामनायां च सत्यां अनृतावपि गमनस्य नियमिततया तेन 'अनृतौ न गच्छे'दिति निषेधस्य स्वविषये बाधेन तत्फलपरत्वस्यैव शिवगीतावाक्ये अभिप्रेततया सर्वसामञ्जस्यात् । न चैवं 'यथाकामी भवे'दित्यनेन "अनृतौ न गच्छे"दिति निषेधस्येव इतरेषामपि निषेधानां बाधापत्तिः। सन्ति चेतरे निषेधाः, "मघा मूलं च वर्जयेत्" इति याज्ञवल्क्योक्तेः, "अमावास्यामष्टमीं च पौर्णमासीं चतुर्दशीम् । ब्रह्मचारी भवेन्नित्यमप्यृतौ स्नातको द्विजः॥" इति मनूक्तेः इति वाच्यम् । यथा कामीत्यस्य उक्तदोषरहितमात्रतया वचनबलेन व्यवस्थापनात् । तथा च विष्णुपुराणे तृतीयांशे उक्तमिति मत्वा "स्वदारेषु ऋतुमत्यां नरो व्रजेत् । यथोक्तदोषहीनेषु सकामेष्वनृतावपि॥" इति। एतेन श्राद्धादिदिवसेऽपि नियमद्वयोपष्टम्भेन अतिप्रसङ्गापादनं परास्तम् ।

यत्तु 'ऋतौ गच्छेदेवे'ति नियमस्य श्राद्धादौ ब्रह्मचर्यविधानस्य परस्परपरिहारेण लब्धावकाशस्य सामान्यविशेषभावापन्नस्य एकत्र प्रसक्तौ किं बाध्यमिति संशये "गच्छतोऽपि न ब्रह्मचर्यभङ्ग" इत्याशयेन ब्रह्मचार्येवेति विज्ञानेश्वरेण व्याख्यातं तच्चिन्त्यम्। "ऋतुकालं नियुक्तो वा नैव गच्छैत् स्त्रियं क्वचित्" इति श्राद्धप्रकरणस्थवृद्धमनुवचनविरोधः स्यात् । "तस्मान्नार्तवेऽपि दिवा व्रजेत्" इति शङ्खलिखितस्मृति प्रतिकूलतया उपन्यस्तम् , अथर्वणश्रुतेर्वा । याज्ञवल्क्यग्रन्थेऽपि ब्रह्मचर्योक्तिरर्थवादरूपेति माधवाचार्यप्रभृतीनां ग्रन्थ एव प्रबल इति दिक् । श्रुतिस्त्वित्थम् "प्राणं वा एते प्रस्कन्दन्ति ये दिवा रत्या संयुज्यन्ते ब्रह्मचर्यमेव तद्यद्रात्र्या संयुज्यन्त" इति ॥९॥

ऋतुस्नाता यस्य पुंसः साकाङ्क्षं मुखमीक्षते ।
तदाकृतिर्भवेद्गर्भस्तत्पश्येत् स्वामिनो मुखम् ॥१०॥

तत्पश्येदिति । तत् - तस्मात्कारणात् , "यत्तद्यतस्ततो हेता"वित्यमरः ॥१०॥

जरायुजशब्दस्य योगरूढतां दर्शयिष्यन्नुपपदार्थांस्तावदाह - या स्त्रीति ।

या स्त्रीचर्मावृतिः[८८] सूक्ष्मा जरायुस्सा निगद्यते।
शुक्लशोणितयोर्योगः तस्मिन्नेव भवेद्यतः॥
तत्र गर्भो भवेद्यस्मात्तेन प्रोक्तो जरायुजः॥ ११ ॥

सूक्ष्मा या, स्त्रीचर्मावृतिः - स्त्रीसम्बन्धिनी चर्मरूपा आवरणसाधनी भूता

---

८८ "याऽस्ति चर्मावृति"रिति पाठान्तरम्।

पेशी, सा जरायुरिति निगद्यते । यद्यपि "गर्भाशयो जरायुः स्या"दित्यमरेण जरायुशब्दः पुल्लिङ्ग एवोक्तः। "साहचर्याच्च कुत्रचि"दिति परिभाषितत्वात् । तथापि उद्देश्यलिङ्गानुरोधः, तेन "जरायुस्से"ति निर्देशो न विरुध्यते, "कर्मणा यमभिप्रैति स सम्प्रदानम्" (पा.सू. १-४-३२) इतिवत् । यदा तु विधेयलिङ्गानुरोधः तदा "जरायुस्स" इत्यपि प्रयोगः साधुः, "णेरणौ यत्कर्म णौचेत्स कर्ते"तिवत् (पा.सू. १-३-६७)। अत एवाह कैयटः - "निर्दिश्यमानप्रतिनिर्देशमानयोरेकत्वमापादयन्ति सर्वनामानि क्रमेणोभयलिङ्गभाञ्जी"ति । तस्मिन् जरायौ यतो योगः तस्मात्तत्र जरायौ गर्भो भवेत् । यस्माच्च जरायौ भवेत् तेन हेतुना जरायुजः प्रोक्तः इति तस्माच्छब्दाध्याहारेण तत्र गर्भो भवेदिति पदत्रयस्य चावृत्या योज्यम् ॥ ११ ॥

अण्डजाः पक्षिसर्पाद्याः स्वेदजा मशकादयः।
उद्भिज्जा वृक्षगुल्माद्याः मानसाश्च सुरर्षयः॥ १२॥

जन्मकर्मवशादेव निषिक्तं स्मरमन्दिरे ।
शुक्लं रजस्समायुक्तं प्रथमे मासि तद्द्रवम् ॥ १३॥

जन्मकर्मेति । जन्म - जननं,जातिविशेषावच्छिन्नशरीरोत्पत्तिः, तदनुकूलं यत्कर्म, तद्वशादेव स्त्रीयोनौ निषिक्तं शुक्लं रजसा सहितं द्रवीभूतं सत् प्रथमे मासि तिष्ठति ॥ १२-१३ ॥

बुद्बुदं कललं तस्मात्ततः पेशी भवेदिदम् ।
पेशी घनं द्वितीये तु मासि पिण्डः प्रजायते ॥ १४॥

करांघ्रिशीर्षकादीनि तृतीये सम्भवन्ति हि ।
अभिव्यक्तिश्च जीवस्य चतुर्थे मासि जायते ।
ततश्चलति गर्भोऽपि जनन्या जठरे स्वतः ॥ १५ ॥

बुद्बुदमिति । इदं पूर्वोक्तद्रवीभूतं शुक्लं यत् तद्बुद्बुदं कललं पेशी घनं च भवतीति प्रथममासमध्ये क्रमाद्भाविन्यश्चतस्त्रोऽवस्था निर्दिष्टाः। द्वितीयमासे तु पिण्डो जायते । अभिव्यक्तिश्चेति । जीवस्य - जीवोपाधेः लिङ्गशरीरस्येति यावत् । अभिव्यक्तिः - सुखाद्यभिव्यक्तिः, चतुर्थे मासि जायते । ततः - दुःखाद्यभिव्यक्तेर्हेतोः, जनन्याः जठरे, स्वतोऽपि - स्वत एव, गर्भश्चलति॥ १४-१५॥

पुत्रश्चेद्दक्षिणे पार्श्वे कन्या वामे च तिष्ठति ॥ १६ ॥
नपुंसकस्तूदरस्य भागे तिष्ठति मध्यमे[८९] ॥ १७ ॥
अतो दक्षिणपार्श्वे तु शेते माता पुमान् यदि॥
अङ्गप्रत्यङ्गभागाश्च सूक्ष्मास्स्युर्युगपत्तदा ॥ १८ ॥

अङ्गेति । तदा - चतुर्थमासे, करचरणाद्यङ्गानि, प्रत्यङ्गानि गुल्फादीनि, तेषां भागाः अंशाः, सूक्ष्माः युगपत् स्युः ॥ १६-१८ ॥

विहाय श्मश्रुदन्तादीन् जन्मानन्तरसम्भवान् ।
चतुर्थे व्यक्तता तेषां भावानामपि जायते[९०] ॥ १९ ॥

८९ "मध्यतः" इति पाठान्तरम् ।

९० "भावानामुपजायते" इति पाठान्तरम् ।

श्मश्रुदन्तादीन् विहाय - तथा च श्मश्रुप्रभृतयः परं न जायन्ते, इतरे करचरणप्रभृतयः सूक्ष्माः जायन्ते प्रथमम्, पश्चात् चतुर्थ एव, तेषां - कराद्यवयवानां व्यक्तता जायते। तथा भावानामपि वक्ष्यमाणानां चतुर्थ एव व्यक्तता जायते ॥ १९ ॥

के ते भावाः? इत्याकाङ्क्षायामाह - पुंसामिति ।

पुंसां स्थैर्यादयो भावा भूतत्वाद्याश्च योषिताम् [९१]**।**
नपुंसके च ते मिश्रा भवन्ति रघुनन्दन ! ॥ २० ॥

भूतत्वं - चाञ्चल्यम् । "भूतमेति ब्राह्मणी"ति महाभाष्यप्रयोगस्य तथैव व्याख्याततत्वात् ॥ २० ॥

मातृजं चास्य हृदयं विषयानभिकाङ्क्षति।
ततो मातुर्मनोभीष्टं कुर्याद्गर्भविवृद्धये ।
तां च द्विहृदयां नारीमाहुर्दौहृदिनीं ततः ॥ २१ ॥

मातृजमिति । यतो मातृजमतो मातुराकाङ्क्षितानेव विषयानभिकाङ्क्षति । अत एव गर्भविवृद्धये मातुर्मनसो यद्यदन्नपानाद्यभीष्टं तत्तत्कुर्यात् । तां चेति । तां - गर्भस्थेच्छासमानाकारेच्छावतीम्, अत एव द्वे हृदये यस्यां तां नारीं दौहृदिनीमाहुः। पृषोदरादित्वात् साधुः। उक्तं च सुश्रुते - "द्विहृदयां नारीं दौहृदिनीमाचक्षते तदभिलषितं दद्याद्वीर्यवन्तं चिरायुषं पुत्रं जनयति" इति ॥ २१ ॥

---

९१ "भीरुत्वाद्याश्च योषिताम्" इति पाठान्तरम् ।

गर्भविवृद्धये मातुरिष्टं देयमिति प्रागुक्तम् । अदाने तु न केवलं वृद्ध्यभावः, किन्तु व्यङ्गतादयोऽपीत्याह - अदानादिति।

अदानाद्दौहृदानां स्युर्गर्भस्य व्यङ्गतादयः।
मातुर्यद्विषयो लोभस्तथैवार्थयते सुतः[९२] ॥ २२॥

दौहृदानां - गर्भिण्यभिलषितार्थानाम् , अदानात् गर्भस्य, व्यङ्गतादयः - न्यूनत्वम् , विकलाङ्गत्वम् , अशक्तत्वश्चेत्यादयः स्युः। यदाह याज्ञवल्क्यः - "दौहृदस्याप्रदानेन गर्भो दोषमवाप्नुयात् । वैरूप्यं मरणं वाऽपि तस्मात्कार्यं प्रियं स्त्रियः॥" इति । किञ्च मातुर्यद्विषयको लोभः तथैव, अर्थयते - आकाङ्क्षत इति। तदर्थः सुतो जायते। "मातृजं चास्य हृदय"मिति प्रागेवोक्तत्वात् ॥ २२॥

प्रबुद्धं पञ्चमे चित्तं मांसशोणितपुष्टता ।
षष्ठेऽस्थिस्नायुनखर केशलोमविविक्तता॥ २३॥

प्रबुद्धमिति । पञ्चमे मासि चित्तं प्रबुद्धम् , चतुर्थमासापेक्षया अधिकतरज्ञानवद्भवति । तथा मांसशोणितयोः पुष्टता च भवति । नखराणि - नखानि । "नखोऽस्त्री नखरोऽस्त्रिया"मित्यमरः॥ २३॥

बलवर्णौ चोपचितौ सप्तमे त्वङ्गपूर्णता ।
पादान्तरितहस्ताभ्यां श्रोत्ररन्ध्रे पिधाय सः॥ २४॥

---

९२ "मातुर्यद्विषये लोभस्तथार्थो जायते सुतः" इति पाठान्तरम् ।

पादाभ्यामन्तरितौ यौ हस्तौ ताभ्यां, श्रोत्रयोः - कर्णयोः, रन्ध्रे पिधाय - आच्छाद्य ॥२४॥

उद्विग्नो गर्भसंवासादस्ति गर्भभयान्वितः[९३] ॥२५॥

आविर्भूतप्रबोधोऽसौ[९४] गर्भदुःखादिसंयुतः।
हा कष्टमिति निर्विण्णः स्वात्मानं शोशुचीत्यथ ॥२६॥

अनुभूता महासह्यपुरा[९५] मर्मच्छिदोऽसकृत् ।
करम्भवालुकास्तप्ता मां दहन्त्यसुखाशयाः[९६] ॥२७॥

गर्भसंवासात् भुज्यमानदुःखप्रयोजकोद्विग्नः - सञ्जातोद्वेगः। तथा गर्भभयेन - गर्भान्तरप्रतिसन्धानजनितेन भयेनान्वितस्सन् , सः गर्भे, अस्ति - तिष्ठति । निर्विण्णः - पश्चात्तापवान् , शोशुचीति - पुनः पुनरतिशयेन वा शोचतीत्यर्थः, शुचेर्यङ्लुगन्ताल्लटि रूपमिदम् । 'एवं स्मरन्नि'ति वक्ष्यति। तत्रैवंशब्दार्थमह श्लोकषट्केन - अनुभूता इति । महासह्याश्च ताः पुरश्च महासह्यपुराः - नारकिशरीराणीत्यर्थः। पूश्शब्दस्य

---

९३ "गर्भलयान्वितः" इति पठे गर्भस्य यो लयः पतनानन्तरनाशो वा, नाशानन्तर पतनं वा, तद्विषयकज्ञानान्वितः इत्यर्थः। "दुःखभयान्वितः" इति पाठे गर्भवासजन्यं दुःखमनुभूय, तादृशगर्भवासजन्यदुःखभयविशिष्टः सन्नित्यर्थः।

९४ "आदिभूतप्रवोधोऽसौ" इति पाठान्तरम् । आदिभूतम् - आदौ पूर्वजन्मनि भूतं जातम्, तद्विषयको यः प्रकृष्टो वोधः, सः यस्येत्यर्थः।

९५ "अनुभूता महासह्याः पुरा" इति पाठान्तरम् । पुरा - पूर्वं , महासह्याः वालुकाः मया अनुभूता इत्यर्थः।

९६ "चादह्यन्तासुखाशयाः" इति पाठान्तरम् ।

शरीरवाचिनः कर्मधारये कृते "ऋक्पूरब्धूः" (पा.सू. ५-४-७४) इति समासान्तेऽचि "परवल्लिङ्गं द्वन्द्वतत्पुरुषयोः" (पा.सू. २-४-२६) इति स्त्रीत्वादाप्। करम्भेति। करम्भाः - दधिसक्तवः, तत्सम्बधिन्यो वालुकाः, यवभर्जनार्थं तप्तास्सिकताः, ता मया तप्ताः। अत एव असुखे दुःखे आशेते येष्विति असुखाशयाः, मर्मस्थानानि दहन्ति । करम्भवालुकाभिरिव तप्यमानाभिः मदीयानि मर्मस्थानानि दग्धानीत्यर्थः॥२५-२७॥

जठरानलसन्तप्ताः पित्ताख्यरसविप्लुषः।
गर्भाशये निमग्नं तु दहन्त्यतिभृशं हि माम्॥२८॥

औदर्यक्रिमिवक्त्राणि कूटशाल्मलिकण्टकैः।
तुल्यानि च तुदन्त्यार्तं पार्श्वास्थिक्रकचार्दितम्॥२९॥

औदर्येति। उदरे भवाः औदर्याः, शरीरावयवाद्यत्। औदर्याणां क्रिमीणां वक्त्राणि आर्तं मां तुदन्तीत्यन्वयः। कीदृशानि वक्त्राणि ? कूटशाल्मलैः कण्टकैः तुल्यानि । कीदृशं माम् ? पार्श्वयोः यान्यस्थीनि तान्येव क्रकचाः, तैरर्दितं - पीड्यमानम्॥२८-२९॥

गर्भे दुर्गन्धभूयिष्ठे जठराग्निप्रदीपिते।
दुःखं मयाऽऽप्तं यत्तस्मात् कनीयः कुम्भपाकजम्॥३०॥

गर्भेति। यद्दुःखं गर्भे मया आप्तं तस्माद्दुःखात्कुम्भपाकाख्ये नरके जातं कुम्भपाकजं दुःखम्, अतिशयेनाल्पं कनीयः, "युवाल्पयोः कन्" (पा.सू. ५-३-६४) इति कन्नादेशः॥३०॥

पूयासृक्श्लेष्मपायित्वं वान्ताशित्वं च यद्भवेत् ।
अशुचौ क्रिमिभावश्च तत्प्राप्तं गर्भशायिना ॥३१॥

गर्भशय्यां समारुह्य दुःखं यादृङ्मयाऽऽपि तत् ।
नातिशेते महादुःखं निश्शेषं नरकेषु यत् ॥३२॥

एवं स्मरन् पुरा प्राप्ता नानाजातीश्च यातनाः।
मोक्षोपायमभिध्यायन् वर्ततेऽभ्यासतत्परः॥ ३३॥

गर्भशय्यामिति । मया यादृग्दुःखम्, आपि - प्राप्तम् , आप्नोतेः कर्मणि लुङ्। तद्दुःखं कर्म, नरकेषु यद् दुःखकृत् तन्नातिशेते । अहो आकल्पं भोक्तव्यम् , नरकादप्यसह्यं गर्भदुःखमित्यर्थः। एवमिति । नाना बह्वीः जातीः आचण्डालत्वाद्याः, यातनाः तीव्रवेदानाश्च स्मरन्निति सम्बन्धः। अतो जात्यन्तरोच्छेदो न सम्भाव्यते । अबन्धुपरत्वाद्वा समस्तमपि समर्थनीयम् ॥३१-३३॥

अष्टमे त्वक्श्रुती[९७] स्यातामोजस्तेजश्च हृद्भवम् ।
शुद्धमापीतरक्तं च निमित्तं जीविते मतम् ॥३४॥

हृद्भवम् , शुद्धं - शुभ्रम् , आ ईषत्पीतं रक्तं च ओजः, तेजश्शब्दवाच्यं धातुपरिणामविशेषात्मकं, जीविते - जीवने, यन्निमित्तं तदष्टमे मासि जातम् ॥३४॥

---

९७ "अष्टमे त्वक्सृती स्याता"मिति पाठान्तरम् । त्वक् - चर्म, सृतिः - गमनरूपं कर्म, ते उभे स्याताम् ।

मातरं च पुनर्गर्भं चञ्चलं तत्प्रधावति ।
ततो जातोऽष्टमे मासि न जीवत्योजसोज्झितः ॥ ३५॥

मातरमिति । तत् - पूर्वोक्तमोजः, चञ्चल्यते गर्हितं चलतीति चञ्चलम् , अत एव पुनर्मातरं पुनर्गर्भं च प्रधावति । ततो हेतोः अष्टमे मासि जातो न जीवति , ओजसा प्रागुक्तेन, उज्झितः - त्यक्तः ॥ ३५॥

किञ्चित्कालमवस्थानं संसारात् पीडिताङ्गवत् ।
समयः प्रसवस्य स्यान्मासेषु नवमादिषु ॥ ३६ ॥

किञ्चिदिति । नवमादिषु मासेषु प्रसवस्य समयः स्यात् । तथा च श्रुतिः - "दशमे मासि सूतवे" (तै. एका.का १-१३) इति । स्मर्यते च याज्ञवल्क्ये "नवमे दशमे मासि प्रबलैस्सूतिमारुतैः। निस्सार्यते बाण इव यन्त्रच्छिद्रेण सत्वरम्" इति । तेषु च प्रसवमासेषु किञ्चित्कालं, संस्कारात् - स्थैर्यप्रयोजकादृष्टवाशात् , अवस्थानं - चाञ्चल्यं परित्यज्यावस्थितिः, अत्र दृष्टान्तः पीडिताङ्गवदिति । यथा भारादिना श्रान्तः कञ्चित्कालं सुषुप्त्यादौ निश्चलस्सन् आस्ते तद्वदित्यर्थः ॥ ३६ ॥

मातुरस्रवहां नाडीमाश्रित्यान्ववतारिता ।
नाभिस्थनाडी गर्भस्य मात्राहाररसावहा ॥ ३७॥
तेन जीवति गर्भोऽपि मात्राहारेण पोषितः।

मातुरिति । अस्रं शोणितं वहति प्रवहत्यनया सा अस्रवहा, तां नडीमाश्रित्य, नाभिस्था नाडी, अन्ववतारिता - विस्तारिता । सा च

गर्भस्य मात्राहारसम्वन्धिनं रसमावहतीति तथाभूता । आवहेः केवलात्पचाद्यच् , पश्चाद्रसेन षष्ठीतत्पुरुषः। तेन कारणेन पोषितस्सन् गर्भोऽपि जीवति ॥ ३७॥

अस्थियन्त्रविनिष्पिष्टः पतितः कुक्षिवर्त्मना ॥३८॥

मेदोऽसृग्दिग्धसर्वाङ्गो जरायुपटसंवृतः[९८]।
निष्कामन् भृशदुःखार्तो रुदन्नुच्चैरधोमुखः॥ ३९॥
यन्त्रादिव विनिर्मुक्तः पतत्युत्तानशाय्युत[९९] ॥४०॥

मेदश्च असृक् च ताभ्यां दिग्धमुपचितं सर्वमङ्गं यस्य तथाभूतः। उत्तानस्सन् शेते इत्युत्तानशायी । उतेति - अपि चेत्यर्थः॥ ३८-४०॥

अकिञ्चित्कस्तदा लोकैर्मांसपेशीवदास्थितः।
श्वमार्जारादिदुष्टेभ्यो रक्ष्यते दण्डपाणिभिः॥ ४१॥

अकिञ्चित्क इति । तदा मांसपेशीवदास्थितः - दृश्यमानोऽसौ, श्वमार्जारादिभ्यः - भक्षणार्थमागतेभ्यः, दण्डपाणिभिः लोकैः - स्वजनैः, रक्ष्यते । स्वरक्षणे स्वयं न प्रभवतीति भावः। अत्र हेतुमाह - अकिञ्चित्क इति । अविद्यमानं किञ्चिद्विवेकं शरीरपाटवादिरक्षणसाधनं यस्य सः अकिञ्चित्कः॥४१॥

---

९८ "जरायुपुटसंवृतः" इति पाठान्तरम् । जरायुरेव पुटमपिधानम्, तेन संवृत इत्यर्थः।

९९ "उत्तानशाय्यधः" इति पाठान्तरम्। अधोमुखस्सन् अधः पततीत्यर्थः।

पितृवद्राक्षसं वेत्ति मातृवड्डाकिनीमपि।
पूयं पयोवदज्ञानाद्दीर्घकष्टं तु शैशवम् ॥४२॥

पितृवदिति । राक्षसमपि पितृवद्वेत्ति - जानाति। डाकिनीम् - राक्षसीविशेषम्, मातृवद्वेत्ति। अज्ञानात् - विवेकशून्यत्वात्। उपलक्षणं चैतदित्याह - दीर्घेति । शिशोर्भावः शैशवम्, तत् दीर्घं कष्टं कृच्छ्रं यस्मिन् तादृशम् ॥४२॥

दैवात्कश्चिदर्थो ज्ञातश्चेत्तथापि स वक्तुं न शक्यते, येन दुःखप्रतीकारे आप्ताः प्रवर्तेरन्नित्याह - श्लेष्मणेति ।

श्लेष्मणापिहिता नाडी सुषुम्ना यावदेव हि।
व्यक्तवर्णं च वचनं तावद्वक्तुं न शक्यते ।
अत एव च गर्भेऽपि रोदितुं नैव शक्यते ॥४३॥

अपिहितेति छेदः, पिहितेति वा । "वष्टि भागुरिरल्लोपमवाप्योरुपसर्गयोः" इति वैकल्पिकोऽकारलोपः। अत एव - श्लेष्मणा आच्छादनादेव ॥४३॥

दृप्तोऽथ यौवनं प्राप्य मन्मथज्वरविह्वलः।
गायत्यकस्मादुच्चैस्तु तथाऽकस्माच्च वल्गति ॥४४॥

आरोहति तरून् वेगाच्छान्तानुद्वेजयत्यपि।
कामक्रोधमदान्धस्सन्न कांश्चिदपि वीक्षते ॥४५॥

अस्थिमांससिरालाया वामाया मन्मथालये ।
उत्तानपूतिमण्डूक पाटितोदरसन्निभे ॥४६॥
आसक्तः स्मरबाणार्तः आत्मना दह्यते भृशम् ॥४७॥

दृप्त इति । दृप्तः - गर्वितः, बलादतिविकल इत्यर्थः। कांश्चिदपि - मातापित्रादीन् पूजनीयान्, न वीक्षते - अवजानीते इत्यर्थः। शान्तान् - निगृहीतेन्द्रियान् , तपस्विनोऽपि, उद्वेजयति - उद्विग्नान् करोति । अस्थीति । अस्थि मांसं सिरा च अस्थिमांससिरम् । तत् आसमन्ताल्लाति गृह्णातीत्यस्थिमांससिराला । तथाभूताया वामायाः - स्त्रियः, मन्मथालये - योनौ, आसक्तस्सन् आत्मनैव भृशं दह्यत इति सम्बन्धः। कीदृशे मन्मथालये ? उत्तानं अथ च पूति दुर्गन्धम् , ईदृशं यन्मण्डूकस्य पाटितं विशीर्णं उदरं तत्सन्निभः, विवेकदृशां जुगुप्सिततम इत्यर्थः ॥४४-४७॥

अस्थिमांससिरात्वग्भ्यः[१००] किमन्यद्वर्तते वपुः।
वामानां मायया मूढो न किञ्चिद्वीक्षते जगत् ॥४८॥

वामानां वपुः - शरीरम् , अस्थिमांसप्रभृतिभ्यो अन्यद्वर्तते किम् ? नास्त्येवेत्यर्थः। यद्यप्येवम् , तथापि मायया मूढो युवा किमपि जगन्नेक्षते - यथावन्न जानाति, किन्तु निस्सारमेव सारवत्तया गृह्णातीत्यर्थः। यद्यपि अस्थ्यादीनां वैयाकरणाभिमतप्राण्यङ्गत्वसद्भावादेकवद्भावः प्राप्तः, तथापि "मुखनासिकावचनः" (पा.सू. १-१-८) इतिसूत्रादनित्यत्वमाश्रित्य "राजहंसास्तु ते चञ्चुचरणैर्लोहितैः सिताः" इत्यादिवत्समर्थनीयम् ,

---

१०० "अस्थिमांससिरादिभ्यः" इति पाठान्तरम् ।

छन्दोवद्दृषय इति च, कृतैकवद्भावानामेकशेष इति च ॥४८॥

निर्गते प्राणपवने देहो हन्त ! मृगीदृशः।
यथा हि जायते नैव वीक्षते पञ्चषैर्दिनैः॥ ४९॥

निर्गत इति । प्राणपवने निर्गते सति । पञ्चभिष्षड्भिर्वेति पञ्चषैर्दिनैः - कतिपयैरेव दिवसैः, शीघ्रमेवेत्यर्थः। मृगीदृशो देहो, यथा जायते - यामवस्थां प्राप्नोति, तत् न वीक्षते - न पर्यालोच्यत एवेति मायामूढतायाः पूर्वश्लोकोक्तायाः प्रपञ्चः। उक्तं च "स एव कालेन दुरत्ययेन कलेबरो विट् क्रिमिभस्मसंज्ञितः" इति॥४९॥

महापरिभवस्थानं जरां प्राप्यातिदुःखितः।
श्लेष्मणा पिहितोरस्को जग्धमन्नं न जीर्यति ॥५०॥

वार्धक्यदुर्दशामाह - महेति । जग्धं - भक्षितम् , अन्नं - ओदनादि, न जीर्यति - जीर्णं न भवतीत्यर्थः। जग्धमित्यत्र "अदो जग्धिः" (पा.सू. २-४-३६) इति जग्धादेशः। अन्नमित्यत्र तु "बहुलं संज्ञाच्छन्दसो"रिति कात्यायनवचनाददादेशो न भवति ॥५०॥

सन्नदन्तो मन्ददृष्टिः कटुतिक्तकषायभुक् ।
वातभुग्नकटिग्रीवा करोरुचरणोऽबलः॥ ५१॥

सन्नदन्त इति । सन्नाः विशीर्णाः दन्ताः यस्य तथा । कटुतिक्तादीन् रसान् व्याधिनिवृत्तये भुङ्क्ते इति तथाभूतः। वातेन भुग्ना नम्राः कट्याद्यवयवाः यस्य सः तथा । अत एव अबलः - बलहीनः ॥५१॥

गदायुतसमाविष्टः परिभूतस्स्वबन्धुभिः।
निश्शौचो मलदिग्धाङ्ग आलिङ्गितवरोषितः[१०१] ॥५२॥

गदाः - व्याधयः, "रोगव्याधिगदामया" इत्यमरः। तेषाम्, अयुतेन - दशसहस्रेण, समाविष्टः - व्याप्तः। निश्शौचः - स्नानशून्यः। अत एव मलैर्दिग्धमुपचितं अङ्गं यस्य स तथाभूतः। अत एव स्वबन्धुभिः - स्त्रीपुत्रादिभिः, परिभूतः - तिरस्कृत इत्यर्थः। आलिङ्गितं प्राप्तं वरं महत् उषितं दाहो येन सः आलिङ्गितवरोषितः, दुःखबाहुल्याद्दह्यमान इत्यर्थः। 'उष दाहे' अस्माद्धातोः भावे क्तप्रत्ययः ॥५२॥

ध्यायन्नसुलभान् भोगान् केवलं वर्तते चलः[१०२]।
सर्वेन्द्रियक्रियालोपाद्धास्यते बालकैरपि॥ ५३ ॥

चलति लुठतीति चलः। बालकैरपि हास्यते - उपहास्यते, किमुत तरुणैरित्यर्थः ॥५३॥

ततो मृतिजदुःखस्य दृष्टान्तो नोपलभ्यते।
यस्माद्बिभ्यति भूतानि प्राप्तान्यपि परां रुजम् ॥५४॥

तत इति । ततः - वार्धक्यानन्तरम्, मृतिः - मरणम्, तेन जातस्य

१०१ "आलिङ्गितवरोषितः" इत्यत्र आलिङ्गितवरश्चासौ उषितश्च इत्यपि विग्रहः। तदा "आलिङ्गिता वरा उत्तमा नारी येन सः आलिङ्गितवरः, उषितः - स्थितः" इत्यर्थः। तथा च युवदशायां तादृशोऽपि इदानीमेवं रूपेण तिष्ठतीति भावः।

१०२ "वर्ततेऽचलः" इति पाठान्तरम्।

दुःखस्य नास्त्येव दृष्टान्तः। परां रुजं - रोगरूपां महतीं पीडां प्राप्तान्यपि भूतानि, यस्मात् - मृतिजदुःखात्, बिभ्यति - भयं प्राप्नुवन्ति॥५४॥

नीयते मृत्युना जन्तुः परिष्वक्तोऽपि बन्धुभिः।
सागरान्तर्जलगतो गरुडेनेव पन्नगः॥ ५५॥

नीयत इति। बन्धुभिः परिष्वक्तोऽपि - आलिङ्गितोऽपि, जन्तुः मृत्युना नीयते। अत्र दृष्टान्तः - सागरस्य अन्तर्जलं जलमध्ये गतः स्थितोऽपि, पन्नगः - पक्षाभ्यां गच्छतीति पन्नगः, सर्पः, गरुडेनेवेति॥५५॥

हा कान्ते ! हा धनं ! पुत्राः! क्रन्दमानः सुदारुणम्।
मण्डूक इव सर्पेण नीयते मृत्युना नरः॥ ५६॥

सुतरां दारुणं यथा भवति तथा 'हा कान्ते'त्यादिक्रन्दमानः आक्रोशन्नपि, शानच्प्रत्ययो न तु चानश्। नरो मृत्युना - यमदूतेन, नीयते॥५६॥

मर्मसूत्कृष्यमाणेषु[१०३] मुच्यमानेषु सन्धिषु।
यद्दुःखं म्रियमाणस्य स्मर्यतां तन्मुमुक्षुभिः॥ ५७॥

मर्मसु - मर्मस्थलेषु, उत्कृष्यमाणेषु - प्राणवायुना वियुज्यमानेषु, हस्तपादादीनाञ्च सन्धिषु मुच्यमानेषु यद्दुःखं सम्भावितं म्रियमाणस्य तद्दुःखं मुमुक्षुभिः स्मर्यताम्॥५७॥

---

१०३ "मर्मस्वाकृष्यमाणेषु" "मर्मसून्मथ्यमानेषु" इति च पाठान्तरम्।

दृष्टैराक्षिप्यमाणायां[१०४] संज्ञया ह्रियमाणया।
मृत्युपाशेन बद्धस्य त्राता नैवोपलभ्यते ॥५८॥

दृष्टैरिति । दृष्टैः - यमदूतैः, आक्षिप्यमाणायाम् - ह्रियमाणायाम्, संज्ञया उपलक्षितस्य - निस्संज्ञस्येत्यर्थः। मृत्युपाशेन बद्धस्य जन्तोः, त्राता - रक्षकः, नोपलभ्यत एव॥५८॥

संरुध्यमानस्तमसा महच्चित्तमिवाविशन् ।
उपाहूतस्तदा[१०५] ज्ञातीनीक्षते दीनचक्षुषा ॥५९॥

संरुध्यमान इति । तमसा - अज्ञानेन, संरुध्यमानः, महत् चित्तं विवेकं आविशन्निव - कथञ्चित्सावधानतां प्राप्तस्सन्नित्यर्थः। उपाहूतः - 'हे देवदत्ते'त्यादिनामग्रहणपूर्वकं सम्बोधितस्सन्, तदा - तस्यामवस्थायाम्, दीनचक्षुषा ज्ञातीनीक्षते - सम्भाषणासमर्थत्वादवेक्षणमात्रं करोति । तदेतन्महतो विवेकस्य कार्यम्, तदभावे तु ईक्षणमपि दुर्लभमिति भावः। चिती संज्ञाने, भावे क्तः। उताहूत इति पाठे उतशब्दः अप्यर्थकः। आहूतोऽपीत्यर्थः॥५९॥

अयःपाशेन कालेन स्नेहपाशेन बन्धुभिः।
आत्मानं कृष्यमाणं तमीक्षते परितस्तथा॥ ६०॥

अयःपाशेनेति । कालेन बन्धुभिश्च यथाक्रमम् अयःपाश-स्नेहपाशाभ्यां

---

१०४ "दृष्टावाक्षिप्यमाणायाम्" इति पाठान्तरम्।

१०५ "उताहूतः" "उदाहूतः" इति च पाठान्तरम्। उदाहूतः - उच्चैराहूत इत्यर्थः।

आकृष्यमाणम् , तम् - पूर्वोक्तावस्थापन्नमात्मानम्, ईक्षते। तथा परितः - सर्वतः, ईक्षते । वक्ष्यमाणरीत्या चिन्तयतीति सावधानतादशायां म्रियमाणस्य स्थितिकथनम् । मूर्छावस्थापन्नस्य तु तदपि नास्ति । संसारोद्धाररूपचिन्तनं तु तस्यामवस्थायां दूरापास्तम् । तस्मात् तस्मिन् काले ईश्वरध्यानार्थं विवकवता यावज्जीवं ध्यानाभ्यासो विधेयः ॥ ६० ॥

"ईक्षते परितस्तथे"ति पूर्वश्लोके उक्तम् । किमीक्षते? इत्याकांक्षायां सार्धश्लोकद्वयेनाह - हिक्कयेति ।

हिक्कया वाध्यमानस्य श्वासेन परिशुष्यतः।
मृत्युना कृष्यमाणस्य न खल्वस्ति परायणम् ॥ ६१ ॥

संसारयन्त्रमारूढो यमदूतैरधिष्ठितः।
क्व यास्यामीति दुःखार्तः कालपाशेन योजितः॥ ६२ ॥

किं करोमि क्व गच्छामि किं गृह्णामि त्यजामि किम् ।
इतिकर्तव्यतामूढः कृच्छ्राद्देहात्त्यजत्यसून् ॥ ६३ ॥

परायणम् - संरक्षकः। "किं करोमी"त्यादि किञ्चित्कालं चिन्तयित्वा ततः इतिकर्तव्यतामूढस्सन्, असून् - प्राणान्, कृच्छ्रात्त्यजति॥ ६१-६३ ॥

यातनादेहसम्वद्धो यमदूतैरधिष्ठितः।
इतो गत्वाऽनुभवति या यास्ता यमयातनाः।
तासु यल्लभते दुःखं तद्वक्तुं सहते कुतः॥ ६४ ॥

यातनेति । इतः - अस्माल्लोकात्परलोकं गत्वा । यातनायै तीव्रवेदनायै देहो यातनादेहः, तेन सम्बद्धस्सन्, यमदूतैरधिष्ठितश्च सन्, या यास्ताः - विशिष्य वक्तुमशक्याः यमसम्बन्धिनीर्यातनाः, अनुभवति तासु मध्ये यद्दुःखं अयःकुम्भीपाकक्रकचदारुणादिजन्यं लभते तदेकमपि वक्तुं कुतस्सहत इत्यन्वयः। सर्वा यातना अनुवदितुं न शक्नोतीति किमु वक्तव्यम् । यत्र एकैकव्यक्तिरपि अनुभवैकवेद्या न तु विशिष्य वक्तुं शक्येति भावः ॥ ६४ ॥

कर्पूरचन्दनाद्यैस्तु लिप्यते सततं हि यत् ।
भूषणैर्भूष्यते चित्रैः सुवस्त्रैः परिवार्यते ॥ ६५ ॥

अस्पृश्यं जायतेऽप्रेक्ष्यं जीवत्यक्तं सदा वपुः ॥ ६६ ॥

निष्कासयन्ति निलयात् क्षणं न स्थापयन्त्यपि ।
दह्यते च ततः काष्ठैः तद्भस्म क्रियते क्षणात् ॥ ६७ ॥

कर्पूरेति । यद्वपुः - शरीरम्, कर्पूराद्यैर्लिप्यते । सुवस्त्रैः - उत्कृष्टैर्वस्त्रैः, परिवार्यते - वेष्ट्यते, तदेव वपुः जीवेन त्यक्तं सत् तदा, अस्पृश्यम् - स्पर्शायोग्यम्, अप्रेक्ष्यम् - दर्शनायोग्यं च, जायते । अत एव, निलयात् - गृहात्, निष्कासयन्ति, क्षणमपि न स्थापयन्ति ॥ ६५-६७ ॥

भक्ष्यते वा सृगालेन गृध्रकुक्करवायसैः।
पुनर्न दृश्यते सोऽथ जन्मकोटिशतैरपि ॥ ६८ ॥

संस्काराभावे, सृगालेन - जम्बुकेन, गृध्रेण, कुक्कुरेण - सारमेयेण, वायसेन

वा भक्ष्यते । पुनर्नेति । सः - भस्मीभूतो वा जम्बुकादिभिर्भक्षितो वा देहः, पुनर्न दृश्यते ॥६८॥

माता पिता गुरुजनः स्वजनो ममेति
मायोपमे जगति कस्य भवेत् प्रतिज्ञा ।
एको यतो व्रजति कर्मपुरस्सरोऽयं
विश्रामवृक्षसदृशः खलु जीवलोकः ॥ ६९ ॥

मातेति । मायोपमे - ऐन्द्रजालिकनिर्मितमायाहस्त्यादिसदृशे, अस्मिन् जगति, 'मम पिते'त्यादिरूपा प्रतिज्ञा कस्य भवेत् ? न कस्यापीत्यर्थः। अयं - प्रमाता, कर्मपुरस्सरस्सन्नेक एव यतो व्रजति , न तु मातापित्रादिभिस्सार्धम् । तथा चानादौ संसारे सर्वेषां परस्परं मातापितृभावोऽविशिष्ट इति भावः। जीवलोकः - मनुष्यशरीरात्मकः, विश्रामार्थेन वृक्षेण सदृशः खलु । वृक्षसाम्यं चोत्तरश्लोके विवरिष्यते । अत्र यद्यपि विश्राम इति प्रयोगः पाणिनीयविरुद्धः, "नोदात्तोपदेशस्य" (पा.सू. ७-३-३४) इति वृद्धिनिषेधात् । तथापि चान्द्रव्याकरणे "वैश्रमेर्विभाषे"ति सिद्धान्तितत्वान्न दोषः। नञा निर्दिष्टमनित्यमिति वा, संज्ञापूर्वको विधिरनित्य इति वा, कुशकाशावलम्बनेन तु पाणिनीयमतमिह समर्थयितव्यम् । विश्रामवृक्षेति । समासस्तु भाष्यरीत्या षष्ठीतत्पुरुष एव । पदमञ्जरीकाररीत्या तु चतुर्थीतत्पुरुषः साधुः। अत्र च बहुवक्तव्यं ग्रन्थगौरवभयात्तु नोच्यते॥ ६९॥

सायं सायं वासवृक्षं समेताः
प्रातः प्रातस्तेन तेन प्रयान्ति।

त्यक्त्वाऽन्योन्यं तं च वृक्षं विहङ्गाः
यद्वत्तद्वज्ज्ञातयोऽज्ञातयश्च॥ ७० ॥

सायमिति । यथा विहङ्गाः पक्षिणः सायंकाले वासवृक्षं प्राप्तास्सन्तः प्रातःकाले अन्योन्यं परस्परं त्यक्त्वा तं च वृक्षं त्यक्त्वा तेन तेन पथा प्रयान्ति तद्वदेव ज्ञातयो ज्ञातिभिन्ना भृत्यादयो वा स्वस्वकर्मानुरोधात् किञ्चित्कालमेकत्र स्थित्वा यथायथं प्रयान्ति ॥ ७० ॥

मृतिबीजं भवेज्जन्म जन्मबीजं भवेन्मृतिः ।
घटीयन्त्रवदश्रान्तो बम्भ्रमीत्यनिशं नरः ॥ ७१ ॥

मृतीति । जन्म मृतेर्बीजं भवेत् । तथा मृतिरपि जन्मनो बीजं भवेत् । अत एव घटीयन्त्रवदनिशं नरः, बम्भ्रमीति - पुनः पुनः भ्राम्यति, यङ्लुकि रूपम्, "नुगतः" (पा.सू. ७-४-८५) इति नुगागमः ॥ ७१ ॥

गर्भे पुंसश्शुक्लपाताद्यदुक्तं मरणावधि ।
तदेतस्य महाव्याधेर्मत्तो नान्योऽस्ति भेषजम् ॥ ७२ ॥

॥ इति श्रीपद्मपुराणे शिवगीतासूपनिषत्सु
वैराग्ययोगो नामाष्टमोऽध्यायः ॥

शुक्लपातादारभ्य मरणावधि यदुक्तम् , स चासावेष चेति कर्मधारयः। तस्यैतस्य महाव्याधेः भेषजं मत्तोऽन्यः पदार्थो नास्ति । भेषजशब्दो नित्यनपुंसकः॥७२॥

॥इति श्रीमद्विशुद्धाद्वैतसिद्धान्तप्रतिष्ठापनैकधुरन्धर
श्रीमच्छङ्करानन्दभारतीविरचिते शिवगीताभाष्ये अष्टमोऽध्यायः॥

नवमोऽध्यायः

श्रीभगवानुवाच -

देहस्वरूपं वक्ष्यामि शृणुष्वाहितो नृप ।
मत्तो हि जायते विश्वं मयैवैतत् प्रधार्यते ॥ १ ॥

मय्येवेदमधिष्ठाने लीयते शुक्तिरूप्यवत् ।
अहं तु निर्मलः पूर्णः सच्चिदानन्दविग्रहः ॥ २ ॥

अष्टमाध्यायोपक्रमे "पाञ्चभौतिकदेहस्य चोत्पत्तिर्विलयः स्थितिः। स्वरूपं च कथ"मिति रामेण पृष्टम् । तत्रोत्पत्तिस्थितिविलया निरूपिताः। स्वरूपं तु इह देहप्राधान्येन निरूप्यत इति प्रतिजानीते - देहस्वरूपमिति। शृणुष्व - शृणु । उत्पत्त्यादीन् प्राक् पृष्टान् सूचीकटाहन्यायेन प्रश्नक्रमेण च संक्षिप्य कथयति - मय्येवेति । मद्विषयकात् ज्ञानात् मय्येवाध्यस्तं विश्वं मद्विषयकसाक्षात्काराद्विलीयते । शुक्त्यवच्छिन्नचैतन्यविषयकाज्ञानकार्यं रूप्यं यथा शुक्तिसाक्षात्काराद्विलीयते तद्वदित्यर्थः। न चैतावता मम विकारित्वमित्याह - अहन्त्विति॥ १ - २॥

असङ्गो निरहङ्कारश्शुद्धं ब्रह्म सनातनः।
अनाद्यविद्यया युक्तो[१०६] जगत्कारणतां व्रजे ॥ ३ ॥

ननु ब्रह्मस्वरूपस्य मोक्षकालेऽप्यवस्थानात् पुनः प्रपञ्चापत्तिरित्याशङ्क्याह - अनाद्यविद्ययेति। तथा च अविद्यारूपसहकारिविरहात् न मुक्तस्य

१०६ "अनाद्यविद्यायुक्तस्सन्" इति पाठान्तरम् ।

पुनस्संसारतापत्तिरित्यर्थः। व्रजे - व्रजामि॥३॥

अनिर्वाच्या महाविद्या त्रिगुणा परिणामिनी।
रजस्सत्वं तमश्चेति तद्गुणाः परिकीर्तिताः॥४॥

अविद्यया युक्तस्सन्नित्युक्तरीत्या उभयोरेकरूपमेव कारणत्वमिति व्यावर्तयति - महाविद्या त्रिगुणा परिणामिनीति। स्वज्ञानबाध्यं प्रत्युपादानं हि परिणाम्युच्यते । ननु स परिणामः कार्त्स्न्येन वा एकदेशेन वा ? नाद्यः, दधित्वदशायां क्षीरस्येव प्रपञ्चदशायामज्ञानस्यानुपलम्भापत्तेः। न द्वितीयः, अनादित्वेन निरवयवत्वादित्याशङ्क्याह - अनिर्वाच्येति । तथा चानादावप्यज्ञाने अनिर्वचनीयांशसत्वान्न द्वितीयपक्षासङ्गतिः। "कृत्स्नप्रसक्तिर्निरवयवत्वशब्दकोपो वा" (ब्र.सू. २-१-२६) इति व्याससूत्रे तथैव निर्णीतत्वादिति भावः। महाविद्येत्यनेन मूलाज्ञानमेव जगदुपादानं न तु तूलाज्ञानं, शुक्तिज्ञानादिना तन्निवृत्तौ सकलप्रपञ्चनिवृत्त्यापत्तेरिति दर्शयति । ननु गुणानां कार्यं बन्ध इति तत्र तत्र स्मर्यते । तथा च कथमिह तत्परित्यागेन अन्यदेवोपादानं कथ्यत इत्याशङ्क्याह - त्रिगुणेति । तथा च गुणानामविद्यांशरूपत्वादंशांशिनोश्च अनिर्वचनीयतादात्म्यान्न कोऽपि दोष इति भावः॥४॥

तत्र गुणानां कार्यविशेषं प्रति कारणतां विविच्य दर्शयति - सत्वमिति ।

सत्वं शुक्लं समादिष्टं सुखज्ञानास्पदं नृणाम् ।
दुःखास्पदं रक्तवर्णं चञ्चलं च रजो मतम् ॥५॥

सुखज्ञानयोः सुखशब्दवाच्यज्ञानशब्दवाच्ययोः वृत्त्योः, आस्पदं -

कारणम् । रजस्तु रक्तवर्णं दुःखकारणञ्च ॥५॥

तमः कृष्णं जडः प्रोक्तमुदासीनं सुखादिषु ।
अतो मम समायोगाच्छक्तिस्सा त्रिगुणात्मिका ॥६॥

तम इति । तमः कृष्णवर्णं तथा जडम् । यद्यपि चिद्भिन्नत्वरूपत्वं जडत्वं सत्वरजसोस्तत्कार्ये चास्ति, तथापि आवरणप्रयोजकत्वं तमस एवेत्यर्थः। उदासीनमिति - सुखादिजननासमर्थमित्यर्थः॥ ६॥

त्रिगुणात्मिका अविद्या परिणामिनीत्युक्तम् , अधिष्ठानं त्वहमेवेत्याह - अधिष्ठाने त्विति ।

अधिष्ठाने तु मय्येव भजते विश्वरूपताम् ।
शुक्तौ रजतवद्रज्जौ भुजङ्गो यद्वदेव तु ॥७॥

आकाशादीनि जायन्ते मत्तो भूतानि मायया।
तैरारब्धमिदं सर्वं देहोऽयं पाञ्चभौतिकः ॥८॥

अधिष्ठानं ब्रह्मैव, परिणामिनी त्वविद्या, उपादानं तूभयमिति फलितोऽर्थः। तत्र बाधकज्ञानविषयोऽधिष्ठानं स्वबुद्धिबाध्यकार्याधारो वा । रजतस्य शुक्तिवत् । स्वबाधकबाध्यकार्याश्रयस्तु परिणामी । कार्यतादात्म्यवत्कारणम् उपादानम् । तादात्म्यं तु भिन्नत्वे सति अभिन्नताकत्वमिति विवेकः॥ ७-८॥

"एतत् षट्कोशिकं शरीरं त्रीणि पितृतस्त्रीणि मातृतः, स्नायुमज्जास्थीनि

पितृतः, त्वङ्मांसरुधिराणि मातृत" इति गर्भोपनिषदमर्थतः पठति द्वाभ्यां श्लोकाभ्याम् ।

पितृभ्यामाशितादन्नात् षट्कोशं जायते वपुः।
स्नायवोऽस्थीनि मज्जा च जायन्ते पितृतस्तथा ।
त्वङ्मांसशोणितमिति मातृतश्च भवन्ति हि ॥९॥

भावास्स्युष्षड्विधास्तस्य मातृजाः पितृजास्तथा ।
रसजा आत्मजास्सत्वसम्भूताः स्वात्मजास्तथा ॥१०॥

पितृभ्यामिति । पितृभ्यां - मातापितृभ्यां। अशितात् - भक्षितात्, अन्नात् - ओदनादेः, षट्कोशा इव कोशाः यस्मिंस्तथाभूतं वपुर्जायते । भावास्स्युरिति । मातृजास्तथा पितृजाश्च मिलित्वा षड्विधास्तस्य भावाः भवन्ति । भावाः कोशाः स्युः ॥९ - १०॥

मृदवश्शोणितं मेदो मज्जा प्लीहा यकृद्गुदम् ।
हृन्नाभीत्येवमाद्यास्स्युर्भावा मातृभवा मताः॥ ११॥

मृदव इति । मृदवो भावाः मातृभवा मता इत्यन्वयः। के ते ? शोणितं - रक्तम्, मेदः - वपा, मज्जा - सारभूतो धातुविशेषः, प्लीहा - गुल्मः, यकृत् - दक्षिणपार्श्वे कालखण्डापरपर्यायः कृष्णमांसांशः, गुदम् - अपानं, हृत् - हृदयं, इत्येवमाद्याः। तथा चामरः "रुधिरेऽसृग्लोहितास्त्ररक्तक्षतज शोणित"मिति ; "हृदयं हृन्मेदस्तु वपा वसा" इति , "सारो मज्जा समा"विति, "गुल्मस्तु प्लीहपुंसि च" इति, "कालखण्डं यकृत्" इति, "गुदं त्वपानं पायुर्ने"ति च। अत्र मज्जशब्दो नान्तः पुल्लिङ्गः। नाभीत्यत्र

"कृदिकारादक्तिनः" (ग.सू. ५०) इति ङीष् । तथा च मुरारिः प्रायुङ्क्त "नाभीपल्वलपुण्डरीकमुकुलः कम्वोस्सपत्नीकृतः" इति। "विरमति महाकल्पे नाभीपथैकनिकेतन" इति च। "द्विपदशनसनाभीपथेने"ति च श्रीहर्षः। तथा च लिङ्गानुशासनसूत्रं (१५) "नाभिरक्षत्रिये" इति स्त्रीलिङ्गशेषे । अमरोऽप्याह "सातिः कन्था तथा सन्दी नाभी राजसभाऽपि चे"ति। एवं च "समुच्छ्वसत्पङ्कजकोशकोमलैरुपाहित श्रीण्युपनीवि नाभिभिः" (किरातार्जुनीयम् ८-२४) इति भारवेः प्रमाद इति बोध्यम् ॥ ११ ॥

श्मश्रुलोमकचाः स्नायुशिराधमनयो नखाः।
दशनाश्शुक्लमित्यादिस्थिराः पितृसमुद्भवाः ॥ १२ ॥

श्मश्रु - पुरुषस्य मुखे रोमवृद्धिः। लोम - शिरसोऽन्यत्र शरीरे रुहः। कचाः - शिरोरुहाः। तथा चामरः "तनूरुहं रोम लोम तद्वृद्धौ श्मश्रु पुम्मुखे" इति, "कचः केशः शिरोरुहः" इति च । स्नायुः - वस्नसापरपर्यायो धातुविशेषः, "अथ वस्नसा स्नायुस्स्त्रियां" इत्यमरः। शिराधमनय इति । यद्यपि "नाडी तु धमनिश्शिरे"त्यमरसिंहेन पर्यायतोक्ता । तथापि सूक्ष्मा नाड्यश्शिराः, स्थूलास्तु धमनयः। धमनीसादृश्याद्धमनयो बोध्याः। विज्ञानेश्वरस्त्वाह "धमन्यः प्रान्त एव नाड्यः त्रिधा भिद्यन्त" इति । स्थिराः - बहुकालावस्थायिनः ॥ १२ ॥

शरीरोपचितिर्वर्णो वृद्धिस्तृप्तिर्बलं स्थितिः।
अलोलुपत्वमुत्साह इत्यादीन् रसजान् विदुः ॥ १३ ॥

शरीरेति । उपचितिः - उत्पत्तिकालीनस्थौल्यम् , वृद्धिः - क्रमणोपचयः, इत्यादीन् रसजान् रसविशेषाज्जातान् विदुः ॥ १३ ॥

इच्छाद्वेषस्सुखं दुःखं धर्माधर्मौ च भावना।
प्रयत्नो ज्ञानमायुश्चेन्द्रियाणीत्येवमात्मजाः॥ १४॥

इच्छेति । इच्छाप्रभृतयो भावाः, आत्मजाः - स्वकृतप्राग्भवीयकर्मप्रभवाः न तु मातापितृनिष्ठेच्छाद्वेषादिप्रभवा इत्यर्थः। भावना - स्मृतिजनकीभूतः संस्कारविशेषः। अत्र पूर्वोक्तं श्मश्रुलोमेत्यादिश्लोकत्रयेऽपि भावा इत्येतदनुवर्तमानं पितृसमुद्भवा इत्यादेर्विशेष्यम् , अन्यथा "नपुंसकमनपुंसकेन" (पा.सू. १-२-६९) इत्यस्य प्रवृत्तौ पुल्लिङ्गनिर्देशानुपपत्तेरिति बोध्यम् ॥ १४॥

तत्रेन्द्रियाणि ज्ञानेन्द्रियाणि कर्मेन्द्रियाणि चेति। तत्र ज्ञानेन्द्रियाणि विभजते - ज्ञानेति ।

ज्ञानेन्द्रियाणि श्रवणं स्पर्शनं दर्शनं तथा ।
रसनं घ्राणमित्याहुः पञ्च तेषां तु गोचराः॥ १५॥
शब्दस्स्पर्शस्तथा रूपं रसो गन्ध इति क्रमात् ।

श्रवणमित्यादीनि पञ्च ज्ञानेन्द्रियाण्याहुः। तेषां गोचराः विषयास्तु यथाक्रमं शब्दस्पर्शादयः पञ्च ॥ १५॥

वाक्कराङ्घ्रिगुदोपस्थान्याहुः कर्मेन्द्रियाणि हि ॥ १६ ॥

वचानादानगमनविसर्गरतयः क्रमात् ।
क्रियास्तेषां मनोबुद्धिरहङ्कारस्ततः परम् ॥१७॥

अन्तःकरणमित्याहुश्चित्तं चेति चतुष्टयं ।
सुखदुःखे च विषयौ विज्ञेयौ मनसः क्रियाः ॥१८॥

वागादीनि तु पञ्च कर्मेन्द्रियाण्याहुः। वचनेति । तेषां - वागादीनां कर्मेन्द्रियाणाम् , क्रमात् वचनादयः पञ्च क्रियाः। एवं ज्ञानेन्द्रियपञ्चकं कर्मेन्द्रियपञ्चकञ्च निरूप्य उभयात्मकमिन्द्रियमाह - मन इति । मनस्तु ततः प्रागुक्तेभ्यो दशभ्यः, परं - उत्कृष्टम् , उभयात्मकत्वादित्यर्थः। तदाह याज्ञवल्क्यः "हस्तौ पायुरुपस्थं च जिह्वापादौ च पञ्चमम् । कर्मेन्द्रियाणि जानीयान्मनश्चैवोभयात्मकम् ॥" इति । बुद्धिरहङ्कारोऽन्तःकरणं चित्तं चेति चतुष्टयमपि मन एवाहुरित्यन्वयः। एकस्यैव मनसो अवस्थाचतुष्टयेन संज्ञाचतुष्टयमित्यर्थः। ननु मनसो बुद्धीन्द्रियत्वमनुपपन्नम् , असाधारणविषयाभावात् । नैयायिकादिभिः मानसत्वेनाभ्युपगतानां सुखादीनामस्मत्सिद्धान्ते साक्षिमात्रावभास्यत्वादित्याशङ्क्याह- सुखमिति। अन्तःकरणोपहितस्यैव साक्षितया सुखादिभानोपयोगो अस्त्येव, मनसः तावन्मात्रेणैव इन्द्रियत्वं परिभाव्यत इति भावः॥१६-१८॥

स्मृतिभीतिविकल्पाद्याः बुद्धिः स्यान्निश्चयात्मिका।
अहं ममेत्यहङ्कारश्चित्तं चेतयते यतः ॥१९॥

स्मृतिभीतिप्रभृतयः मनसः क्रिया इत्यन्वयः। अनेन कर्मेन्द्रियत्वं समर्थितम् । बुद्धेः कर्मेन्द्रियसहकारित्वादुभयात्मकत्वं परिभाषेति तु

विज्ञानेश्वरः। बुद्ध्यादिसंज्ञाचतुष्टयमेकस्यैवेत्युक्तम् , तत्प्रयोजकमाह - बुद्धिस्स्यादिति। निश्चयात्मिका बुद्धिः, अभिमानात्मकोऽहङ्कारः, विचारात्मकं चित्तं, इति त्रयाणां लक्षणं श्लोके उक्तम् । चेतयत इति - विचारयतीत्यर्थः। मनस्तु सङ्कल्पविकल्पात्मकं बोध्यम् , तदेव चित्तं करणम् ॥१९॥

ननु स्यादेतत् अन्तःकरणं साक्ष्युपाधित्वात् सुखादिभानोपयोगीत्युक्तिः असङ्गता , सत्वस्यैव साक्ष्युपाधितया श्रवणात् । तथा च पैङ्गिरहस्यब्राह्मणे "तदेतत्सत्त्वं येन स्वप्नं पश्यती"ति स्वप्नगजादिभासकसाक्षिणं प्रत्युपाधितया सत्त्वमेव निर्दिष्टमित्याशङ्क्याह - सत्वाख्यमिति।

सत्वाख्यमन्तःकरणं गुणभेदात्त्रिधा मतम् ।
सत्वं रजस्तम इति गुणास्सत्वात्तु सात्विकाः॥ २०॥
आस्तिक्यशुद्धि धर्मैकरुचिप्रभृतयो[१०७] मताः।

अन्तःकरणं यत् तदेव सत्वाख्यमित्यन्वयः। अयं भावः। उक्तं श्रुतावपि "तयोरन्यः पिप्पलं स्वाद्वत्ती"ति (मु.उ. ३-१-१)। सत्वमित्यनेन भोक्तृतया सत्वस्य निर्देशात् प्रमातैव सत्वशब्दार्थः। अत एव नातिप्रसङ्गोऽपि। एतेनाविद्योपहित एव साक्षीत्यपि परास्तम् । अतिप्रसङ्गपरिहाराय प्रमातृभेदस्यावश्यकत्वे विद्यायाः अकिञ्चित्करत्वात्। स्फुटं चैतन्नृसिंहाश्रमग्रन्थेष्विति दिक् । प्रसङ्गादाह - गुणभेदादिति । उपादानीभूताविद्यागुणभेदादन्तःकरणमपि त्रिधेत्यर्थः। तत्र सत्वात्

---

१०७ "धर्मैकमतिप्रकृतयः" इति पाठान्तरम् । धर्मैकमतिप्रकृतिः - धर्मैकमतिस्वभाव इत्यर्थः।

सात्त्विकाः। आस्तिक्येति । आस्तिक्यप्रभृतयो सात्विका मताः। अस्ति परलोक इत्येवं रूपा मतिरास्तिक्यम् । शुद्धिः - मनोनैर्मल्यम् । धर्मे एका असाधारणी रुचिः॥२०॥

रजसो राजसा भावाः कामक्रोधमदादयः॥ २१॥
निद्रालस्यप्रमादादि वञ्चनाद्यास्तु तामसाः।
प्रसन्नेन्द्रियतारोग्या नालस्याद्यास्तु सत्वजाः॥ २२॥
देहो मात्रात्मकस्तस्मादादत्ते तद्गुणानिमान् ।

देह इति । देहः - स्थूलदेहः मात्रात्मकः, प्रमातृतादात्म्येनाध्यस्तः। अत एव तस्य प्रमातुः गुणानादत्ते। अन्तःकरणस्य सत्वादिगुणोत्पत्तौ तद्धेतुकानुसारेण स्थूलदेहेऽपि तथा कार्यं भवतीत्यर्थः॥२१-२२॥

कस्मात्कं धर्ममादत्ते इत्येतदेव विवेचयति- शब्द इति ।

शब्दः श्रोत्रं मुखरता वैचित्र्यं सूक्ष्मता धृतिः॥ २३॥

बलं च गगनाद्वायोः स्पर्शश्च स्पार्शनेन्द्रियम्[१०८] ।
उत्क्षेपणमपक्षेपाकुञ्चने गमनं तथा ॥२४॥

प्रसारणमितीमानि पञ्च कर्माणि रूक्षताम् ।
प्राणापानौ तथा व्यानसमानोदानसंज्ञकान् ॥२५॥

---

१०८ "स्पर्शनेन्द्रियम्" इति पाठान्तरम् ।

नागं च कूर्मं कृकरं देवदत्तं धनञ्जयम् ।
दशेति वायुविकृतीस्तथा गृह्णाति लाघवम् ॥२६॥

शब्दः श्रोत्रं चेत्यादीन् सप्त गगनादादत्त इति सम्बन्धः। विचित्रस्य भावः वैचित्र्यम् , कर्मविशेषकुशलतेत्यर्थः। सूक्षेति । लङ्घनक्रियायोगात् लाघवविशेष इत्यर्थः। यद्यपि वायुकार्यमध्ये लाघवं गणयिष्यति, तथाप्युभयकार्यत्वान्न विरोधः। न चैतद्भयादिह सूक्ष्मताशब्दस्यार्थान्तरं कल्प्यम् । आकाशकार्येषु लाघवं स्पष्टमेव, स्मर्तृभिरुपादानात् । तदाह याज्ञवल्क्यः "आकाशाल्लाघवं सौक्ष्म्यम्" इति । सौक्ष्म्यं सूक्ष्माक्षित्वमिति विज्ञानेश्वरोक्तव्याख्या वा इहापि योज्या।

वायोस्तु स्पार्शनेन्द्रियं पञ्चकर्माणि रूक्षतां प्राणादिदशविकृतीः लाघवं चेति एकोनविंशतिपदार्थान्, 'गृह्णाती'ति मध्ये श्रुतस्य पूर्वोक्तैः सर्वैः सह सम्बन्धः। रूक्षतां - कर्कशत्वम् । स्पष्टमन्यत् ॥२३-२६॥

प्राणादीनां दशानां वायुविशेषाणां स्थानानि कार्याणि चाह - तेषामित्यादिभिः श्लोकैः।

तेषां मुख्यतरः प्राणो नाभेः कण्ठादधः स्थितः।
चरत्यसौ नासिकयोर्नाभौ हृदयपङ्कजे ॥२७॥

शब्दोच्चारणनिश्श्वासोच्छ्वासादेरपि कारणम् ।

तेषां - पूर्वोक्तवायुकार्याणां मध्ये, प्राणो मुख्यतरः। स च नाभेः कण्ठात् - नाभिं कण्ठं च व्याप्यावस्थितः, ल्यब्लोपे कर्मणि पञ्चमी। असौ

नासिकयोः - नासारन्ध्रयोः, नाभौ हृदयपङ्कजे च चरति। शब्दोच्चारणादीनां कारणं च, प्राण इत्यनुवर्तते ॥२७॥

अपानस्तु गुदे मेढ्रे कटिजङ्घोदरेष्वपि ॥२८॥

नाभिस्कन्धे[१०९] वृषणयोरूरुजानुषु तिष्ठति ।
तस्य मूत्रपुरीषादिविसर्गः कर्म कीर्तितम् ॥२९॥

अपानस्त्विति । गुदप्रभृतिषु अपानस्तिष्ठतीत्यन्वयः ॥२८-२९॥

व्यानोऽक्षिश्रोत्रगुल्फेषु जिह्वाघ्राणेषु तिष्ठति ।
प्राणायामधृतित्याग ग्रहणाद्यस्य कर्म च ॥३०॥

व्यानः अक्ष्यादिषु स्थानेषु तिष्ठति । प्राणायामः - प्राणनिरोधः। तत्र धृतिः - कुम्भकः, त्यागः - रेचकः, ग्रहणं - पूरकः। अस्य - व्यानस्य, कर्म ॥३०॥

समानो व्याप्य निखिलं शरीरं वह्निना सह ।
द्विसप्ततिसहस्रेषु नाडीरन्ध्रेषु सञ्चरन् ॥३१॥
भुक्तपीतरसान् सम्यगानयन् देहपुष्टिकृत् ।

समान इति । निखिलं शरीरं व्याप्य सञ्चरन्, भुक्तस्य ओदनादेः पीतस्य जलस्य रसान् सारांश्च भुक्तान्नपरिणामविशेषान् सम्यक्

१०९ "नाभिकन्दे" इति पाठान्तरम् । नाभिमूले इत्यर्थः।

तत्तदवयवानुरूपेण देहस्य पुष्टिं करोतीति तथाभूतस्सन् समान इत्युच्यते। अत्र "शरीरं व्याप्य सञ्चरन्" इति वदता अवस्थानविशेष इति सूचितम् । नियतस्थानानि आप्यन्ते क्रियाविशेषवशाच्छारीरं व्याप्नुवन्ति चक्षुरादिवदिति क्षीरस्वामी । सम्यगानयन् इत्यनेन चानयतेः शतृप्रत्ययान्तस्यैतानि रूपाणीति योगशास्त्रसम्मतोऽर्थः स्फुटीकृतः। अनित्यनेनेति अनितेः करणे घञन्तानि रूपाणीति धातुवृत्तिकाराः। यद्यपि नाडीरन्ध्राणां द्विसप्ततिसहस्रादाधिक्यमपि स्मर्यते। "एकोनत्रिंशल्लक्षाणि तथा नवशतानि च । षट्पञ्चाशच्च जानीत शिराधमनिसंज्ञिताः" इति याज्ञवल्क्योक्तेः। तथापि हिताहिताख्यनाडीविशेषपरतयैव बोध्यम् । तथा च याज्ञवल्क्यः "द्विसप्ततिसहस्राणि हृदयादभिनिस्सृताः। हिताहितानाम नाड्यस्तासां मध्ये शशिप्रभम् । मण्डलं तस्य मध्यस्थ आत्मा दीप" इति। इहापि दशमे वक्ष्यति "हितं बलं प्रयच्छन्ति यस्मात्तेन हितास्स्मृताः। द्विसप्ततिसहस्रैस्ताः सङ्ख्याता योगवित्तमैः" (१०-२८) इति ॥३१॥

उदानः पादयोरास्ते हस्तयोरङ्गसन्धिषु ॥३२॥

कर्मास्य देहोन्नयनोत्क्रमणादि प्रकीर्तितम् ।
त्वगादिधातूनाश्रित्य पञ्च नागादयः स्थिताः॥ ३३ ॥

उद्गारादिनिमेषादि क्षुत्पिपासादिकं क्रमात् ।
तन्द्रीप्रभृतिशोकादि तेषां कर्म प्रकीर्तितम् ॥३४॥

तेजसः कार्यमाह - अग्नेस्त्विति ।

अग्नेस्तु रोचकं रूपं दीप्तं पाकं प्रकाशताम् ।
अमर्षतीक्ष्णसूक्ष्माणामोजस्तेजश्च शूरताम् ॥३५॥

अग्नेः रोचकप्रभृतीनादत्त इत्यन्वयः। रोचयति प्रकाशयति घटादीनिति रोचकम् - चक्षुरिन्द्रियमित्यर्थः। तथा च गर्भोपनिषदि श्रूयते "शौर्यामर्षतैक्ष्ण्यपक्त्यौष्ण्यभ्राजिष्णुतासन्तापवर्णरूपेन्द्रियाणि तैजसानि" इति । श्यामिकादीत्यर्थ इति विज्ञानेश्वरादयः। दीप्तं - दीप्तिः, शुक्लरूपविशेष इति यावत् । गोवलीवर्दन्यायेन रूपात् पृथगुपादानम् । 'दीपी दीप्तौ' नपुंसके भावे क्तः। पाकम् - भुक्तस्यान्नस्य पचनम् । प्रकाशयतीति प्रकाशः, तस्य भावः प्रकाशता, स्फूर्तिविशेषः, प्रतिभेति यावत् । अमर्षः - कोपः। तीक्ष्णं - तीक्ष्णत्वम् , परिभवासहिष्णुत्वमिति यावत् । सूक्ष्मेतिभावप्रधानो निर्देशः। सूक्ष्मता - कार्श्यमित्यर्थः। सूक्ष्माणामिति कारकशेषे षष्ठी 'न माषाणामश्नीया'दितिवत् । ईदृशे विषये स्वरूपशब्दाध्याहार इति तु वर्धमानमिश्राः। ओजः - शरीरस्थितिप्रयोजकतया पूर्वोक्तम् । तथा चान्यत्रापि स्मर्यते "हृदि तिष्ठति यच्छुद्धमीषदुष्णं सपीतकम् । ओजश्शरीरे सङ्ख्यातं तन्नाशान्नाशमृच्छति" इति। तेजः - सन्तापः, शूरता - पराक्रमः॥३५॥

मेधावितां तथाऽऽदत्ते जलात्तु रसनं रसम् ।
शैत्यं स्नेहं द्रवं स्वेदं गात्रादिमृदुतामपि ॥३६॥

मेधावितां - धारणावत्वं, "धीर्धारणावती मेधे"त्यमरः। "अस्माये"त्यादिना (पा.सू. ५-२-१२१) विनिप्रत्ययः। रसनं - रसग्राहकमिन्द्रियम् । स्नेहः - चिक्कणता । गात्रस्य - शरीरस्य ,

आदिशब्दात्तदवयवानां मृदुताम् ॥ ३६ ॥

भूमेर्घ्राणेन्द्रियं गन्धं स्थैर्यं धैर्यं च गौरवम् ।
त्वगसृङ्मांसमेदोऽस्थि मज्जाशुक्लानि धातवः ॥ ३७ ॥

गौरवं - गरिमाणम् । प्रसङ्गाच्छरीरधारकान् सप्तधातून् विवेचयति - त्वगिति । त्वक्प्रभृतयस्सप्त धातवः, दधति शरीरमिति व्युत्पत्त्या । एते च कदलीस्तम्भत्वच इव बाह्याभ्यन्तररूपेण व्यवस्थिताः। आयुर्वेदे तु त्वक्स्थाने रसशब्दः पठितः। तथा चान्नरसो जठराग्निना पच्यमानोऽसृग्भवति, तदपि रसकोशस्थेनाग्निना पच्यमानं मांसं भवति, तदपि स्वकोशस्थेनाग्निना पच्यमानं मेदो भवतीत्यादि । शुक्लं तु चरमो धातुरित्यादिनिर्णीतम् । स्मृतिविशेषे तु असृगादयः षडेव च धातुत्वेन परिभाषिता इति दिक्। "सितनिगमी"त्यादिना (उ.सू. १-६९) कर्तरि तुन्प्रत्यये कृते धातुशब्दो व्युत्पादितः ॥ ३७ ॥

उक्तानां धातूनां तत्प्रसङ्गाच्च शरीरान्तरगतानामन्येषामपि परिणामिकारणं प्रपञ्चयति - अन्नमित्यादिना ।

अन्नं पुंसाशितं त्रेधा[११०] जायते जठराग्निना ।
मलं स्थविष्ठो भागस्स्यान्मध्यमं मांसतां व्रजेत् ॥ ३८ ॥
मनः कनिष्ठो भागस्स्यात् तस्मादन्नमयं मनः ।

---

११० तथा च श्रुतिः "अन्नमशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तत्पुरीषं भवति, यो मध्यमः तन्मांसम् , योऽणिष्ठस्तन्मनः" इति । (छान्दोग्योपनिषत् ६-५-१)

अत्रेयं श्रुतिसिद्धा प्रक्रिया । पुरुषेण, अशितम् - भक्षितम्, अन्नम् - ओदनादि, जठराग्निना पच्यमानं त्रेधा जायते, स्थूलमध्यमसूक्ष्मभेदात्। तत्र स्थूलभागात् पुरीषं जायते। मध्यमो मांसम् । कनिष्ठस्तु मनो जायते। अत एव श्रुतिः "अन्नमयं हि सोम्य मनः" (छा.उ. ६-५-४) इति । एषा पृथिव्याः स्थितिः ॥३८॥

अपां स्थविष्ठो मूत्रं स्यान्मध्यमो रुधिरं भवेत्[१११] ॥३९॥
कनिष्ठभागः प्राणस्स्यात् तस्मात् प्राणो जलात्मकः।

एवमपामपि स्थूलो भागो मूत्रं भवति। मध्यमस्तु रुधिरम् । कनिष्ठस्तु प्राणो भवति ॥३९॥

तेजसोऽस्थि स्थविष्ठः स्यान्मज्जा मध्यसमुद्भवः[११२]।
अणिष्ठो वाङ्मता तस्मात् तेजोबन्नात्मकं जगत्[११३] ॥४०॥

एवं तेजसः स्थूलो भागः अस्थि । मज्जाधातुस्तु मध्यात् - तेजसो मध्यभागात् समुद्भवो यस्य तथाभूतः। अणिष्ठस्तु वाक् , मता - सम्मता ॥४०॥

---

१११ "आपः पीतास्त्रेधा विधीयन्ते तासां यः स्थविष्ठो भागस्तन्मूत्रं भवति, यो मध्यमस्तल्लोहितं, योऽणिष्ठस्स प्राणः" इति श्रुतिः। (छा.उ. ६-५-२)

११२ "तेजोऽशितं त्रेधा विधीयते तस्य यः स्थविष्ठो धातुस्तदस्थि भवति, यो मध्यमस्स मज्जा, योऽणिष्ठस्सा वाक्" इति श्रुतिः। (छा.उ. ६-५-३)

११३ "अन्नमयं हि सोम्य मन आपोमयः प्राणस्तेजोमयी वाक्" इति श्रुतिः। (छा.उ. ६-५-४)

लोहिताज्जायते मांसं मेदो मांससमुद्भवम् ।
मेदसोऽस्थीनि जायन्ते मज्जा त्वस्थिसमुद्भवा ॥४१॥

नाड्योऽपि मांससङ्घाताच्छुक्लं मज्जासमुद्भवम् ।
वातपित्तकफाश्चात्र धातवः परिकीर्तिताः ॥४२॥

नाड्योऽपीति । मांससङ्घातान्नाड्यो भवन्ति, अपिशब्दान्मेदोधातुः। शुक्लम् - चरमधातुरूपम् , मज्जायाः समुद्भवो यस्य तथाभूतम् । किञ्च अत्र शास्त्रे वातादयोऽपि धातव इति कीर्तिताः। तेषामपि शरीरधारणहेतुत्वात् ॥४१-४२॥

इदानीं सार्धश्लोकद्वयेन शरीराणां रसादीनां परिणाम उच्यते । मूत्रपुरीषादिप्राचुर्यज्ञानस्यापि वैराग्यहेतुत्वात् । तत्र रसादिपरिमाणं यद्यप्यनवस्थितम् , वैलक्षण्याच्छरीराणामस्थायित्वात् । तथैव च "दोषधातुमलानां च परिमाणं न विद्यत" इत्यायुर्वेदस्मरणात् । तथापि औत्सर्गिकीं रीतिमनुरुध्य परिमाणाभिधानं न दोषाय ।

दशाञ्जलि जलं ज्ञेयं रसस्याञ्जलयो नव ।
रक्तस्याष्टौ पुरीषस्य सप्त स्युः श्लेष्मणश्च षट्॥४३॥

पित्तस्य पञ्च चत्वारो मूत्रस्याञ्जलयस्त्रयः।
वसाया मेदसो द्वौ तु मज्जा त्वञ्जलिसम्मितः॥ ४४॥

अर्धाञ्जलि ततश्शुक्लं तदेव बलमुच्यते ।

अस्थ्नां शरीरे सङ्ख्या स्यात् षष्टियुक्तं शतत्रयम् ॥४५॥

दशेति । शरीरे पार्थिवभागानां परस्परं श्लेषनिमित्तभूतस्य उपष्टम्भकजलस्य दश अञ्जलयः। सम्यक्परिणतस्याहारस्य सारो विकारो रसः, तस्य परिमाणं नवाञ्जलयः। श्लेष्मणः कफस्य षडञ्जलयः। मूत्रस्य चत्वारः। वसाया मांसस्नेहस्य त्रयोऽञ्जलयः। मेदसः - मांसरसस्य, द्वावञ्जली । मज्जा तु अञ्जलिपरिमितो बोध्यः। "सारो मज्जा नरी"त्यमरः। नरि पुंसीत्यर्थ इति क्षीरस्वामी । अर्धेति । शुक्लं तु अर्धाञ्जलि। तच्च बलप्रदत्वात् बलमुच्यते । अस्थि तु षष्टिसहितशतत्रयं बोध्यम् । तच्च "स्थूलैस्सह चतुष्षष्टिर्विंशतिर्नखा" इत्यादिश्लोकषट्केन याज्ञवल्क्यस्मृतौ प्रपञ्चितम् ॥४३-४५॥

अनतिप्रयोजनकत्वादिहं प्रपञ्च्यते - जलजानीति।

जलजानि कपालानि रुचकास्तरुणानि च[११४]।
नवकानीति[११५] तान्याहुः पञ्चधाऽस्थीनि सूरयः॥ ४६॥

द्वे शते त्वस्थिसन्धीनां स्यातां तत्र दशोत्तरे।
रौरवाः प्रसराः स्कन्धसेचनाः[११६] स्युरुलूखलाः॥ ४७॥

समुद्रा मण्डलाश्शङ्खावर्ता वायसतुण्डकाः।

---

११४ "तरणानि च" इति पाठान्तरम् ।

११५ "नलकानीति" पाठान्तरम् ।

११६ "तुन्दसेचनाः" इति पाठान्तरम् ।

इत्यष्टधा समुद्दिष्टाः शरीरेष्वस्थिसन्धयः ॥ ४८ ॥

सार्धकोटित्रयं रोम्णां श्मश्रुकेशास्त्रिलक्षकाः ।

जलजानीति । अस्थीनि, पञ्चधा - पञ्चप्रकाराणि । तद्यथा जलजानि - भ्रुवः कर्णयोश्च मध्यप्रदेशे शंखाकारं अस्थिद्वयम् , जलजः शङ्खः, तदाकारत्वाज्जलजशब्देनोक्तानि । कपालानि - शिरस्सम्वन्धीनि चत्वारि। यदाह याज्ञवल्क्यः "द्वौ शङ्खकौ कपालानि चत्वारि शिरसस्तथा" इति। एवं च रुचकाकारत्वाद्रुचका इत्यादिबोध्यम् । रोम्णां सार्धकोटित्रयम् , तिस्रः कोट्योऽर्धकोट्यश्चेत्यर्थः। श्शश्रूणि केशाश्च मिलित्वा त्रिलक्षकाः ॥४६-४८॥

देहरूपं मयैवं तु प्रोक्तं दशरथात्मज ॥४९॥

यस्मादसारो नास्त्येव पदार्थो भुवनत्रये।
देहेऽस्मिन्नभिमानेन न महोपायबुद्धयः॥ ५० ॥

अहङ्कारेण पापेन क्रियन्ते हन्त साम्प्रतम् ।
तस्मादेतत्स्वरूपं तु विबोद्धव्यं मनीषिभिः॥ ५१ ॥

॥ इति श्रीपद्मपुराणे शिवगीतासूपनिषत्सु
शरीरनिरूपणं नाम नवमोऽध्यायः॥

यस्मादिति। यस्माद्देहरूपादसारः पदार्थो भुवनत्रयेऽपि नास्ति तादृशं देहस्वरूपं एवं पूर्वोक्तप्रकारेण वर्णितमिति सम्बन्धः।

देहेऽस्मिन्निति । अस्मिन्नुक्तरूपे देहे, अहङ्कारेण कर्त्रा अपायेन हेतुना, महोपाये महति उपाये मोक्षोपाये, बुद्धयो विचाराः, न क्रियन्ते, हन्तेति खेदे । अनुचितमेतदित्यर्थः। यद्वा "मह उद्धव उत्सवः" इत्यमरवचनात् महः महोत्सवः मोक्षः, मोक्ष एव उत्सवो मुख्यः, इतरेषां क्षयिष्णुत्वात् । भाक्तमुत्सवत्वम् , तदनुकूला बुद्धयो न क्रियन्ते । अथवा महसः जीवनायत्तस्य तेजोविशेषस्य अपायो अपगमः मरणमिति यावत् । न विद्यते महोपायो मरणं यस्येति तथा, अजरामर इति यावत् । उक्तरीत्या अतिकश्मले क्षणभङ्गुरे देहे अजरामरत्वबुद्धयः क्रियन्त इति महदेतदनुचितमित्यर्थः। तस्मादेतस्य अहङ्कारास्पदीभूतस्य देहस्य स्वरूपमवश्यं बोद्धव्यं विरक्तिदार्ढ्यायेति भावः ॥५०-५१॥

॥ इति श्रीमद्विशुद्धाद्वैतसिद्धान्तप्रतिष्ठापनैकधुरन्धर
श्रीमच्छङ्करानन्दभारतीविरचिते शिवगीताभाष्ये नवमोऽध्यायः॥

दशमोऽध्यायः

श्रीराम उवाच -

भगवन्! कुत्र जीवोऽसौ जन्तोर्देहेऽवतिष्ठते।
जायते वा कुतो जीवः? स्वरूपं वास्य किं ? वद ॥ १ ॥

अस्मिन् पूर्वोक्तजन्तोर्देहे जीवः किमवतिष्ठते, जायते वा वद । किञ्च जीवः कुतः? जीवत्वं किं स्वाभाविकं, आविद्यकं वेति वद । अस्य जीवस्य स्वरूपं वा किम्? सच्चिदानन्दात्मकं तद्विलक्षणं वेत्यर्थः ॥ १ ॥

देहान्ते वा कुतो याति गत्वा वा कुत्र तिष्ठति।
कथमायाति वा देहं पुनर्नायाति वा वद[117] ॥ २ ॥

देहान्ते इति । देहान्ते च जीवः कुत्र गच्छति, कुत्र च तिष्ठतीत्यादि सर्वं वद । पुनर्देहं कथमायाति ? यदि वा पुनर्देहं नायाति तदपि वद । अत्र सर्वेषु पक्षेषु दूषणानि प्रतीयन्त इति भावः। तथा हि । यदि जीवो व्यापकस्सन्नवतिष्ठते तर्हि मरणादौ जीवस्य गमनादिकं श्रूयमाणं बाध्येत। यदि न जायते तर्हि कृतहानाकृताभ्यागमप्रसङ्गात् । एवं जीवत्वस्य स्वाभाविकत्वे ब्रह्मणा सह जीवस्य भेदोऽपि स्वाभाविकः स्यात् । विरुद्धधर्माध्यासात् अविद्यावत्वेन जीवतापत्तौ प्रागुक्तदोषानापत्तिः। एवं जीवस्य सच्चिदानन्दस्वरूपत्वे मुक्तिदशातो अविशेषापत्तिः। तद्विपरीतत्वे तु परमप्रेमास्पदत्वाद्यनुपपत्तिः। तद्विरहे तु स्वर्गनरकादिप्रतिपादक बहुतरवचनविप्लवापत्तिः इति ॥ २ ॥

---

११७ "पुनर्न यदि वा वद" इति पाठान्तरम् ।

श्रीभगवानुवाच -

साधु पृष्टं महाभाग ! गुह्याद्गुह्यतमं हि यत् ।
देवैरपि सुदुर्ज्ञेयमिन्द्राद्यैर्वा महर्षिभिः ॥ ३ ॥

साधु पृष्टमिति । प्रागुक्तसर्वपक्षेषु बाधकस्फूर्तिसम्भवात् तस्य च गुरूपदेशं विना स्वतः उत्प्रेक्षितुमशक्यत्वादिति भावः। इन्द्राद्यैः देवैरपि सुदुर्ज्ञेयं महर्षिभिश्च सुदुर्ज्ञेयमित्यर्थः। वा शब्दस्समुच्चये॥ ३ ॥

अन्यस्मै नैव वक्तव्यं मयाऽपि रघुनन्दन ।
त्वद्भक्त्याहं परं प्रीतो वक्ष्याम्यवहितः शृणु ॥ ४ ॥

सत्यज्ञानात्मकोऽनन्तः परमानन्दविग्रहः ।
परमात्मा परंज्योतिरव्यक्तो व्यक्तकारणम् ॥ ५ ॥

अव्यक्त इति । अविद्यया जीवान् प्रत्यावृत इत्यर्थः। व्यक्तकारणम् - घटादिभासकः ॥ ४-५ ॥

नित्यो विशुद्धस्सर्वात्मा निर्लेपोऽहं निरञ्जनः ।
सर्वधर्मविहीनश्च न ग्राह्यो मनसाऽपि च ॥ ६ ॥

विशुद्धः - वन्धरहितः। निर्लेपः - उपचयशून्यः। "लिप उपदेहे" उपदेहो वृद्धिरिति धातुवृत्तिकाराः। निरञ्जनः - गमनरहितः। 'अञ्जू - व्यक्तिम्रक्षणकान्तिगतिषु' इतिधातोः ल्युट् । अतः सर्वधर्मविहीनश्चेत्यनेन

सह विशुद्धनिर्लेपनिरञ्जनशब्दानां न पौनरुक्त्यम् ॥ ६ ॥

नाहं सर्वेन्द्रियग्राह्यः सर्वेषां ग्राहको ह्यहम् ।
ज्ञाताऽहं सर्वलोकस्य मम ज्ञाता न विद्यते ॥ ७ ॥
दूरस्सर्वविकाराणां परिणामादिकस्य च ॥ ८ ॥

नाहं सर्वेति । तथा च श्रुतिः - "न चक्षुषा गृह्यते नापि वाचा नान्यैर्देवैः" (मु.उ. ३-१-८) इति । देवैरिन्द्रियैरित्यर्थः। न चैवं "सर्वप्रत्ययवेद्ये च ब्रह्मरूपे व्यवस्थिते" इति वचनविरोधः। प्रपञ्चतादात्म्यापन्नस्य सकल प्रमाणगोचरत्वेऽपि शुद्धस्योपनिषदेकगम्यत्वात् । "शास्त्रयोनित्वात्" (ब्र.सू. १-१-३) इत्यधिकरणे द्वितीयवर्णके तथैव सिद्धान्तितत्वात्। परिणामादिकस्येत्यादिपदात् आरम्भनिरासः। विवर्तस्तु पूर्वाध्याये स्फुटमभ्युपगतः "अधिष्ठाने तु मय्येव" (९-७) इत्यादिना ॥ ७-८ ॥

यतो वाचो निवर्तन्ते अप्राप्य मनसा सह ।
आनन्दं ब्रह्म मां ज्ञात्वा न बिभेति कुतश्चन ॥ ९ ॥

यस्तु सर्वाणि भूतानि मय्येवेति प्रपश्यति ।
मां च सर्वेषु भूतेषु ततो न विजुगुप्सते ॥ १० ॥

"यतो वाच"(६-५१) इति, षष्ठाध्याये व्याख्यातमेतत् । न विजुगुप्सत इति । ब्रह्मात्मनैव सर्वग्रहणान्न किञ्चिदपि निन्दतीत्यर्थः ॥ ९-१० ॥

यस्य सर्वाणि भूतानि ह्यात्मैवाभूद्विजानतः।

को मोहस्तत्र कश्शोक एकत्वमनु पश्यतः ॥ ११ ॥

एष सर्वेषु भूतेषु गूढोत्मा न प्रकाशते ।
दृश्यते त्वग्ग्रया बुद्ध्या सूक्ष्मया सूक्ष्मदर्शिभिः ॥ १२ ॥

गूढोत्मेति। गूढः आत्मेति पदच्छेदः, पृषोदरादित्वात्साधुता । यदाहुः "गूढोत्मा वर्णविकृतेर्वर्णनाशात्पृषोदरम्" इति ॥ ११-१२ ॥

नन्वद्वितीयश्चेत् त्वं तर्हि कथं जगदुत्पत्तिः त्वत्तस्स्यात् , परिणामिनोऽन्यस्य विरहादित्याशङ्क्याह - अनाद्यविद्येति ।

अनाद्यविद्यया युक्तस्तथाप्येको ऽहमव्ययः।
अव्याकृतब्रह्मरूपो जगत्कर्ता महेश्वरः ॥ १३ ॥

अव्याकृतं नामरूपात्मनानभिव्यक्तस्वरूपं अविद्याशबलं ब्रह्म तत्स्वरूपो भूत्वा जगत्कर्ताऽस्मि ॥ १३ ॥

ज्ञानमात्रे यथा दृश्यमिदं स्वप्ने जगत्त्रयम् ।
तद्वन्मयि जगत्सर्वं दृश्यतेऽस्ति विलीयते ।
नानाऽविद्यासमायुक्तो जीवत्वेन वसाम्यहम् ॥ १४ ॥

पञ्च कर्मेन्द्रियाण्येव पञ्च ज्ञानेन्द्रियाणि च ।
मनो बुद्धिरहङ्कारश्चित्तं चेति चतुष्टयम् ।
वायवः पञ्च मिलिताः यान्ति लिङ्गशरीरताम् ॥ १५ ॥

तन्नाविद्यासमायुक्तं चैतन्यं प्रतिबिम्बितम् ॥१६॥

ज्ञानमात्रेति । ज्ञानमात्रस्याविद्याविषयतया अधिष्ठातृत्वात् तत्रैव परिदृश्यमानं जगदध्यस्तम् । तथा हि - जाग्रत्प्रपञ्चो मिथ्या दृश्यत्वात् स्वप्नप्रपञ्चवदित्यनुमानमपि श्रुत्युक्तेऽर्थे उपष्टम्भकतयोक्तम् । नन्वेतावता प्रबन्धेन परमात्मस्वरूपे निरूपितेऽपि अध्यायोपक्रमोक्तेषु जीवविषयकेषु मदीयप्रश्नेषूत्तरं न लब्धमेवेत्याशङ्क्याह - नानेति । अहमेव जीवत्वेन वसामीति सम्बन्धः। अनेन जीवस्वरूपं कीदृशमिति प्रश्ने सच्चिदानन्दात्मकमित्युत्तरं सूचितम् । उत्पद्यते न वेति प्रश्ने नोत्पद्यत इत्युत्तरञ्च । नानाऽविद्यासमायुक्त इत्युक्त्या अनादेरपि जीवस्य अविद्यास्थित्यधीनस्थितिकत्वरूपं अविद्यायुक्तत्वं न विरुध्यत इति सूचितम् । नानेत्युक्त्या शुकादेर्मुक्ततया इदानीं संसारो नोपलभ्यते इति दूषणमुद्धृतम् । अविद्याशब्देनैव आवरणशक्तिं सूचयता पूर्णानन्दस्सन्नपि आवृतत्वादामोक्षं न भासते पश्चाद्भासत इति मुक्तसंसारिणोर्विशेषोऽपि उपपादितः। लोकान्तरगमनागमनादिकं कथमिति परमवशिष्यते । तदपि लिङ्गशरीरोपहितस्य नानुपपन्नमिति प्रतिपादयन् लिङ्गशरीरमाह - पञ्चेति। इदमेवाचार्याः संजगुः "पञ्चप्राणमनोबुद्धिदशेन्द्रियसमन्वितम् । अपञ्चीकृत भूतोत्थं सूक्ष्माङ्गं भोगसाधनम्" इति । तत्र - लिङ्गशरीरे, अविद्यया समायुक्तं अधिष्ठानत्वात् तत्तादात्म्यापन्नमित्यर्थः ॥१३-१६॥

व्यावहारिकजीवस्तु क्षेत्रज्ञः पुरुषोऽपि वा।
स एव जगतां भोक्ताऽनाद्ययोः पुण्यपापयोः।
इहामुत्र गतिस्तस्य[११८] जाग्रत्स्वप्नादिभोक्तृता ॥१७॥

---

११८ "इहामुत्र गती तत्र" इति पाठान्तरम् ।

एवम्भूतं प्रतिबिम्बचैतन्यं व्यवहारक्षमो जीवः क्षेत्रज्ञः पुरुषशब्दवाच्योऽपि भवतीत्यर्थः। अनाद्ययोः - न आद्ये अनाद्ये, तयोः, प्रवाहरूपेण अनादिभूतयोरित्यर्थः ॥ १७ ॥

यथा दर्पणकालिम्ना मलिनं दृश्यते मुखम् ।
तद्वदन्तःकरणगैर्दोषैरात्मापि दृश्यते ॥ १८ ॥

परस्पराध्यासवशात् स्यादन्तःकरणात्मनोः।
एकीभावाभिमानेन परात्मा दुःखभागिव ॥ १९ ॥

आत्मापीति - प्रतिबिम्बचैतन्यमपीत्यर्थः। तथा च औपाधिकश्यामत्वावदाततत्ववत् संसारसर्वज्ञते अपि व्यवस्थिते इति भावः। दुःखभागिवेति इवशब्देन दुःखस्य विषमसत्ताकतां सूचयति । अरुण इव स्फटिको दृश्यत इत्यादौ यथा मूढचित्तस्यापि ॥ १८-१९ ॥

मरुभूमौ जलत्वेन मध्याह्नार्कमरीचयः।
दृश्यन्ते मूढचित्तस्य न ह्यार्द्रास्तापकारकाः॥ २० ॥

तद्वदात्मापि निर्लेपो दृश्यते मूढचेतसाम् ।
स्वाविद्यात्मात्मदोषेण कर्तृत्वादिकधर्मवान् ॥ २१ ॥

न हि जलत्वेन गृह्यमाणा मरुमरीचय आर्द्राः, किन्तु सन्तपकारिण एव । तद्वत् स्वाविद्यात्मना स्वविषयकाविद्यारूपेणात्मदोषेण कर्तृत्वादिधर्मैः दृश्यते, न त्वेतावता अकर्तृत्वादिस्वभावभङ्ग इति भावः। इदमेवाभिप्रेत्याह

भाष्यकारः "यत्र यदध्यासः, तत्कृतेन दोषेण गुणेन वाऽणुमात्रेणापि स न सम्बध्यते" (ब्र.सू. अध्यासभाष्ये) - इति । आरोपितेनारुणिम्ना साक्षादविकृतस्फटिकस्वच्छत्वानपायात् ॥२०-२१॥

छान्दोग्यस्याष्टमाध्याये "अथ यदिदमस्मिन् ब्रह्मपुरे दहरं पुण्डरीकं वेश्म दहरोऽस्मिन्नन्तराकाशस्तस्मिन् यदन्तस्तदन्वेष्टव्यं तद्वाव विजिज्ञासितव्यम्" (छा.उ. ८-१-१) इत्यादिना दहरविद्याख्यायते । तद्विवरणमुखेन व्यापकस्याप्यौपाधिकपरिच्छेदं पूर्वोक्तं दृढयति - तत्र चेत्यादिना ।

तत्र चान्नमये पिण्डे हृदि जीवोऽवतिष्ठते ।
आनखाग्रं व्याप्य देहे तद्ब्रुवेऽवहितः शृणु ॥२२॥

सोऽयं तदभिमानेन मांसपिण्डो विराजते ॥२३॥

तत्र - अविद्यावच्छिन्नोऽन्नमयो यः पिण्डः तस्मिन् देहे, आनखाग्रं व्याप्य जीवो हृद्यवतिष्ठते, औपाधिकमल्पपरिमाणत्वं भजत इत्यर्थः। तदेतद्ब्रुवे - विवृणोमि, अवहितस्सन् शृणु । सोऽयमिति । सोऽयं मांसपिण्डः तदभिमानेन तत्तादात्म्याध्यासबलेन विराजते, 'मनुष्योऽहम्' 'गौरोऽहम्' इति स्फूर्तिं लभते । तथा च आनखाग्रं स्थूलदेहव्याप्तौ न सन्दिग्धव्यम्, अन्यथा साक्षितादात्म्याभावाद्देहस्य भानानुपपत्तेरित्यर्थः ॥२२-२३॥

इदानीं हृदयावच्छेदप्रयुक्तामल्पतां प्रपञ्चयितुं हृदयस्वरूपं तावदाह - नाभेरूर्ध्वमिति ।

नाभेरूर्ध्वमधःकण्ठाद्व्याप्य तिष्ठति यत्सदा ।
तस्य मध्येऽस्ति हृदयं सनालं पद्मकोशवत् ॥२४॥

अधोमुखं च तत्रास्ति सूक्ष्मं सुषिरमुत्तमम् ।
दहराकाशमित्युक्तं तत्र जीवोऽवतिष्ठते ॥२५॥

यत् प्राणवायुस्वरूपं नाभेरूर्ध्वं कण्ठाच्चाधस्तिष्ठति तस्य मध्ये पद्मकोशनिभम् अधोमुखं हृदयमस्ति । तत्र हृत्पद्मे सुषिरमस्ति। दहरशब्दोऽल्पपर्यायः। श्रुतिस्थं ब्रह्मपुरपदं ब्रह्मणः पुरमिति व्युत्पत्या ब्रह्मोपलब्धिस्थानभूतविद्याधिकारिशरीरपरमिति स्फुटीकृतम् । उक्तं च "उपलब्धेरधिष्ठानं ब्रह्मणो देहमुच्यते । तेन साधारणत्वेन देहो ब्रह्मपुरं भवेत्"इति । "तत्रास्ति सूक्ष्मं सुषिर"मित्युपक्रम्य "दहराकाश"मित्युक्त्या यद्यपि श्रुतावाकाशशब्दः छिद्रपर इति प्रतीयते । "तत्र जीव" इत्युक्त्या च "तस्मिन् यदन्त"रिति श्रुतौ तच्छब्दः छिद्रपरः यच्छब्दश्च जीवपर इति प्रतीयते । तच्चायुक्तम् । "दहर उत्तरेभ्यः" (ब्र.सू. १-३-१४) इत्यधिकरणे ब्रह्मैवात्राकाशशब्दार्थ इति निर्णीतत्वात् । "आकाशो वै नाम नामरूपयोर्निर्वहिता" (छा.उ. ८-१४-१), "आकाशादेव समुत्पद्यन्ते" (छा.उ. १-९-१) इत्यादिश्रुतिष्वाकाशशब्दस्य ब्रह्मपरतया सुप्रसिद्धत्वाच्च। "आकाशस्तल्लिङ्गात्" (ब्र.सू. १-१-२२) इति सूत्रे तथैवाभिधानाच्च । न चैवं "तस्मिन् यदन्तस्तादि"त्यादिना अन्वयः, तच्छब्दस्य व्यवहितपुण्डरीकपरामर्शकत्वात् । तथा च स्कान्दपुराणे ब्रह्मगीतायामुक्तं "अस्मिन् ब्रह्मपुरे वेश्म यदिदं दहरं सुराः। पुण्डरीकं तु तन्मध्ये आकाशो दहरोऽस्ति तत् । स शिवः सच्चिदानन्दस्सोऽन्वेष्टव्यो मुमुक्षुभिः" इति, तथापि सुषिः छिद्रं, "रन्ध्रं श्वभ्रं वपा सुषि"रित्यमरः, तां रात्यादत्ते

अधिष्ठानत्वादिति सुषिरमधिष्ठानं, तदेव च "हृदाकाश"मिति श्रुत्या उक्तमिति शिवगीताश्लोको व्याख्येयः। तत्र - पूर्वोक्ते हृदये, योऽवतिष्ठते स एव जीव इति जीवब्रह्मणोरभेदपरश्चतुर्थचरणः। अत एवास्मिन् प्रकरणे "उभे अस्मिन् द्यावापृथिवी अन्तरेव समाहिते" (छा.उ. ८-१-३) इत्यादिना अशेषजगदाधारत्वम् , सेतुरिति जगन्मर्यादाधारकत्वमिति ब्रह्मलिङ्गानि, तथा "एष सम्प्रसादोऽस्माच्छरीरात् समुत्थाय परं ज्योतिरुपसम्पद्य" (छा.उ. ८-३-४) इत्यादिलिङ्गानि च श्रूयमाणानि न विरुध्यन्त इति दिक् ॥२४-२५॥

वालाग्रशतभागस्य शतधा कल्पितस्य च।
भागो जीवस्स विज्ञेयस्स चानन्त्याय कल्पते ॥२६॥

वालाग्रं केशाग्रं, तस्य शतभागः शतांशः, सोऽपि शतधा कल्प्यः, तस्यापि यो भागः स जीवो विज्ञेयः, उपाधिवशादतिसूक्ष्म इत्यर्थः। वास्तवं तु जीवस्वरूपमाह - स चेति । आनन्त्याय - परिच्छेदरहिताय, कल्प्यते, उपाध्यपगमे सतीति भावः॥२६॥

"अथ यत्रैतदस्माच्छरीरादुत्क्रामत्यथैतैरेव रश्मिभिरूर्ध्वमाक्रमते" (छा.उ. ८-६-५) इति, "तयोर्ध्वमायन्" (छा.उ.८-६-६) इति च दहरविद्याकाशे श्रवणात् , तस्य च प्रसङ्गादुपासकानां मूर्धन्यया नाड्या उत्क्रमणपूर्विकां क्रममुक्तिं कथयितुं नाडीस्तावत्प्रपञ्चयति - कदम्बेति ।

कदम्बकुसुमोद्भूतकेसरा इव सर्वतः।
प्रसृता हृदयान्नाड्यो याभिर्व्याप्तं शरीरकम् ॥२७॥

हितं बलं प्रयच्छन्ति यस्मात्तेन हिताः स्मृताः।
द्विसप्ततिसहस्रैस्तास्सङ्ख्याता योगवित्तमैः॥ २८॥

हितमिति । हितशब्दस्य विवरणं - बलमिति । प्रयच्छन्ति यस्मादिति । तथा च हितं कुर्वन्ति ते, हितयन्तीति हिताः, तत्करोतिण्यन्तात् पचाद्यजिति भावः॥ २७-२८॥

हृदयात्तास्तु निष्क्रान्ता यथार्काद्रश्मयस्तथा।
एकोत्तरशतं तासु मुख्या विष्वग्विनिर्गताः॥ २९॥

'हिता नाम हृदयस्य नाड्य' इति श्रुतिसिद्धा एषां संज्ञा । याज्ञवल्क्यस्त्वाह "द्विसप्ततिसहस्राणि हृदयादभिनिस्सृताः। हिताहिता नाम नाड्य" इति । तस्यापि हिताः हितकर्त्र्यः। अत एव हितानामेति पूर्वोक्तेनैकवाक्यतयैव व्याख्येयम् । हितमहितं दत्तं याभिस्ता हिताहिता इति संज्ञान्तरमेव तत्रोक्तमिति केचित् । विष्वगिति - सर्वत इत्यर्थः॥२९॥

वहन्त्यम्भो यथा नद्यो नाड्यः कर्मफलं तथा ।
अनन्तैकोर्ध्वगा नाडी मूर्धपर्यन्तमञ्जसा ॥३०॥

एका नाडी सुषुम्नाख्या, अञ्जसा - आञ्जस्येन, मूर्धपर्यन्तं ऊर्ध्वं गच्छतीत्यूर्ध्वगा, अनन्तफलदत्वाच्चानन्ता सैवोच्यते॥ ३०॥

अनन्तफलदामेव विशदयितुं इतरासां फलं तावदाह - प्रतीन्द्रियमिति ।

प्रतीन्द्रियं दश दश निर्गता विषयोन्मुखाः।
नाड्यः शर्मादिहेतुत्वात् स्वप्नादिफलभुक्तये ॥३१॥

ज्ञानकर्मेन्द्रियाणि मिलित्वा दशेति व्युत्पादितं प्राक्। तत्रैकैकमिन्द्रियं प्रति दश दश नाड्यः निर्गताः, ताश्च शतं नाड्यः शर्मादिहेतुत्वात् सुखदुःखादौ हेतुत्वात् स्वप्नहेतुत्वाच्च यथायथं जाग्रदादिभोगाय उपयुज्यन्ते॥३१॥

सुषुम्नेति समादिष्टा तया गच्छन् हि मुच्यते[११९]।
तयोपचितचैतन्यं जीवात्मानं विदुर्बुधाः ॥३२॥

सम्यगादिष्टा समादिष्टा। अनन्तफलकतया प्रागुदाहृता या नाडी सुषुम्ना तया गच्छन् मुच्यते हि, यस्मादनन्तोक्तिर्युक्तेत्यर्थः। हिशब्दः प्रसिद्धौ। तथा च श्रुतिः "शतं चैका च हृदयस्य नाड्यस्तासां मूर्धानमभिनिस्सृतैका। तयोर्ध्वमायन्नमृतत्वमेति विष्वङ्ङन्या उत्क्रमणे भवन्ति" (क.उ. २-३-१६) इति। ननु सुषुम्नया निर्गमनं मोक्षोपाय इत्युक्तिरसङ्गता, "ज्ञानादेव तु कैवल्य"मिति शास्त्रसिद्धान्तभङ्गप्रसङ्गात् इत्याशङ्क्याह - तयेति। उपचितम् - आविर्भूतं, चैतन्यं - ज्ञानम्, उपास्यगोचरं मार्गगोचरं च यस्य तथाभूतं जीवमाहुः। अयं भावः - नेह परममुक्तिरुत्क्रमणजन्येति विवक्षितम्, तत्रोत्क्रमणस्यैवाभावात्। तथा च श्रुतिः "न तस्य प्राणा उत्क्रामन्ति" (बृ.उ. ४-४-६), "अत्रैव समवनीयन्ते" इति। किन्तु ब्रह्मलोकावाप्तिरूपा गौणी मुक्तिः। तथा चोपासकस्य "तदोकोऽग्रज्वलनं तत्प्रकाशितद्वारो विद्यासामर्थ्यात्" (ब्र.सू. ४-२-१७) इत्यत्र वर्णितरीत्या गुणोपास्यविषयिण्या

---

११९ "गच्छन् विमुच्यते" इति पाठान्तरम्।

मार्गविषयण्याश्च वृत्तेरुदयो मरणकाले भवतीति शास्त्रसिद्धान्तात् । वृत्तिविशिष्टस्योत्क्रमणं पूर्वोक्तया नाड्या अर्चिरादिमार्गेण गमनं च शास्त्रसिद्धम् । तथा च "तदुपर्यपि बादरायणस्सम्भवात्" (ब्र.सू. १-३-२६) इति न्यायेन ब्रह्मलोक एव निर्गुणसाक्षात्कारोपपत्तौ क्रमेण परममुक्तिः। तदुक्तं "ब्रह्मणा सह ते सर्वे सम्प्राप्ते प्रतिसञ्चरे । परस्यान्ते कृतात्मानः प्रविशन्ति परं पदम्" इति ॥३२॥

ननु जीवस्य शरीरावच्छेदेनैव भानान्मध्यमपरिमाणतैवोचिता, अन्यथा शरीरानवच्छेदेनापि भासेतेत्याशङ्कायामाह - यथेति ।

यथा राहुरदृश्योऽपि दृश्यते चन्द्रमण्डले।
तद्वत्सर्वगतोऽप्यात्मा लिङ्गदेहेऽपि दृश्यते ॥३३॥

दृश्यमाने यथा कुम्भे घटाकाशोऽपि दृश्यते।
तद्वत्सर्वगतोऽप्यात्मा लिङ्गदेहेऽपि दृश्यते ॥३४॥

सर्वगतस्याप्यात्मनः अभिव्यक्तौ लिङ्गशरीरं प्रयोजकमित्यर्थः ॥३३-३४॥

नीयमाने यथा कुम्भे घटाकाशोऽपि नीयते ।
तद्वत्सर्वगतोऽप्यात्मा लिङ्गदेहे विनिर्गते ॥३५॥

निश्चलः परिपूर्णोऽसौ गच्छतीत्युपचर्यते।
जाग्रत्काले यथाज्ञेयमभिव्यक्त विशेषधीः॥ ३६॥

व्याप्नोति निष्क्रियस्सर्वान् भानुर्दशदिशो यथा ।
नाडीभिर्वृत्तयो यान्ति लिङ्गदेहसमुद्भवाः ॥ ३७॥

यथा ज्ञेयमिति । ज्ञेयं घटादिकमनतिक्रम्य यथाज्ञेयम् , अभिव्यक्ता घटाद्याकारान्तःकरणवृत्त्या निवृत्तावरणा या विशेषधीः घटाद्युपहितचैतन्यं यथा तथा भूतस्सन् सर्वान् पदार्थान् व्याप्नोति । प्रतिकर्मव्यवस्थाव्युत्पादने स्फुटमेतत् । वृत्तयः - इन्द्रियजन्यवृत्तयः, यान्ति - प्राप्नुवन्ति, विषयं व्याप्यैव उत्पद्यन्त इत्यर्थः ॥ ३५-३७॥

तत्तत्कर्मानुसारेण जाग्रद्भोगोपलब्धये ।
इदं लिङ्गशरीराख्यमामोक्षं न विनश्यति ॥ ३८॥

आत्मज्ञानेन नष्टेऽस्मिन् साविद्ये स्वशरीरके।
आत्मस्वरूपावस्थानं मुक्तिरित्यभिधीयते ॥ ३९॥

उत्पादिते घटे यद्वद्घटाकाशत्वमृच्छति।
घटे नष्टे यथाऽऽकाशः स्वरूपेणावतिष्ठते ॥ ४०॥

इदमिति । "तदापीतेः संसारव्यपदेशात्" (ब्र.सू. ४-२-८) इति सूत्रे स्थितमेतत् । अवतिष्ठत इति , "समवप्रविभ्यः स्थः" (पा.सू. १-३-२२) इति तङ्। अत्र तद्वदिति शेषः, पूर्वेण चान्वयः ॥ ३८-४०॥

इदं लिङ्गशरीरमामोक्षं न विनश्यतीत्युक्तम् , तदेव द्रढयितुं अवस्थात्रये तत्सद्भावं प्रतिपादयन् जाग्रदवस्थामभिधाय स्वाप्नावस्थामाह - जाग्रदिति।

जाग्रत्कर्मक्षयवशात् स्वप्नभोग उपस्थिते।
बोधावस्थां तिरोधाय देहाद्याश्रयलक्षणाम् ॥४१॥

जाग्रद्भोगप्रदं यत्कर्म तस्य क्षयः प्रतिबन्धः तद्वशात् स्वप्नभोगप्रदे कर्मणि उद्बुद्धे सति अन्यामवस्थां प्रयातीति सम्बन्धः। किं कृत्वा? ये जाग्रत्कालीनदेहगृहारामादयः, तेषामाश्रयणमाश्रयः, साक्षात्कार इति यावत् । तल्लक्षणां तत्स्वरूपां बोधावस्थां, तिरोधाय - आच्छाद्य, परित्यज्येति यावत् ॥४१॥

कर्मोद्भावितसंस्कारस्तत्र स्वप्नरिरंसया ।
अवस्थां च प्रयात्यन्यां मायावीवात्ममायया ॥४२॥

कर्मेति । कर्मणा स्वप्नभोगप्रदेन उद्भावित उद्बोधितस्संस्कारः स्वप्नगजादिजनकीभूतो यस्य तथाभूतः, स्वप्नरिरंसया - 'स्वप्नेनायं रमता'मित्येवमाकारिकया ईश्वरच्छयेत्यर्थः। रमेरन्तर्भावितण्यर्थात् सन्, ततो भावे "अ प्रत्ययात्" (पा.सू. ३-३-१०२) इति अप्रत्ययः। अयं भावः, स्वप्नस्तावत् जाग्रद्वत् घटपटादिपदार्थाननुभावयति । स चानुभवो न प्रमारूपः। जागरणानन्तरं बाधात् । भ्रमस्त्वनिर्वचनीयख्यातिरूप एवेति तत्र पदार्थोत्पत्तिस्स्वीकार्या, तत्र दोषसंस्कारसम्प्रयोगजन्यतायाः शुक्तिरजतादौ स्वीकारात् , इहापि तत्त्रितयमुपपादनीयम् । तत्र अन्यामवस्थामित्युक्त्या निद्राख्यस्वप्नावस्थैवात्रागन्तुको दोष इत्युक्तम् । कर्मोद्भावितेत्याद्युक्त्या उद्बुद्धः संस्कारोऽप्यस्तीत्यक्तम् । आत्ममाययेत्यनेन मूलाज्ञानकार्यं स्वप्नप्रपञ्च इत्युक्तम् । न चैवं वियदादिवद्व्यावहारिकतापत्तिः, निद्राख्यस्याविद्यातिरिक्तदोषस्यापि सत्वेन

प्रातिभासिकतोपपत्तेः। अत एव देशकालाद्यनानुगुण्यमपि न दोषाय। तदेतत्सूत्रकारोऽप्याह "सन्ध्ये सृष्टिराह हि" (ब्र.सू. ३-२-१), "मायामात्रं तु कार्त्स्न्येनानभिव्यक्तस्वरूपत्वात्" (ब्र.सू. ३-२-३) इति । ननु सम्प्रयोगाभावे कथं स्वप्नाद्या इत्याशङ्क्य सम्प्रयोगो हि अधिष्ठानसामान्यज्ञानसम्पादकतया शुक्तिरजतादावुपयुज्यते । स्वाप्नपदार्थानां तु मूलाज्ञानकार्यत्वाद्ब्रह्मैवाधिष्ठानम् । तत्सामान्यज्ञानं त्वानन्दात्मना आवृतं स्वरूपमेवेत्युत्तरं सूचयितुं आत्ममाययेत्युक्तिः। न चैवं जाग्रद्बोधेन बाधो न स्यादिति वाच्यम् । सविलासाविद्यानिवृत्तिरूप बाधविरहे इष्टापत्तेः। मिथ्यात्वानाश्रयमात्रे तु न काचिदनुपपत्तिः। मूलाज्ञानानभ्युपगन्तृणां शुक्तिरूप्येऽप्येषैव गतिरिति दिक् ॥४२॥

स्वप्नपदार्थानां शुक्तिरजतादिवत्केवलसाक्षिभास्यतामाह - घटादीति सार्धश्लोकेन ।

घटादिविषयान् सर्वान् बुद्ध्यादिकरणानि च ।
भूतानि कर्मवशतो वासनामात्रवस्थितान् ।
एतान् पश्यन् स्वयंज्योतिस्साक्ष्यात्मा व्यवतिष्ठते ॥४३॥

वासनया मातरि प्रमातरि अवस्थितान् - अन्तःकरणोपहितचैतन्ये अध्यस्तानित्यर्थः। तथाभूतान् सर्वान् घटादिविषयान् तथाभूतकर्मवशेन भूतानि उत्पन्नानि बुध्यादीनि कारणानि च । एतान् पदार्थान् पश्यन् भासयन् साक्षिभूतात्माऽवतिष्ठत इति सम्बन्धः॥४३॥

ननु स्वप्नेऽपि सृष्टेरभ्युपगमे कथं तस्य वासनामात्रत्वमिति व्यवहार इत्याशङ्क्याह - अत्रेति ।

अत्रान्तःकरणादीनां वासनाद्वासनात्मता ।
वासनामात्रसाक्षित्वं तेन तत्र परात्मनः॥ ४४॥

वासनाभिः प्रपञ्चोऽत्र दृश्यते कर्मचोदितः।
जाग्रद्भूमौ यथा तद्वत्कर्तृकर्मक्रियात्मकः॥ ४५॥

निश्शेषबुद्धिसाक्ष्यात्मा स्वयमेव प्रकाशते ।
वासनामात्रसाक्षित्वं साक्षिणः स्वाप उच्यते ॥४६॥

अत्र चान्तःकरणादीनां पदार्थानां वासनादध्यस्तत्वेन आत्मनि व्यवस्थापनाद्वासनात्मतेति बोद्धव्यम् । न तु संस्कारमात्ररूपत्वम् , अपरोक्षतया भानादित्यर्थः। वासनाख्यसंस्कारप्रभवत्वाद्वा तथा व्यपदेश इत्याह - वासनाभिरिति । यथा जाग्रद्भूमौ तद्वदत्रापि कर्तृकर्मक्रियात्मकः प्रपञ्चो दृश्यते । यद्यपि वासना घटादिव्यावहारिकसृष्टावपि कारणम् , तथापि तत्र दण्डादयोऽपि अन्वयव्यतिरेकाभ्यां कारणम् , न त्विहापीति भावः। निश्शेषाणां बुद्धीनां - वोधविषयाणाम् , कर्मणि क्तिन् , साक्षिभूत आत्मा, स्वयमेव - प्रमाणजन्यवृत्तिनिरपेक्षस्सन्नेव प्रकाशते । तदेवं पूर्वोक्तं वासनामात्रसाक्षित्वं, स्वापः - स्वप्नः, इत्युच्यते ॥४४-४६॥

भूतजन्मनि यद्भूतं कर्म तद्वासनावशात् ।
नेदीयस्त्वाद्वयस्याद्ये स्वप्नं प्रायः प्रपश्यति ॥४७॥

मध्ये वयसि कार्कश्यात् करणानामिहार्दितः।

प्रायेण वीक्षते स्वप्नं वासनाकर्मणो वशात् ॥ ४८ ॥

भूतेति । भूतानां व्यावहारिकाणां जन्मनि जाग्रत्काल इति यावत् । यद्यद्भूतं स्तन्यपान-कन्दुकक्रीडात्मकं कर्म तद्विषयकवासनाप्राबल्यात्, आद्ये वयसि स्वप्नमपि प्रायस्तद्रूपं पश्यति । अत्र हेतुः नेदीयस्त्वादिति । सन्निहितकालीनानुभवगोचरसजातीयत्वादित्यर्थः। अतिशयेनान्तिकं नेदीयः। "अन्तिकबाढयोर्नेदसाधा"विति (पा.सू. ५-३-६३) नेदादेशः। मध्य इति । तारुण्ये इन्द्रियाणां पाटवाद्बहुतरव्यापारभरव्यग्रस्सन् वासनासहितं यत्कर्म तद्वशात् प्रायेण जाग्रत्कालानुभूतान् अध्यापनयुद्धकृषिवाणिज्यादीन् वीक्षते ॥ ४७-४८ ॥

यियासुः परलोकं तु कर्म विद्यादिसम्भृतम् ।
भाविनो जन्मनो रूपं स्वप्न आत्मा प्रपश्यति ॥ ४९ ॥

यियासुरिति । परलोकं - स्वर्गनरकादिकं, यियासुः, सम्भावितपरलोकगमन इति यावत्, आशङ्कायां वार्तिकोक्तस्सन् । तादृशो जनः कर्मणो विद्यादिभिश्च सम्भृतं लब्धप्रायं भाविनो जन्मनो यद्रूपं तत् प्रकर्षेण पश्यति - भाविजन्मसूचकस्वप्नान् पश्यतीत्यर्थः। मिथ्याभूतस्यापि सूचकतोपपत्तेः। यदाह सूत्रकारः "सूचकश्च हि श्रुतेराचक्षते च तद्विदः" (ब्र.सू. ३-२-४) इति ॥ ४९ ॥

यद्वत्प्रपतानाच्छ्येनः श्रान्तो गगनमण्डले ।
आकुञ्च्य पक्षौ यतते नीडे निलयनाय नीः ॥ ५० ॥

एवं जाग्रत्स्वप्नभूमौ श्रान्त आत्माभिसञ्चरन् ।
आपीतकरणग्रामः कारणेनैति चैकताम् ॥५१॥

यद्वदिति । गगनमण्डले, प्रकृष्टात्पतनात् - बहुतराद्भ्रमणात्, श्रान्तः श्येनः, नयतीति नीः, श्रमपरिहारोपायं विचारयन् सन् , पक्षौ आकुञ्च्य - सङ्कोच्य, नीडे, निलयनाय - संश्रयणाय, यद्वद्यतते एवं जाग्रत्स्वप्नावस्थयोः श्रान्तोऽहङ्कारावच्छिन्न आत्मा, आपीतो विलीनः करणानां इन्द्रियाणां ग्रामो यस्मिन् स तथोक्तस्सन् , कारणेन - ईश्वरात्मना सह, एकतामेति । यद्यप्यामोक्षं जीवब्रह्मणोः विम्बप्रतिविम्बभावेन औपाधिको भेदोऽस्त्येव । सत्युपाधौ तत्सम्बन्धे च सति औपाधिकस्य निवृत्त्ययोगात् । तथापि सुखदुःखादिभोगोपाधेः अहङ्कारस्य स्वापे विलयात् स्वरूपसुखांशो जाग्रत्कालापेक्षया किञ्चिदधिको भासते, दुःखं च नास्तीत्येतावन्मात्राभिप्रायेण एकतामेतीत्युक्तम् । एतेन सत्सम्पत्तिश्रुतयोऽपि[१२०] व्याख्याताः। "सुषुप्तिकाले सकले विलीने तमोभिभूतः सुखरूपमेती"ति कैवल्योपनिषत्प्रभृतयश्च अत्रानुसन्धेयाः ॥५०-५१॥

नाडीमार्गैरिन्द्रियाणा माकृष्यादाय वासनाः।
सर्वं ग्रसित्वा कार्यं च विज्ञानात्मा प्रलीयते॥ ५२॥

ईश्वराख्येऽव्याकृतेऽथ तथा सुखमयो भवेत् ।

---

१२० सत्सम्पत्तिश्रुतयः "सता सोम्य तदा सम्पन्नो भवति स्वमपीतो भवति तस्मादेनं स्वपितीत्याचक्षते स्वं ह्यपीतो भवति" (छा.उ. ६-८-१) , "प्राज्ञेनात्मना सम्परिष्वक्तो न वाह्यं किञ्चन वेद नान्तरम्"(वृ.उ. ४-३-२१) इत्यादयः।

कृत्स्नप्रपञ्चविलयस्तथा भवति चात्मनः ॥ ५३ ॥

मन एकतां चेत्प्राप्तस्तर्हि पुनरुत्थानानुपपत्तिरिति यथाश्रुतोपर्याशङ्कायां प्राप्तायामाह - नाडीमार्गैरिति । विज्ञानात्मा - प्रमातात्मा, सर्वं - चक्षुरादिकं, ग्रसित्वा, ईश्वराख्ये अव्याकृते मायोपहितचैतन्ये इति यावत्, प्रलीयते - सूक्ष्मरूपेणास्ति । न तु निरन्वयो निवर्तते, ज्ञानविहारात्, अतो नोक्तदोष इति भावः। तदेतदुक्तं प्राक् "इदं लिङ्गशरीराख्यमामोक्षं न विनश्यति" (१०-३८) इति । कृत्स्नप्रपञ्च विलय इति । इदञ्च हिरण्यगर्भाख्यस्य समष्ट्यभिमानिनः प्रमातुः सुषुप्तिमभिप्रेत्योक्तम्, व्यष्टिमात्रस्य सुषुप्तौ तु तदीयाहङ्कारेन्द्रियादिमात्रविलय इत्यन्यत्र विस्तरः॥५२-५३॥

योषितः काम्यमानायाः सम्भोगान्ते यथासुखम् ।
स आनन्दमयोऽबाह्यो नान्तरः केवलस्तथा ॥५४॥

ननु "सुखमयो भवेत्" इत्युक्तिरसङ्गता, सुखशब्दस्य शुभकर्मोपार्जितान्तःकरणवृत्तिविशेषविशिष्टे स्वरूपसुखे शक्तत्वेन अन्तःकरणविलयकाले तदयोगात् । अथात्र लक्षणया स्वरूपसुखमात्रं विवक्षितं तर्हि तस्य सार्वत्रिकत्वाज्जाग्रदादिभ्यः को विशेषः? अथ स्वरूपसुखं अन्यदा आवृतम्, सुषुप्तौ त्वनावृतमित्युच्येत तर्हि मोक्षदशातः अविशेषस्स्यात् । अधिष्ठानसाक्षात्कारं विना आवरणनिवृत्तेरयोगाच्च इत्याशङ्क्याह - आनन्दमय इति । सः जीवः, तदानीं आनन्दमयः - प्रचुरानन्दः, अबाह्यः - विषयसम्बन्धजनितवृत्तिविशिष्टज्ञानो न भवतीत्यर्थः। नान्तरः -

मोक्षावस्थायामिव निवृत्तमूलावरणोऽपि नेत्यर्थः। ननु कस्तर्हीत्याकाङ्क्षायामाह - योषित इति । काम्यमानाया योषितः, सम्भोगान्ते - सम्भोगमध्ये, यथा सुखं तथा केवलः स इति । अयं भावः। विषयसम्बन्धजनितवृत्त्या यथा स्वरूपानन्द एव ईषदभिव्यज्यते न सर्वात्मना अभिव्यक्तः, मोक्षाविशेषात् । न ईषदप्यनभिव्यक्तः, अनुभवविरोधात् विषयानुपादानप्रसङ्गाच्च । तथैवान्वयव्यतिरेकाभ्यां श्रुत्या च सुषुप्तावपि ईषत्स्वरूपसुखमभिव्यज्यते, तदेव च केवलं आनन्दमयशब्देनेह विवक्षितमिति ॥५४॥

प्राज्ञात्मानं समासाद्य विज्ञानात्मा तथैव सः।
विज्ञानात्मा कारणात्मा तथा तिष्ठन्नथापि सः॥५५॥

प्राज्ञेति । प्राज्ञात्मानं - ईश्वरात्मानम् , समासाद्य - सुषुप्तौ प्राप्यापि, सः - सुषुप्तः, विज्ञानात्मा - जीवः, तथा - जाग्रदादौ यथा तद्वत् । विज्ञानात्मैव, न तु भेदोपगम इत्यर्थः। तथा तिष्ठन् सन् कारणात्मेत्युच्यते । दुःखराहित्यसाधर्म्यादित्यर्थः। यथा चैतत्तथोक्तमधस्तात् ॥५५॥

अविद्यासूक्ष्मवृत्त्या ऽनुभवत्येव सुखं यथा ।
अज्ञानमपि साक्ष्यादि वृत्तिभिश्चानुभूयते ॥५६॥

तथाऽहं सुखमस्वाप्सं नैव किञ्चिदवेदिषम् ।
इत्येवं प्रत्यभिज्ञाऽपि पश्चात्तस्योपपद्यते ॥५७॥

ननु सुषुप्तावन्तःकरणस्य विलीनतया जन्यज्ञानाभावात् संस्कारासम्भवे

सुप्तोत्थितस्य 'सुखमहमस्वाप्सं न किञ्चिद्वेदिष'मित्याद्यनुसन्धानं न स्यादित्याशङ्क्याविद्यावृत्त्या तत्समर्थयते 'अथापि स' इत्यादिना 'तस्योपपद्यत' इत्यन्तेन । अथ - अन्तःकरणस्य विलीनत्वेऽपि, सः - सूक्ष्मावस्थान्तःकरणोपहितः, यथा - यथावत्सुखमनुभवत्येव । अज्ञानमपीति । न केवलं सुखमेवानुसन्धत्ते, किन्तु अज्ञानमपि साक्ष्यादिस्वापकालीनाभिरविद्यावृत्तिभिः, अनुभूयते - विषयीक्रियते। अविद्यावृत्तेः फलमाह - तथा सतीत्यर्थः। यद्यद्वृत्त्यवच्छिन्नं चैतन्यं यावतामित्यर्थः, सन्निश्चयरूपं तन्नाशस्य तावद्गोचर संस्कारजनकत्वात् अविद्यावृत्तेः अविद्यादिसकलविषयकत्वं नावश्यकम् , तथापि भाव्यनुसन्धानगोचरः सर्वोऽपि विनिगमकाभावादविद्यावृत्तेर्गोचरतया स्वीकर्तव्य इति भावः ॥५६-५७॥

जाग्रत्स्वप्नसुषुप्त्याख्य मेवेहामुत्रलोकयोः।
पश्चात् कर्मवशादेव विस्फुलिङ्गा इवानलात् ॥५८॥

जायन्ते कारणादेव मनोबुद्ध्यादिकानि तु ॥५९॥

पयः पूर्णघटो यद्वन्निमग्नः सलिलाशये।
तैरेवोद्धृत आयाति विज्ञानात्मा तथैत्यजात् ॥६०॥

तदेवमवस्थात्रयं निरूपितम् , इदं चेहलोकपरलोकयोः साधारणमित्याह - जाग्रदिति । पश्चात् - सुषुप्त्यनन्तरमित्यर्थः। ननु सुषुप्तौ अहङ्कारादेर्विलये पुनः जाग्रदहङ्कारान्तरोत्पत्तौ कृतहानाकृताभ्यागमौ स्यातामित्याशङ्क्याह - पयःपूर्णेति । अयं भावः। निरन्वयनाशाभ्युपगमे भवेदेवोक्तदोषः। सुषुप्तौ तु सूक्ष्मरूपेणाहङ्कारादिसत्वात् तस्यैव पुनः स्थूलावस्थाभ्युपगमान्न

कोऽपि दोष इति । उक्तञ्च पञ्चपादिकायां "सुषुप्त्यादौ चाहङ्कारादिविक्षेपः संस्कारमात्रशेषं स्थित्वा पुनरुद्भवती"ति । स्पष्टतरं चेदमुत्तरमीमांसायां "स एव तु कर्मानुस्मृतिशब्दविधिभ्यः" (ब्र.सू. ३-२-९) इत्यधिकरणे ॥५८ - ६०॥

विज्ञानात्मा कारणात्मा तथा तिष्ठंस्तथापि सः।
दृश्यते सत्सु तेष्वेव[१२१] नष्टेष्वायात्यदृश्यताम् ॥६१॥

अध्यायोपक्रमे कृतस्य जीवस्वरूपप्रश्नस्योत्तरं एतावत्पर्यन्तं यदुक्तं तदेव विशदयति - विज्ञानेति । सः - परमात्मैव, विज्ञानात्मा कारणात्मा चेति तथा तथा तिष्ठन् - स्वरूपद्वयेनावस्थित इत्यर्थः। यतः तेषु अज्ञानादिषु सत्स्वेव सर्वं प्रपञ्चजातं दृश्यते, नष्टेषु तु अज्ञानादिषु अदृश्यतामायाति ॥६१॥

एकाकारोऽर्यमा तत्तत्कार्येष्विव परः पुमान्।
कूटस्थो दृश्यते तद्वद्गच्छत्यागच्छतीव सः॥६२॥

एकेति । यथा एकाकारोऽपि सूर्यस्तत्कार्येषु जलादिषूपाधिषु दृश्यते, एवं परः पुमान् कूटस्थः - निर्विकारोऽपि तद्वदुपाधिवशादेव गच्छत्यागच्छतीव दृश्यते॥६२॥

ननु विरुद्धधर्माः सर्वे एकत्र कथं स्वीकर्तव्या इत्याशङ्क्याह - मोहेति ।

---

१२१ "सर्वमेष्वेव" इति पाठान्तरम्।

मोहमात्रान्तरायत्वात् सर्वं तस्योपपद्यते।
देहाद्यतीत आत्मापि स्वयंज्योतिस्स्वभावतः॥ ६३॥

एवं जीवस्वरूपं ते प्रोक्तं दशरथात्मज !॥ ६४॥

॥इति श्रीपद्मपुराणे शिवगीतासूपनिषत्सु
जीवस्वरूपनिरूपणं नाम दशमोऽध्यायः॥

मोहमात्रेति । मोहमात्र एव अन्तरायः - स्वरूपावभासप्रतिबन्धकः, आवरणस्थितिप्रयोजक इति यावत् , तथाभूतो यस्मिंस्तस्य भावः मोहमात्रान्तरायत्वम् । तस्मात्तस्य सर्वमुपपद्यते । विरुद्धधर्माणां स्वसमानसत्ताकभेदप्रयोजकं नास्तीति भावः॥ ६३-६४॥

॥ इति श्रीमद्विशुद्धाद्वैतसिद्धान्तप्रतिष्ठापनैकधुरन्धर
श्रीमच्छङ्करानन्दभारतीविरचिते शिवगीताभाष्ये दशमोऽध्यायः॥

एकादशोऽध्यायः

गमनागमने कथमिति प्रश्ने लिङ्गशरीररूपोपाधिवशादित्युत्तरं दत्तम् , तदेव विशदयितुमेकादशोऽध्याय आरभ्यते - देहान्तरेति ।

श्रीभगवानुवाच -

देहान्तरगतिं तस्य परलोकगतिं तथा ।
वक्ष्यामि नृपशार्दूल ! मत्तः शृणु समाहितः ॥ १ ॥

भुक्तं पीतं यतस्तत्र तद्रसादामबन्धनम् ।
स्थूलदेहस्य लिङ्गस्य तेन जीवनधारणम् ॥ २ ॥

यत इति प्रथमान्तात्तसिः। यद्भुक्तं पीतं च तस्य रसात् - परिणामविशेषात् , स्थूलदेहलिङ्गदेहयोः परस्परम् , आमबन्धनं - नूतनबन्धनं, भवति । तेन - दृढबन्धनेन, जीवस्य प्राणवायोः धारणं भवति ॥ १-२ ॥

व्याधिना जरया वाऽपि पीड्यते जाठरोऽनलः।
श्लेष्मणा तेन भुक्तान्नं पीतं वा न पचत्यलम् ॥ ३ ॥

व्याधिनेति । व्याधिना जरया वा प्रेरितेन श्लेष्मणा जाठरानलः पीड्यते, पीडितश्चानलः भुक्तमन्नं पीतं वा, अलं - पर्याप्तं, न पचति, श्लेष्मकृतपीडया कुण्ठितशक्तिकत्वात् ॥ ३ ॥

भुक्तपीतरसाभावात् तदा शुष्यन्ति धातवः।
भुक्तपीतरसेनैव देहे लिम्पन्ति नित्यशः॥ ४॥

भुक्तपीतेति । यद्यपि नित्यं धातवश्शुष्यन्त्येव, तथापि दीप्तेन जाठरानलेनोपष्टब्धाः प्राणवायवः पुनर्धातून् भुक्तपीतयोः रसेन सारभूतेन परिणामविशेषेण, लिम्पन्ति - उपचयन्तीति यावत्॥ ४॥

समीकरोति यत्तस्मात् समानो वायुरुच्यते।
इदानीं तद्रसाभावादाम बन्धनहानितः॥ ५॥

वायुविशेषस्तु लिप्तान् धातून् समीकुर्वन् सममानयतीति व्युत्पत्त्या समान इत्युच्यते । एषा च स्वस्थतावस्थायां जायमाना स्थितिरुक्ता । इदानीं जठरानलपीडाकाले तु तेषां भुक्तपीतानां रसस्याभावात् आमस्य नूतनस्य बन्धनस्य पूर्वोक्तस्य हानितः विरहत इति , एतच्च "लिङ्गं तनोर्व्रजे"दित्यनेन वक्ष्यमाणेन सम्बध्यते ॥५॥

परिपक्वरसत्वेन यथा गौरवतः फलम् ।
स्वयमेव पतत्याशु तथा लिङ्गं तनोर्व्रजेत् ॥ ६॥

परिपक्वेति । यथा कूश्माण्डादिफलं, गौरवतः - गुरुत्वात् , स्वयमेव - पुरुषप्रयत्नं विनैव, पतति तथा लिङ्गशरीरं परिपक्वः शुष्को रसो यस्य तथात्वेन, तनोः - स्थूलदेहात् , व्रजेत्॥ ६॥

तत्तत्स्थानादपाकृष्य हृषीकाणां च वासनाः।

आध्यात्मिकाधिभूतानि हृत्पद्मे चैकतां गतः ॥७॥

तत्रोर्ध्वगः प्राणवायुः संयुक्तो नववायुभिः।
ऊर्ध्वोच्छ्वासी भवत्येष तथा तेनैकतां गतः ॥८॥

तत्तदिति । हृषीकाणां - इन्द्रियाणां, वासनाः, तथा आध्यात्मिकानि - जीवात्मन्यध्यस्तानि बुद्धिप्रभृतीनि, तथा आधिभौतिकानि - भाविदेहारम्भकीभूतानि सोमाज्यपयःप्रभृतीनां सूक्ष्मरूपाणि । इत्थं त्रितयमप्याकृष्य एकतां गतः - पांसूदकवत् सम्पिण्डितस्वरूपः, एषः - प्राणवायुः, इतरैर्नवभिर्वायुभिस्संयुक्तस्सन् ऊर्ध्वोच्छ्वासी भवति । तथा तेन - प्राणवायुना, एकतां गतः - तादात्म्यापन्नः, जीवोऽपि, उपसर्पतीति वक्ष्यमाणेन सम्वध्यते । अत्र च भाविदेहारम्भकीभूतैः सहोत्क्रमणं "वेत्थ यथा पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" (छा.उ. ५-३-३) इति प्रश्नावतारणपूर्वकं द्युपर्जन्यपृथिवीपुरुषयोषित्सु पञ्चस्वग्निषु श्रद्धासोमवृष्ट्यन्नरेतोरूपाः पञ्चाहुतीर्दर्शयित्वा "इति तु पञ्चम्यामाहुतावापः पुरुषवचसो भवन्ति" (छा.उ. ५-९-१) इति श्रुत्या दर्शितम्। "तदन्तरप्रतिपत्तौ रंहति सम्परिष्वक्तः प्रश्ननिरूपणाभ्याम्" (ब्र.सू. ३-१-१) इत्यधिकरणे च निर्णीतम्, तत एव बोध्यम् ॥८॥

चक्षुषो वाऽपि मूर्ध्नो वा नाडीमार्गं समाश्रितः।
विद्याकर्मसमायुक्तो वासनाभिश्च संयुतः॥९॥

प्रज्ञात्मानं समाश्रित्य विज्ञानात्मोपसर्पति ॥१०॥

विद्याकर्मभ्यां समायुक्तः, वासनाभिश्च पूर्वप्रज्ञानुसारिणीभिस्संयुतः। तथा च श्रुतिः "तं विद्याकर्मणी समन्वारभेते पूर्वप्रज्ञा च" (बृ.उ. ४-४-२) इति। प्रज्ञात्मानमिति । प्रज्ञात्मानम् - ईश्वरात्मानं, समाश्रित्य तत्प्रेरितस्सन्नित्यर्थः। उपसर्पति - औपाधिकगमनभाग्भवति । तथा च श्रुतिः - "प्राज्ञेनात्मनान्वारूढ उत्सर्जन् याति" (बृ.उ. ४-३-३५) इति। उत्सर्जन् - हिक्कादिशब्दं कुर्वन् इति भाष्यकारः। अन्यथा पौनरुक्त्यं स्यादिति तदाशयः॥९-१०॥

यथा कुम्भो नीयमानो देशाद्देशान्तरं प्रति ।
खपूर्ण एव सर्वत्र स आकाशोऽपि तत्र तु ।
घटाकाशाख्यतां याति तद्वल्लिङ्गं परात्मनः॥ ११॥

पुनर्देहान्तरं याति यथाकर्मानुसारतः।
आमोक्षात् सञ्चरत्येवं मत्स्यः कूलद्वयं यथा ॥१२॥

यथेति । देशाद्देशान्तरं नीयमानः कुम्भो यथा सर्वत्र खपूर्ण एव, सः पूर्वघटावच्छिन्न आकाशः तत्र तस्मिन् घटानयने सति घटाकाशाख्यतां यथा याति तद्वत्परात्मनो लिङ्गं पुनर्देहान्तरं याति । तत्रापि चित्सम्बन्धमेव जानन्नास्ते इति भावः। यथा मत्स्यः कूलद्वयं सञ्चरति, एवं, यथाकर्म - कर्माण्यनतिक्रम्य, अनुसारतः - उपाध्यनुसारेण आमोक्षात् सञ्चरति ॥११-१२॥

पापभोगाय चेद्गच्छेद्यम दूतैरधिष्ठितः।
यातनादेहमाश्रित्य नरकानेव केवलम् ॥१३॥

पापभोगायेति । केवलं पापभोगाय गच्छेच्चेत्तर्हि नरकानेवेत्यन्वयः। उभयभोगाय तु मनुष्यलोकं गच्छतीति भावः। तथा च श्रुतिः - "उभाभ्यां मनुष्यलोकः" इति॥ १३॥

इष्टापूर्तानि कर्माणि योऽनुतिष्ठति सर्वदा ।
पितृलोकं व्रजत्येष याममाश्रित्य[१२२] बर्हिषः ॥ १४॥

इष्टेति । यामं - यमसम्बन्धिनं दूतम् , आश्रित्य - तेन नीयमानस्सन् इत्यर्थः। बर्हिषः - श्रौतस्मार्ताच्चाग्नेः। यागस्याग्निसाध्यत्वात् सोऽपि तत्र परम्परया प्रयोजक इति भावः। "वर्हिश्शुष्मा कृष्णवर्त्मे"त्यमरः। अत्र बर्हिरिति पृथक्पदम् । "बर्हिर्मुखा" इति दर्शनादिति क्षीरस्वामी। "कर्मणा पितृलोक" इति श्रुतिश्चेहानुसन्धेया॥ १४॥

धूमं रात्रिं ततः कृष्णपक्षं तस्माच्च दक्षिणम् ।
अयनं च तथा लोकं पितृणां च ततः परम् ॥ १५॥

"अथ य इमे ग्राम इष्टापूर्ते दत्तमित्युपासते ते धूममभिसम्भवन्ति" (छा.उ. ५-१०-२) इत्युपक्रम्य "आकाशाच्चन्द्रमस" इत्यन्तेन धूमादिः पितृयाणः पन्थाः श्रुतावुक्तः इष्टादिकारिणाम् । तदेतदाह - धूममिति । धूमो रात्रिः कृष्णपक्षः दक्षिणायनं चेत्याद्या आतिवाहिका निर्दिश्यन्ते "आतिवाहिकास्तल्लिङ्गात्" (ब्र.सू. ४-३-४) इति न्यायात् । यद्यपि "यत्र

---

१२२ "धूममाश्रित्य वर्हिषः" इति पाठे आग्नेरनन्तरं धूममाश्रित्येत्यर्थः। "यानमाश्रित्य वर्हिषः" इति पाठे वर्हिषः यानं - अग्निना प्रेषितं यानं विमानम्, आश्रित्य आरुह्येत्यर्थः।

काले त्वनावृत्तिमावृत्तिं चैव योगिनः। प्रयाता यान्ति तं कालं वक्ष्यामि भरतर्षभ॥" (भ.गी. ८-२३) इति कालप्राधान्येनैव उपक्रम्य अहरादयो रात्र्यादयश्च स्मृतौ निर्दिष्टास्तथापि तत्राप्यभिमानिदेवतानामेव विवक्षितत्वान्न विरोध इति भाष्यकारः॥ १५॥

चन्द्रलोके दिव्यदेहं प्राप्य भुङ्क्ते परां श्रियम् ।
तत्र चन्द्रसमानोऽसौ यावत्कर्मफलं वसेत् ॥ १६॥

तथैव कर्मशेषेण यथेतं पुनराव्रजेत् ।
वपुर्विहाय जीवत्वमासाद्याकाशमेति सः ॥ १७॥

तथैवेति । कर्मणश्शेषो नाम तमनुवर्तिघृतशेषसदृश इति केचित् । भाष्यकारास्तु भिन्नमेवैहिकं फलं कर्मशेषशब्दार्थ इत्याहुः। यथेतमिति - यथागतमित्यर्थः। उपलक्षणं चेदं, तद्विपर्ययेण चेति बोध्यम् । धूमाकाशयोरवरोहेऽपि सङ्कीर्तनाद्यथा गतत्वम् तद्वद्विपर्ययोऽपि बोध्यः। तथा च सूत्रं - "कृतात्ययेऽनुशयवान् दृष्टस्मृतिभ्यां यथेतमनेवं च" (ब्र.सू. ३-१-८) इति । जीवत्वमासाद्येति । चन्द्रलोके भोगशरीरं विहाय जीवत्वं लिङ्गशरीरावच्छिन्नत्वं प्राप्य अवरोहति । अवरोहक्रममाह - आकाशमेति सः इति ॥ १६-१७॥

आकाशाद्वायुमागत्य वायोरम्भो व्रजत्यथ।
अद्भ्यो मेघं समासाद्य ततो वृष्टिर्भवेदसौ ॥ १८॥

आकाशमाकाशत्वम्, वायुर्वायुत्वम्, एवमग्रेऽपि भावप्रधानता बोध्या ।

तथा च वाक्यशेषः "ततो वृष्टिर्भवेदसा"विति । अत्र चाकाशादिसाम्यं भवतीत्यभिप्रेतम् , न तु तदभेदः। इदञ्चोत्तरमीमांसायां "साभाव्यापत्तिरुपपत्तेः" (ब्र.सू. ३-१-२२) इत्यधिकरणे निर्णीतम् । अत्र वायोरनन्तरं धूमाद्युत्पत्तिरूह्या, वियदाद्यधिकरणन्यायात् । तथा च श्रुतिः "अथैतमेवाध्वानं पुनर्निवर्तन्ते यथेतमाकाशमाकाशाद्वायुं वायुर्भूत्वा धूमो भवति धूमो भूत्वाऽभ्रं भवत्यभ्रं भूत्वा मेघो भवति मेघो भूत्वा प्रवर्षति" (छा.उ. ५-१०-५) इति ॥ १८॥

ततो धान्यानि भक्ष्याणि जायते कर्मचोदितः।
योनिमन्ये प्रपद्यन्ते शरीरत्वाय देहिनः।
मुक्तिमन्ये तु संयान्ति यथाकर्म यथाश्रुतम् ॥ १९॥

जायत इति प्रकृतिप्राधान्येन निर्देशः, "सुधीः भवन्ति ब्राह्मणा" इतिवत् । इयं च धूमादिमार्गेण गतानां पुनरावृत्तिर्न नियता, किन्तु काचित्कीत्याह - योनिमिति । मुक्तिमिति। "तदुपर्यपी"ति[१२३] न्यायेन चन्द्रलोकादौ श्रवणादिसम्भवादिति शेषः ॥ १९॥

ततोऽन्नत्वं समासाद्य पितृभ्यां भुज्यते परम् ।
ततश्शुक्लं रजश्चैव भूत्वा गर्भोऽभिजायते ॥ २०॥

ततः परमन्नत्वं समासाद्य स्थितस्सन् पितृभ्यां भुज्यते॥ २०॥

ततः कर्मानुसारेण भवेत् स्त्रीपुन्नपुंसकम् ।

---

१२३ "तदुपर्यपि वादरायणः सम्भवात्" (ब्र.सू. १-३-२६)

एवं जीवगतिः प्रोक्ता मुक्तिं तस्य वदामि ते ॥२१॥

यस्तु शान्त्यादियुक्तस्सन् सदा विद्यारतो भवेत् ।
स याति देवयानेन ब्रह्मलोकावधिं नरः॥२२॥

अर्चिर्भूत्वा दिनं प्राप्य शुक्लपक्षमथो व्रजेत् ।
उत्तरायणमासाद्य संवत्सरमथो व्रजेत् ॥२३॥

मुक्तिमिति - क्रममुक्तिमित्यर्थः। देवयानेनेति । तथा च श्रुतिः "तेऽर्चिषमेवाभिसम्भवन्त्यर्चिषोऽहरह्न आपूर्यमाणपक्षमापूर्यमाणपक्षाद्यान् षडुदङ्ङेति मासांस्तान् मासेभ्यः संवत्सरं संवत्सरादादित्यमादित्यात् चन्द्रमसं चन्द्रमसो विद्युतं तत्पुरुषोऽमानवः स एनान् ब्रह्म गमयति एतेन प्रतिपद्यमाना इमं मानवमावर्तं नावर्तन्ते" (छा.उ. ४-१५-५) इति ॥२२-२३॥

आदित्यचन्द्रलोकौ तु विद्युल्लोकमतः परम् ।
अथ दिव्यः पुमान् कश्चिद्ब्रह्मलोकादिहैति सः॥२४॥

दिव्ये वपुषि सन्धाय जीवमेनं नयत्यसौ ।
ब्रह्मलोके दिव्यदेहो भुक्त्वा भोगान् यथेप्सितान् ॥२५॥

तत्रोषित्वा चिरं कालं ब्रह्मणा सह मुच्यते ॥२६॥

शुद्धब्रह्मरतो यस्तु न स यात्येव कुत्रचित् ।

तस्य प्राणा विलीयन्ते जले सैन्धवखिल्यवत् ॥२७॥

स्वप्नदृष्टा यथा सृष्टिः प्रबुद्धस्य विलीयते ।
ब्रह्मज्ञानवतस्तद्वद्विलीयन्ते तदैव ते॥२८॥

अथेति । दिव्यः पुमान् कश्चित् - श्रुत्युक्तो मानवः पुरुषः, इहैति - विद्युल्लोके एतीति सम्बन्धः। अत्र च संवत्सरादित्ययोर्मध्ये देवलोकवायुलोकौ, विद्युदनन्तरं च वरुणेन्द्रप्रजापतिलोकाः श्रुत्यन्तरोक्ता उपसंहर्तव्याः। "वायुमब्दादविशेषविशेषाभ्याम्" (ब्र.सू. ४-३-२), "तडितोऽधिवरुणः सम्बन्धात्" (ब्र.सू. ४-३-३) इत्यधिकरणाभ्याम् , 'आगन्तुकानामन्ते निवेश' इति पूर्वमीमांसान्यायेन च सिद्धान्तयितव्यम्। "आतिवाहिकास्तल्लिङ्गात्" (ब्र.सू. ४-३-४) इति न्यायेन चातिवाहिकपुरुषपरता निर्णेया । एवं चार्चिरादिमार्गेण ब्रह्मलोकं प्राप्तस्योपासकस्य "तदुपर्यपि बादरायणस्सम्भवात्" (ब्र.सू. १-३-२६) इति न्यायेन तत्रैव ज्ञानोदये ब्रह्मणा सह मुक्तिः, न तु पुनरावृत्तिः "एतेन प्रतिपाद्यमाना इमं मानवमावर्तं नावर्तन्त" (छा.उ. ४-१५-५) इति श्रुतेः इति फलितोऽर्थः ॥२४-२८॥

"पापभोगाय चेद्गच्छेद्यमदूतैरधिष्ठितः" (११-१३) इत्यादिपूर्वोक्तरीत्या नरकं गतस्य पश्चाद्भाविनीमवस्थामाह - भुक्त्वा चेति ।

विद्याकर्मविहीनो यस्तृतीयं स्थानमेति सः।
भुक्त्वा च नरकान् घोरान् महारौरवरौरवान् ॥२९॥

पश्चात्प्राक्तनशेषेण क्षुद्रजन्तुर्भवेदसौ ।
यूकामशकदंशादि जन्मासौ लभते भुवि ।
एवं जीवगतिः प्रोक्ता किमन्यच्छ्रोतुमिच्छसि ॥३०॥

श्रीराम उवाच -

भगवन्! यत्त्वया प्रोक्तं फलं तु ज्ञानकर्मणोः।
ब्रह्मलोके चन्द्रलोके भुङ्क्ते भोगानिति प्रभो ॥३१॥

गन्धर्वादिषु लोकेषु कथं भोगस्समीरितः।
देवत्वं प्राप्नुयात् कश्चित् कश्चिदिन्द्रत्वमेव च ॥३२॥

एतत्कर्मफलं वाऽस्तु विद्याफलमथापि वा ।
तद्ब्रूहि गिरिजाकान्त ! तत्र मे संशयो महान् ॥३३॥

भगवन्निति । उपासनायाः इष्टापूर्तादिकर्मणश्च फलं यथाक्रमं ब्रह्मलोकचन्द्रलोकप्राप्तिरूपमुक्तम् । गन्धर्वसूर्येन्द्रादिलोकप्राप्तिस्तु किमुपासनाफलं विद्याफलं वा? एतदिति - अत्रापि विद्याशब्दः उपासनापरः॥३१-३३॥

श्रीभगवानुवाच -

तद्विद्याकर्मणोरेवानुसारेण फलं भवेत् ॥३४॥

तथा च तत् - गन्धर्वलोकादिकं, विद्याकर्मणोरेव फलं भवेदिति सम्बन्धः। ननु विद्यानामुपासनापरपर्यायाणां कालादितारतम्येनोत्कर्षसम्भवात्

कर्मणामपि तथात्वात्पूर्वं च विद्याकर्मणोः फलोत्तरोपन्यासात् कथं व्यवस्थेत्याकाङ्क्षायामाह - अनुसारेति । "फलस्य कर्मण्यन्ते" इति जैमिनिसूत्रोक्तन्यायश्चेहानुसन्धेयः। भट्टाश्चाहुः "कर्मणामल्पमहतां फलानां च स्वगोचरः। विभागस्थः समाख्यानादविभागोऽपि चोदित" इति ॥३४॥

तत्र विद्याकर्मणोः अल्पत्वमहत्त्वे तत्तत्स्वरूपपर्यालोचनया निर्णेतुं शक्येते। फलानां तत्प्रकर्षापकर्षौ निरूपयितुं श्रुतिसिद्धं मानुषाद्यानन्दानां तारतम्यमाह - युवा चेत्यादिना ।

युवा च सुन्दरश्शूरो नीरोगो बलवान् भवेत् ।
सप्तद्वीपां वसुमतीं भुङ्क्ते निष्कण्टकं यदि ॥३५॥

स प्रोक्तो मानुषानन्दः तस्माच्छतगुणो मतः।
मनुष्यस्तपसा यस्तु गन्धर्वो जायते स तु ॥३६॥

तस्माच्छतगुणो देवगन्धर्वाणां न संशयः।
एवं शतगुणानन्द उत्तरोत्तरतो भवेत् ॥३७॥

यौवनादिसम्पन्नस्य सतः सार्वभौमस्य यः आनन्दः स मानुषानन्दो वोध्यः। यस्तु मनुष्यस्तपसा गन्धर्वो जायते तस्य त्वानन्दः प्रागुक्तान्मानुषानन्दाच्छतगुणो मत इत्यन्वयः। देवगन्धर्वाणां हाहाहूहूप्रभृतीनां तस्मादपि शतगुणः। एवमिति । वक्ष्यमाणपित्रादीनामपि आनन्दक्रमेणोत्तरोत्तरं शतगुणो बोद्धव्य इत्यर्थः।

षष्ठ्यर्थे तसिप्रत्ययः ॥ ३५-३७॥

पितॄणां चिरलोकानामाजानसुरसम्पदः।
देवतानामथेन्द्रस्य गुरोस्तद्वत्प्रजापतेः॥ ३८॥

चिरलोकलोकानां पितॄणाम् - अर्यमाप्रभृतीनां साधारणपितॄणामित्यर्थः ॥३८॥

ब्रह्मणश्चैवमानन्दः पुरस्तादुत्तरोत्तरम् ।
ज्ञानाधिक्यात् सुखाधिक्यं नान्यदस्ति सुरालये ॥३९॥

ब्रह्मणश्चेति । पुरस्तात् - पूर्वस्मादित्यर्थः। "दिक्छब्देभ्यस्सप्तमी पञ्चमी"त्यनेन (पा.सू. ५-३-२७) पञ्चम्यन्तादस्तातिप्रत्यये, "अस्ताति चे"ति (पा.सू. ५-३-४०) सूत्रेण पुरादेशः। ज्ञानाधिक्यादिति । सुरालये - स्वर्गे, यत्सुखाधिक्यं तत् ज्ञानाधिक्यात् उपासनातारतम्यप्रयुक्तमित्यर्थः। कर्मतारतम्यप्रयुक्तमित्यपि बोध्यम् ॥३९॥

श्रुतौ सार्वभौमाद्यानन्दविशेषमुपन्यस्य तत्र तत्र "श्रोत्रियस्य चाकामहतस्य" (तै.उ. २-८-२) इत्याम्नातम् । तदत्र सङ्गृह्णाति - श्रोत्रिय इति ।

श्रोत्रियोऽवृजिनोऽकामहतो यश्च द्विजो भवेत् ।
तस्याप्येवं समाख्याता आनन्दाश्चोत्तरोत्तरम् ।
आत्मज्ञानात् परं नास्ति तस्माद्दशरथात्मज ॥४०॥

छन्दोऽधीते इति श्रोत्रियः, वेदपारग इत्यर्थः। "श्रोत्रियंश्छन्दोऽधीते" (पा.सू. ५-२-८४) इति निपातनात् साधुः। अवृजिनः - निष्पापः, कामैः हतः उपहतो नेत्यकामहतः। एवं भूतो यो द्विजः तस्य पूर्वोक्ताः सार्वभौमादिहिरण्यगर्भान्ताः सर्वेऽप्यानन्दाः पूर्णानन्दरूपब्रह्म प्राप्त्यप्राप्तिभिर्भवन्ति । तेषां तदन्तरादिति भावः ॥४०॥

ब्राह्मणः कर्मभिर्नैव वर्धते नैव हीयते ॥४१॥

ब्राह्मणः - ब्रह्म वेत्तीति व्युत्पत्त्या तत्त्वज्ञानी, कर्मभिः न वर्धते । तथा ब्रह्महत्यादिभिर्निषिद्धैरपि प्रारब्धवशादनुष्ठितैरपि न हीयते । आवरणवन्तं प्रत्येव विधिनिषेधप्रवृत्तिरिति भावः ॥४१॥

न लभ्यः पातकेनैव[१२४] कर्मणा ज्ञानवान् यदि ।
तस्मात् सर्वाधिको विप्रो ज्ञानवानेव जायते ॥४२॥

न लभ्य इति। यदि ज्ञानवांस्तर्हि पातकेन नैव लभ्यः, पुण्यशालिभिरेवासौ दृश्यत इत्यर्थः ॥४२॥

ज्ञात्वा यः कुरुते कर्म तस्याक्षय्यफलं भवेत् ॥४३॥

यत्फलं लभते मर्त्यः कोटिब्राह्मणभोजनैः ।
तत्फलं समवाप्नोति ज्ञानिनं यस्तु भोजयेत् ॥४४॥

ज्ञात्वेति । यः पुनः "तमेतं वेदानुवचनेन ब्राह्मणा विविदिषन्ति" (बृ.उ.

---

१२४ "न लिप्यते पातकेन" इति पाठान्तरम् ।

४-४-२२) इत्यादिवाक्यैः कर्मणां तत्त्वज्ञानोपायतां निश्चित्य ज्ञानकामनया कर्म कुरुते तस्य कर्म अक्षयं फलं भवेत् - परममोक्षपर्यवसायि स्यादित्यर्थः ॥४३-४४॥

ज्ञानवन्तं द्विजं यस्तु द्विष्यते च नराधमः।
स शुष्यमाणो म्रियते यस्मादीश्वर एव सः ॥४५॥

यः ज्ञानिनं, द्विष्यते - द्वेष्टि, सः शुष्यमाणः क्षयरोगी सन् म्रियते । यस्मात् सः - ज्ञानी, ईश्वर एव तस्मात् । तदेवमुत्पन्नतत्त्वज्ञानः कृतकृत्य एवेति स्थितम् । कर्मानुष्ठाताऽपि द्विविधः, भोगकामो विरक्तश्च । तत्राद्यस्य पुनरावृत्तिरुक्ता । द्वितीयस्यापि ज्ञानकामनया कर्मानुष्ठाने परम्परया मोक्षसम्भवात् तेन रूपेण तिष्ठन् निष्कामतया कर्माण्यनुतिष्ठेदिति सूचितम् ॥४५॥

उपासकस्तु ततोऽप्यभ्यर्हिततर इत्याह - उपासक इति।

उपासको न यात्येव यस्मात्पुनरधोगतिम् ।
उपासनरतो भूत्वा तस्मादास्व सुखी नृप[125] ॥४६॥

॥ इति श्रीमत्पद्मपुराणे शिवगीतासूपनिषत्सु जीवगतिनिरूपणं नाम एकादशोऽध्यायः॥

---

१२५ "तस्माद्वा स्वसुखी नृप" इति पाठान्तरम् ।

उपासकः अर्चिरादिमार्गेणोर्ध्वगतिमेव गच्छति, अधोगतिं तु पुनर्न गच्छति यस्मात्तस्मादुपासनायां रतो भूत्वा आस्व ॥४३॥

॥ इति श्रीमद्विशुद्धाद्वैतसिद्धान्तप्रतिष्ठापनैकधुरन्धर श्रीमच्छङ्करानन्दभारतीविरचिते शिवगीताभाष्ये एकादशोऽध्यायः ॥

द्वादशोऽध्यायः

श्रीराम उवाच -

भगवन्! देवदेवेश ! नमस्तेऽस्तु महेश्वर।
उपासनविधिं ब्रूहि देशकालं च तस्य तु ।
अङ्गानि नियमांश्चैव मयि तेऽनुग्रहो यदि ॥ १ ॥

तस्य - उपासनस्य, देशश्च कालश्च तयोः समाहारः देशकालम् , तदपि ब्रूहि ॥ १ ॥

श्रीभगवानुवाच -

श्रृणु राम ! प्रवक्ष्यामि देशकालमुपासनम् [१२६] ।
सर्वाकारोऽहमेवैकः सच्चिदानन्दविग्रहः॥ २॥

मदंशेन परिच्छिन्ना देहास्सर्वे दिवौकसाम् ॥ ३ ॥

मदंशेनेति । मदंशेन - अहङ्कारेण, परिच्छिन्नाः देहाः पृथग्भूताः। वस्तुतस्तु मत्स्वरूपात्मका एव, ममैव सर्वाधिष्ठानत्वात् । यद्वा सर्वदिवौकसां परिच्छिन्नाः देहाः, मदंशेन - ममैवांशभूतेन, प्रतिबिम्बचैतन्येनोपलक्षिताः॥ २-३ ॥

ततः किम् ? तत्राह - ये त्विति ।

---

१२६ "देशं कालमुपासने" इति पाठान्तरम् ।

ये त्वन्यदेवताभक्ता यजन्ते श्रद्धयाऽन्विताः।
तेऽपि मामेव राजेन्द्र ! यजन्त्यविधिपूर्वकम् ॥४॥

ये भक्ता अन्यदेवता यजन्ते तेऽपि मामेव यजन्ति, किन्तु अविधिपूर्वकम्, अत एव फलाल्पतेति भावः। इदमेवाभिप्रेत्योक्तं प्रथमाध्याये "तं त्यक्त्वा तादृशं देवं यस्सेवेतान्यदेवताम् । स हि भागीरथीं त्यक्त्वा काङ्क्षते मृगतृष्णिकाम्" (१-३०) इति॥४॥

यस्मात्सर्वमिदं विश्वं मत्तो न व्यतिरिच्यते।
सर्वक्रियाणां भोक्ताऽहं सर्वस्याहं फलप्रदः॥५॥

येनाकारेण ये मर्त्या मामेवैकमुपासते।
तेनाकारेण तेभ्योऽहं प्रसन्नो वाञ्छितं ददे॥६॥

एकं मामेव, येनाकारेण - चतुर्भुजशङ्खचक्रादिविशिष्टेन वा त्रिलोचनत्रिशूलादिविशिष्टेन वा, ये उपासते तेभ्यस्तेनैवाकारेण प्रसन्नस्सन् तेषां वाञ्छितम्, अहं ददे - प्रयच्छामीत्यर्थः॥५-६॥

विधिनाऽविधिना वाऽपि भक्त्या ये मामुपासते ।
तेभ्यः फलं प्रयच्छामि प्रसन्नोऽहं न संशयः॥७॥

अपि चेत् सुदुराचारो भजते मामनन्यभाक् ।
साधुरेव स मन्तव्यः सम्यग्व्यवसितो हि सः॥८॥

तदेवं यथाकथञ्चिदुपासना कर्तव्येत्युक्तम् । अभेदेन निदिध्यासनं गुणवत्तरमित्याह - स्वजीवत्वेनेति ।

स्वजीवत्वेन यो वेत्ति मामेवैकमनन्यधीः।
तं न स्पृशन्ति पापानि ब्रह्महत्यादिकान्यपि ॥९॥

स्वजीवत्वेनेति । शोधितत्वंपदार्थाभेदेन शोधिततत्पदार्थं यो ध्यायति तं ब्रह्महत्यादिकान्यपि पापानि न स्पृशन्ति । अभेदेनैव साक्षात्कारे ततश्चाविद्यानिवृत्तौ कृतकृत्यतैव । साक्षात्कारोत्पत्तेः प्रागपि उपासनामाहात्म्यान्महान्त्यपि पापानि क्षीयन्त इत्यर्थः ॥९॥

उपासाविधयस्तत्र चत्वारः परिकीर्तिताः।
सम्पदारोपसंवर्गाध्यासा इति मनीषिभिः॥१०॥

तत्र - तस्मिन्निर्गुणसाक्षात्कारे, तदर्थमिति यावत् । "चर्मणि द्वीपिनं हन्ती"त्यादाविव "निमित्तात्कर्मयोगे" इति क्षीरस्वामी। उपासाविधयः - सगुणोपासनाविधयः, कीर्तिताः। ते च चत्वारः। सगुणोपासनाश्चतुर्विधा इति फलितोऽर्थः॥१०॥

अल्पस्य चाधिकत्वेन गुणयोगाद्विचिन्तनम् ।
अनन्तं वै मन इति सम्पद्विधिरुदीरितः [१२७] ॥११॥

अल्पस्य चेति । अल्पस्य - परिच्छिन्नस्य मनसः,

१२७ "अनन्तं वै मनोऽनन्ता विश्वेदेवा अनन्तमेव स तेन लोकं जयति" (वृ.उ. ३-१-९) इति श्रुतिः।

अनन्तवृत्तिरूपगुणयोगादनन्तत्वेन सादृश्येन "अनन्ता विश्वेदेवा"(बृ.उ. ३-१-९) इति चिन्तनं यस्य असौ सम्पच्छब्दवाच्यो विधिर्विषय इत्यर्थः। तथा च प्रतीकोपासना द्विविधा सम्पदध्यासश्चेति । तत्रारोप्यप्रधाना सम्पत् । यत्र अधिष्ठानविशेषरूपकत्वम् अविद्यमानसमं कृत्वा आरोपितविशेषरूपस्यैव ध्यानमिति यावत् । अधिष्ठाने अध्यासः, अधिष्ठानं विशेषरूपेणोद्दिश्य आरोपितस्यापि ध्यानमिति यावत्॥ ११ ॥

विधावारोप्य योपासा साऽऽरोपः परिकीर्तितः।
यद्वदोङ्कारमुद्गीथ मुपासीतेत्युदाहृतः॥ १२॥

विधाविति । विधीयते प्रधानविधिनेति विधिः, अङ्गमिति यावत् । तस्मिन् अन्यदारोप्य या उपासना सा आरोपः। अङ्गावबद्धाध्यास इति यावत् । उद्गीथसाम्नः प्रथमभक्तिः "ओमित्येतदक्षरमुद्गीथमुपासीत" (छा.उ. १-१-१) इति ॥ १२॥

आरोपो बुद्धिपूर्वेण य उपासाविधिश्च सः।
योषित्यग्निमतिर्यद्वदध्यासस्स उदाहृतः॥ १३॥

आरोप इति । बुद्धिपूर्वेण - बुद्धिपूर्वकं ज्ञात्वेति यावत् । य आरोपः सोऽसावुपासाविधिः अध्यास इति समुदाहृतः। यद्वत् - यथा, योषिति अग्निमतिः, "योषा वाव गौतमाग्निः" (छा.उ. ५-८-१) इत्यादिश्रुत्युक्तोऽर्थः। यद्यपि प्रागुक्ताङ्गावबद्धोपासनाऽप्यध्यास एवान्तर्भवति, तथापीह पृथक्कथनं न विरुध्यते । परिभाषाया अपर्यनुयोज्यत्वादिति दिक्॥ १३॥

क्रियायोगेन चोपासाविधिस्संवर्ग उच्यते ।
संवर्तवायुः प्रलये भूतान्येकोऽवसीदति॥ १४॥

क्रियायोगेनेति । संवृङ्क्ते - भूतानि स्वायत्तानि करोतीति 'संवर्गः' इति व्युत्पत्त्या वशीकरणरूपक्रियायोगेनोपासनं संवर्गोपासनेत्यर्थः। तत्र दृष्टान्तः, प्रलये संवर्तनामा वायुः यथा भूतानि, अवसीदति अवसादयति, स्वस्मिन् लीनानि करोतीत्यर्थः, तद्वदयं संवर्ग इति भावः ॥ १४॥

उपसङ्क्रम्य बुद्ध्या यदासनं देवतात्मना ।
तदुपासनमन्तस्स्यात् तद्बहिस्सम्पदादयः ॥ १५॥

उपसङ्क्रम्येति । बुद्ध्या - श्रवणमननाभ्यां निवृत्तसम्भावनया चित्तवृत्त्या, देवतात्मना उपसङ्क्रम्य - 'ब्रह्मैवाह'मिति विषयीकृत्य, यदासनं निदिध्यासनमिति यावत् । तत् अन्तः - अन्तरङ्गभूतमुपासनं बोद्धव्यम् । सम्पदादयस्तु ततो बहिः - बहिरङ्गभूताः ॥ १५॥

ज्ञानान्तरानन्तरित सजातिज्ञानसन्ततेः।
सम्पन्नदेवतात्मत्व मुपासनमुदीरितम् ॥ १६ ॥

ज्ञानान्तरेति । ज्ञानान्तरेण विजातीयप्रत्ययेन अनन्तरितानि अव्यवहितानि यानि सजातीयज्ञानानि तेषां सन्ततेः, निदिध्यासनस्येति यावत् । उपासनम् - उपासनत्वम् । सम्पन्नस्वभेदसाक्षात्कृतदेवतात्मा येन तथात्वमुदीरितं साक्षात्कारावधिकं निदिध्यासनम् । दृष्टार्थत्वात् तण्डुलपर्यवसाय्यवघातवत्फलितोऽर्थः। "आवृत्तिरसकृदुपदेशात्" (ब्र.सू.

४-१-१) इत्यधिकरणे स्पष्टमेतत् ॥ १६ ॥

सम्पदादिषु बाह्येषु दृढबुद्धिरुपासना ।
उपासनमिति प्रोक्तं तदङ्गानि ब्रुवे शृणु ॥ १७॥

सम्पदादिष्विति । तत्र बुद्धिदार्ढ्यमेव अवधिरित्यर्थः। तदेवं सगुणनिर्गुणोभयरूपोपासनाः प्रागुक्ताः उपसंहरति - "उपासनमिति प्रोक्त"मिति प्रागुक्तरीत्या॥ १७॥

तीर्थक्षेत्रादिगमनश्रद्धां तत्र परित्यजेत् ।
स्वचित्तैकाग्रता यत्र तत्रासीत सुखं द्विजः॥ १८॥

तीर्थक्षेत्रादिगमनमिति । स्वचित्तस्य यत्रैव एकाग्रता तत्रासीत। "यत्रैकाग्रता तत्राविशेषात्" (ब्र.सू. ४-१-११), "आसीनस्सम्भवात्" (ब्र.सू. ४-१-७) इत्यधिकरणेषु स्पष्टमेतत् ॥ १८॥

कम्बले मृदुतल्पे वा व्याघ्रचर्मणि वा स्थितः।
विविक्तदेशे नियतः समग्रीवशिरस्तनुः ॥ १९॥

अत्याश्रमस्थस्सकलानीन्द्रियाणि निरुध्य च ।
भक्त्याऽथ स्वगुरुं नत्वा योगं विद्वान् प्रयोजयेत् ॥ २०॥

अत्याश्रमस्थ इति । विध्युक्तभस्मधारणमत्याश्रमः, तेन सहितस्सन् तिष्ठतीत्यत्याश्रमस्थः। तथा च स्कान्दे ब्रह्मगीतायां "अत्याश्रमिभ्यः

परमं पवित्र"मिति श्रुतिव्याख्यावसरे उक्तं "अग्निरित्यादिभिर्मन्त्रैः भस्मनोद्धूलनं तथा। त्रिपुण्ड्रधारणं चापि वदन्त्यत्याश्रमं बुधाः ॥" इति। विद्वान् - पातञ्जलशास्त्रोक्तयोगाभ्यासप्रकाराभिज्ञस्सन् , योगं - चित्तवृत्तिनिरोधम् । तथा च पातञ्जलसूत्रं "योगश्चित्तवृत्तिनिरोधः" (यो.सू. १-१-२) इति ॥१९-२०॥

यस्त्वविज्ञानवान् भवत्यव्यक्तमनसा सदा ।
तस्येन्द्रियाण्यवश्यानि दुष्टाश्वा इव सारथेः ॥ २१ ॥

विज्ञानी यस्तु भवति युक्तेन मनसा सह ।
तस्येन्द्रियाणि वश्यानि सदश्वा इव सारथेः ॥ २२ ॥

यस्त्विति । अविज्ञानवान् योगाभ्यासानभिज्ञः, विवेकशून्यो वा । अत एव अव्यक्तेन तत्त्वग्रहासमर्थेन मनसोपलक्षितः। विज्ञानीति । विज्ञानिनस्तु पुरुषस्य यत्नेन वक्ष्यमाणं यद्भवति तदेवाह - मनसा सह इन्द्रियाणि वश्यानीति ॥२१-२२॥

यस्त्वविज्ञानवान् भवत्यमनस्कः सदाऽशुचिः।
न स तत्पदमाप्नोति संसारमपि गच्छति ॥२३॥

विज्ञानी यस्तु भवति समनस्कः सदा शुचिः।
स तु तत्पदमाप्नोति यस्माद्भूयो न जायते ॥२४॥
विज्ञानसारथिर्यस्तु मनःप्रग्रह एव च ।

सोऽध्वनः पारमाप्नोति ममैव परमं पदम् ॥२५॥

यस्त्विति । सदा शुचिः - बाह्याभ्यन्तरशौचवान् सन्, विज्ञानसहितो नरः तत्पदमाप्नोति । विज्ञानसारथिरिति । अध्वनः - संसारस्य, पारभूतं, ममैव पदं - स्वरूपम्, आप्नोति ॥२३-२५॥

हृत्पुण्डरीकं विरजं विशुद्धं विशदं तथा ।
विशोकं च विचिन्त्यात्र ध्यायेन्मां परमेश्वरम् ॥२६॥

हृत्पुण्डरीकमिति । विरजम् - रजोगुणरहितम्, अत एव विशुद्धं हृदयाम्भोजं विचिन्त्य । अत्र - अस्मिन् हृत्पुण्डरीके, विशदं विशोध्यं च परमेश्वरं मां ध्यायेत् ॥२६॥

अचिन्त्यरूपमव्यक्तमनन्तममृतं शिवम् ।
आदिमध्यान्तरहितं प्रशान्तं ब्रह्म कारणम् ॥२७॥

एकं विभुं चिदानन्दमरूपमजमद्भुतम् ।
शुद्धस्फटिकसङ्काशमुमादेहार्धं धारिणम् ॥२८॥

व्याघ्रचर्माम्बरधरं नीलकण्ठं त्रिलोचनम् ।
जटाधरं चन्द्रमौलिं नागयज्ञोपवीतिनम् ॥२९॥

व्याघ्रचर्मोत्तरीयं च वरेण्यमभयप्रदम् ।
पराभ्यामूर्ध्वहस्ताभ्यां बिभ्राणं परशुं मृगम् ॥३०॥

कोटिमध्याह्नसूर्याभं चन्द्रकोटिसुशीतलम् ।
चन्द्रसूर्याग्निनयनं स्मेरवक्त्रसरोरुहम् ॥ ३१ ॥

भूतिभूषितसर्वाङ्गं सर्वाभरणभूषितम् ।
एवमात्मारणिं कृत्वा प्रणवं चोत्तरारणिम् ।
ज्ञाननिर्मथनाभ्यासात् साक्षात्पश्यति मां जनः ॥ ३२ ॥

एवमिति ॥ एवम्भूतस्य आत्मनः साक्षात्कारे श्रुत्युक्तमुपायमाह – एवमिति । आत्मैवारणिः, तं कृत्वा, तथा प्रणवं उत्तरारणिं कृत्वा इति । अयं भावः । यथा अधरोत्तराभ्यां निर्मथनेन दारुमध्ये निलीनमग्निं पश्यति, एवं प्रणवेनात्मज्ञानेन निर्मथनं, तस्याभ्यासात् मां साक्षात्पश्यतीति ॥ २७-३२ ॥

वेदवाक्यैरलभ्योऽहं न शास्त्रैर्नापि चेतसा ।
ध्यानेन वृणुते यो मां सर्वदाऽहं वृणोमि तम् ॥ ३३ ॥

नाविरतो दुश्चरितान्नाशान्तो नासमाहितः ।
नाशान्तमानसो वाऽपि प्रज्ञानेन लभेत माम् ॥ ३४ ॥

नाविरत इति । दुश्चरितात् पापाचरणात्, अविरतः - अनुपरतः मां न लभेत । नाप्यशान्तः वितृष्णः, तथा असमाहितः - चित्तैकाग्र्यरहितोऽपि, मां न लभेत । तथा अशान्तं विषयोभ्यो अव्यावृत्तं मानसं यस्य सोऽपि न लभेत ॥३३-३४॥

जाग्रत्स्वप्नसुषुप्त्यादिप्रपञ्चो यः प्रकाशते।
तद्ब्रह्माहमिति ज्ञात्वा सर्वबन्धैः प्रमुच्यते ॥३५॥

जाग्रत्स्वप्नसुषुप्त्यादिः प्रपञ्चो यस्मिन्निति बहुव्रीहिः। अवस्थात्रयेऽपि साक्षितया प्रकाशमान इति यावत् ॥३५॥

त्रिषु धामसु यद्भोग्यं भोक्ता भोगश्च यद्भवेत् ।
तेभ्यो विलक्षणस्साक्षी चिन्मात्रोऽहं सदाशिवः॥३६॥

"एक एवाग्निर्बहुधा समिद्धः एकस्सूर्यो विश्वमनुप्रभूतः। एको देवस्सर्वमिदं विभात्येको वा इदं विबभूव सर्वम्" इति श्रुतिम् , "अग्निर्यथे"त्यादि कठवल्लीश्रुतिश्चार्थत उदाहरति - एको देव इति ।

एको देवः सर्वभूतेषु गूढः
सर्वव्यापी सर्वभूतान्तरात्मा ।
सर्वाध्यक्षः सर्वभूताधिवासः
साक्षी चेता केवलो निर्गुणश्च ॥३७॥

एको वशी सर्वभूतान्तरात्मा-
प्येकं बीजं नित्यदा यः करोति।
तं मां नित्यं येऽनुपश्यन्ति धीरा-
स्तेषां शान्तिश्शाश्वती नेतरेषाम् ॥३८॥

अग्निर्यथैको भुवनं प्रविष्टो
रूपं रूपं प्रतिरूपो बभूव।
एकस्तथा सर्वभूतान्तरात्मा
न लिप्यते लोकदुःखेन बाह्यः ॥ ३९ ॥

वेदेह यो मां पुरुषं महान्त-
मादित्यवर्णं तमसः परस्तात् ।
स एव विद्वानमृतोऽत्र भूया-
न्नान्यस्तु पन्था अयनाय विद्यते ॥ ४० ॥

हिरण्यगर्भं विदधाति पूर्वं
वेदांश्च तस्मै प्रहिणोमि योऽहम् ।
तं देवमीड्यं पुरुषं पुराणं
निश्चित्य मां मृत्युमुखात् प्रमुच्यते ॥ ४१ ॥

एवं शान्त्यादियुक्तस्सन् वेत्ति मां यस्तु तत्त्वतः।
निर्मुक्तदुःखसन्तानस्सोऽन्ते मय्येव लीयते ॥ ४२ ॥

॥ इति श्रीपद्मपुराणे शिवगीतासूपनिषत्सु
उपासनाप्रपञ्चो नाम द्वादशोऽध्यायः ॥

अग्निर्यथेति । अग्निर्यथा भुवनं लोहादिदाह्यं प्रविष्टस्सन् तदुपाधिवशात् चतुष्कोणदीर्घवक्रसरलत्वाद्याकारं भजत इति माधवाचार्यैरुक्तः। "जीवनं भुवनं वन"मिति जलपर्यायेषु पाठादनेकत्र प्रतिबिम्बित इत्यपि व्याख्यातुं

शक्यते । रूप्यते अस्मिन् इति रूपम् - उपाधिः, प्रतिरूपो बभूव - प्रतिबिम्बित इत्यर्थोऽपि साधुरेव । तथा एकः सर्वभूतान्तरात्मा तत्तदुपाधिभेदाद्भिन्नतया प्रतीयमानोऽपि लोकदुःखेन न लिप्यते, यतोऽयं बाह्यः, लोकस्य कल्पितत्वेन मिथ्यात्वात्ताल्लक्षणज्ञ इत्यर्थः। शेषं व्याख्यातप्रायम् ॥ ३७-४१ ॥

॥ इति श्रीमद्विशुद्धाद्वैतसिद्धान्तप्रतिष्ठापनैकधुरन्धर
श्रीमच्छङ्करानन्दभारतीविरचिते शिवगीताभाष्ये द्वादशोऽध्यायः ॥

त्रयोदशोऽध्यायः

सूत उवाच -

एवं श्रुत्वा कौसलेयस्तुष्टो मतिमतां वरः।
पप्रच्छ गिरिजाकान्तं सुभगं मुक्तिलक्षणम् ॥१॥

श्रीराम उवाच -

भगवन्! करुणाविष्टहृदय! त्वं प्रसीद मे।
स्वरूपं लक्षणं[128] मुक्तेः प्रब्रूहि परमेश्वर! ॥२॥

श्रीभगवानुवाच -

सालोक्यमपि सारूप्यं सार्ष्ट्यं सायुज्यमेव च।
कैवल्यं चेति तां विद्धि मुक्तिं राघव! पञ्चधा ॥३॥

सालोक्यमिति। सलोकस्य भावः सालोक्यम्, एकलोकवास इति यावत्। सारूप्यम् - सरूपत्वम्। सार्ष्यम् - समानैश्वर्यम्। ऋष्टिः खड्गः, तेन चैश्वर्यं लक्ष्यते। तत्सहभूतं समानं यस्य तस्य भावः सार्ष्टयम्। "खड्गं तु निस्त्रिंशचन्द्रहासासिऋष्टयः" इति क्षीरस्वामी। "ऋत्यकः" (पा.सू. ६-१-१२८) इति प्रकृतिभाव इति क्षीरस्वामी। ऋषेर्गत्यर्थात्किञ्चिद्रूपमिदम्, ऋषेस्तु हिंसार्थात् रिष्टिरिति रूपान्तरं बोध्यमिति स एवाह। सह युङ्क्ते व्यवहरतीति सयुक्। सयुजो भावस्सायुज्यम्, भूतावेशन्यायेन हिरण्यगर्भादिदेहे भोग इत्यर्थः। हिरण्यगर्भत्वपदवीप्राप्तिरेव

---

१२८ "स्वरूपलक्षण"मिति पाठान्तरम्।

सायुज्यशब्दार्थ इत्यपि केचित् । अत्र चतुष्टयेऽपि मुक्तिसादृश्यान्मुक्तिशब्दो गौणः। इदानीं मुख्यमुक्तिमाह - कैवल्यमिति। केवलस्य भावः कैवल्यम् । इति पञ्चधा - गौणमुख्यमुक्त्योः सङ्कलनया पञ्चविधतां, विद्धि - तत्तच्छब्दनिर्वचनेन जानीहि । तथा च पृथग्लक्षणं न वक्तव्यमिति भावः ॥ १-३ ॥

मां पूजयति निष्कामः सर्वदा ज्ञानवर्जितः।
स मे लोकं समासाद्य भुङ्क्ते भोगान् यथेप्सितान् ॥४॥

सालोक्यमुक्तिप्रकारमाह - मामिति । ज्ञानवर्जितः - मत्स्वरूपानभिज्ञः, तथापि मां शिवलिङ्गादौ पूजयति यः सः सालोक्यं यातीत्यर्थः ॥४॥

ज्ञात्वा मां पूजयेद्यस्तु सर्वकामविवर्जितः।
मया समानरूपस्सन् मम लोके महीयते ॥५॥

ज्ञात्वेति । मत्स्वरूपं ज्ञात्वा, ईश्वरो दयालुः देवश्रेष्ठः इत्याद्येवं ज्ञात्वेत्यर्थः ॥५॥

सार्ष्टिमुक्तिप्रकारमेवाह श्लोकद्वयेन - इष्टेति।

इष्टापूर्तादिकर्माणि मत्प्रीत्यै कुरुते तु यः।
यत्करोति यदश्नाति यज्जुहोति ददाति यत् ।
यत्तपस्यति तत्सर्वं यः करोति मदर्पणम् ॥६॥
मल्लोके स श्रियं भुङ्क्ते मत्तुल्यप्राभवं भजन् ॥७॥

यस्तु शान्त्यादियुक्तस्सन् मामात्मत्वेन पश्यति ।
स जायते परं ज्योतिरद्वैतं ब्रह्म केवलम् ॥८॥

सायुज्यप्रापकन्तु अहंग्रहोपासनादिकं अन्यतो बोध्यम् । परममुक्तिप्रापकमाह - यस्त्विति । शान्त्यादियुक्त इति - साधनचतुष्टययुक्तः, श्रवणमनननिदिध्यासनवांश्चेत्यर्थः ॥ ६-८॥

अतः स्वरूपावस्थानं मुक्तिरित्यभिधीयते ।
सत्यं ज्ञानमनन्तं सदानन्दं ब्रह्म केवलम् ॥९॥

सर्वधर्मविहीनं च मनोवाचामगोचरम् ।
सजातीयविजातीय पदार्थानामसम्भवात् ॥१०॥

अतस्तद्व्यतिरिक्तानामद्वैतमिति संज्ञितम् ।
मत्वा रूपमिदं राम ! शुद्धं यदभिधीयते ॥११॥

स्वरूपावस्थानं मुक्तिरिति तत्र तत्र यदभिधीयते तत् पूर्वोक्तात् तत्त्वावगमात् । तथा च स्वरूपस्य संसारदशायामप्यनपायात् तत्र मोक्षलक्षणमतिप्रसक्तमिति न शङ्क्यम् , स्वरूपमात्रेणावस्थानस्य विवक्षितत्वात् । संसारदशायां तु अविद्यादेरप्यवस्थानान्न तदिति भावः। ननु मोक्षकालेऽपि सत्यज्ञानानन्दाभ्युपगमात् सत्यत्वादिधर्मानेव गृहीत्वा केवलं व्याहतमित्याशङ्क्याह - सत्यमिति । केवलं यद्ब्रह्म तदेव सत्यज्ञानादि चेत्यन्वयः। तथा चानन्दादिस्वरूपमेव मोक्षे आस्ते, न त्वानन्दत्वादयो धर्मा अपि, अतो नोक्त दोष इति भावः। नन्वेवं तत्र

कस्यापि धर्मस्याभावे शक्तिर्दुर्ग्रहा स्यादित्याशङ्क्याह - मनोवाचामगोचरमिति । तथा च शक्तिविरहे इष्टापत्तिरिति भावः। नन्वेवं वेदादपि कथं तस्यावगम इत्याशङ्क्य लक्षणयेत्याह - सजातीयेत्यादिना सार्धश्लोकेन । अद्वैतमिति यत्संज्ञितं तदतः इत्यन्वयः। अत इत्यस्य विवरणं तद्व्यतिरिक्तानामसम्भवादिति । असम्भवः - अभावः।

अयमाशयः। अद्वैतमिति तावद्द्वैतविरहरूपं तद्विशिष्टं वा बोध्यते, विरहश्च अलीकप्रतियोगिकः सम्भवति । तथा च तत्प्रतियोगिभूततत्तद्धर्मविशिष्टे ब्रह्मणि पदार्थानां शक्तिरस्त्येवेति । ननु किमेतावतेत्याह - मत्वेति । हे राम ! यदिदं रूपं चिज्जडात्मकं विशिष्टं, तन्मत्वा - विचार्य, शुद्धान्तःकरणेन विविच्य, पृथग्भूतं चिद्भागमात्रमभिधीयते - लक्षणया प्रतिपाद्यत इत्यर्थः। दृश्यत्वावच्छेदेन मिथ्यात्वग्रहात् मिथ्याभूते च वेदस्य महातात्पर्यायोगाद् विशिष्टे घटकीभूतं शुद्धं तर्केण निष्कृष्य लक्षणया शब्दात्प्रमीयते इति तात्पर्यम् ॥९-११॥

मय्येव दृश्यते रूपं जगत् स्थावरजङ्गमम् ।
व्योम्नि गन्धर्वनगरं यथा दृष्टं न दृश्यते[१२९] ॥१२॥

अनाद्यविद्यया विश्वं सर्वं मय्येव कल्प्यते।
निवर्तते तु मय्येव मय्येवेदं विलीयते॥ १३॥

निवर्तते - अपक्षीयते । विलीयते - नश्यतीत्यर्थः॥ १२-१३॥

---

१२९ "यथा दृष्टे न दृश्यते" इति पाठान्तरम् । "स्वरूपलक्षण"मिति पाठान्तरम् ।

मम स्वरूपज्ञानेन यदाऽविद्या प्रणश्यति।
तदैक एव वर्तेऽहं मनोवाचामगोचरः॥ १४॥

सदैवं परमानन्दः स्वप्रकाशश्चिदात्मकः।
न कालः पञ्चभूतानि न दिशो विदिशश्च न।
मदन्यन्नास्ति यत्किञ्चित् तदा वर्तेऽहमेकलः॥ १५॥

सदेति। यद्यप्यहं सदा परमानन्दादिरूप एव, तथापि यदा कालभूतदिगादि मद्भिन्नं सर्वमधिष्ठानसाक्षात्कारेण बाध्यते तदा एक एव वर्ते, अन्यदा तु जडेन विशिष्ट इति मोक्षसंसारदशयोः वैलक्षण्योपपत्तिः॥ १४-१५॥

ननूक्तरीत्या लक्षणया उपनिषद्भिः ब्रह्म बोध्यते इत्यस्तु नाम। तथापि शब्दस्यापरोक्षज्ञानजनकताभ्युपगमे आपातज्ञानवतामपि मोक्षः स्यादेव, अपरोक्षज्ञानस्याविद्यानिवर्तकत्वध्रौव्यात्। शब्दापरोक्षानभ्युपगमे तु कस्यापि मोक्षो न स्यात्। अपरोक्षज्ञाने उपायान्तराभावादित्याशङ्क्य "न सन्दृशे तिष्ठति रूपमस्य" (२-३-९) इत्यादिकठवल्लीश्रुतिमर्थतस्संगृह्णाति - न सन्दृश इति।

न सन्दृशे तिष्ठति मे स्वरूपं
न चक्षुषा पश्यति मां तु कश्चित्।
हृदा मनीषा मनसाऽभिक्लृप्तं
ये मां विदुस्ते ह्यमृता भवन्ति॥ १६॥

मे - मम, स्वरूपं - शुद्धं रूपम् , संदृशे - दर्शनविषये, न तिष्ठति। दृशेर्घञर्थे कः। वस्तुतस्तु सन्दृशे दर्शनार्हमित्यर्थः। तुमर्थे "तवैतवेङ्तवेनः" (पा.सू. ३-४-९) इति केन् प्रत्ययः। अत एव कृदुत्तरपदप्रकृतिस्वरेण मध्योदात्तपाठोऽपि सङ्गच्छत इति । कप्रत्यये तु अन्तोदात्तः स्यादिति दिक् । अत एव मां - शुद्धं, कश्चिदपि, चक्षुरिति उपलक्षणमेतत् , चक्षुरादिसर्वेन्द्रियैः, न पश्यति - न साक्षात्करोति । कथं तर्हि द्रष्टव्यस्त्वमित्याकाङ्क्षायामाह - हृदेति । हृदा - हृत्स्था या मनीषा, मनस्सङ्कल्पादिरूपा अस्य इष्ट इति मनीषी । तथाविधया बुद्ध्या । मनसा - मनोरूपेण सम्यग्दर्शनेन, अभिक्लृप्तम् - अभिप्रकाशितमित्याचार्याः। वस्तुतस्तु मनीषा - मनीषया, श्रवणेनेति यावत् । "सुपां सुलुक्" (पा.सू. ७-१-३९) इति डादेशः। मनसा - मननेन, भावे असुन् प्रत्ययः। अभि - स्वाभिमुख्येन , क्लृप्तम् - अभेदेन निदिध्यासितमिति यावत् । ईदृशं मां ये विदुः - साक्षात्कुर्वन्ति, ते अमृता भवन्ति । तथा च शब्दापरोक्षस्य प्रागेव वृत्तत्वेऽपि असम्भावनाविपरीतभावनाभ्यां प्रतिबन्धात् कार्याक्षमता । श्रवणेन प्रमाणगताया असम्भावनायाः, मननेन च प्रमेयगतायास्तस्याः, निदिध्यासनेन च विपरीतभावनायाः निवृत्तौ अप्रतिबद्धशब्दापरोक्षात् अज्ञाननिवृत्तौ न कश्चिद्दोष इति भावः ॥१६॥

श्रीराम उवाच -

कथं भगवतो ज्ञानं शुद्धं मर्त्यस्य जायते ।
तत्रोपायं हर ! ब्रूहि मयि तेऽनुग्रहो यदि ॥१७॥

श्रीभगवानुवाच -

विरज्य सर्वभूतेभ्य आविरिञ्चिपदादपि ।
घृणां वितत्य सर्वत्र पुत्रमित्रादिकेष्वपि ॥१८॥

श्रद्धालुर्भक्तिमार्गेषु वेदान्तज्ञानलिप्सया ।
उपायनकरो भूत्वा गुरुं ब्रह्मविदं व्रजेत् ॥१९॥

आविरिञ्चिपदादिति । ब्रह्मलोकमभिव्याप्येत्यर्थः। घृणामिति । घृणां - जुगुप्साम्, वितत्य - प्राप्य॥ १८-१९॥

सेवाभिः परितोष्यैनं चिरकालं समाहितः।
सर्ववेदान्तवाक्यार्थं शृणुयात् सुसमाहितः॥ २०॥

सर्ववेदान्तवाक्यानां मयि तात्पर्यनिश्चयम् ।
श्रवणं नाम तत्प्राहुस्सर्वे ते ब्रह्मवादिनः॥ २१॥

लोहमण्यादिदृष्टान्त युक्तिभिर्यद्विचिन्तनम् ।
तदेव मननं प्राहुर्वाक्यार्थ स्योपबृंहणम् ॥२२॥

तात्पर्यं निश्चीयतेऽनेनेति करणव्युत्पत्त्या उपक्रमोपसंहाराद्यनुसन्धान-रूपतर्कः श्रवणशब्दार्थः। अत एव ज्ञानविधिं निराकुर्वतामपि श्रवणे विध्यभ्युपगमो न विरुध्यते। लोहमण्यादिदृष्टान्ताः श्रुतिप्रसिद्धाः[१३०]

१३० तथा च श्रुतिः "यथा सोम्यैकेन लोहमणिना सर्वं लोहमयं विज्ञातं स्याद्वाचारम्भणं विकारो नामधेयं लोहमित्येव सत्यम्" (छा.उ. ६-१-५) इति ।

॥२०-२२॥

निर्ममो निरहङ्कारः निर्लेपस्सङ्गवर्जितः।
सदा शान्त्यादियुक्तस्सन् आत्मन्यात्मानमीक्षते।
यत्सदा ध्यानयोगेन तन्निदिध्यासनं स्मृतम् ॥२३॥

यत्सदेति । येन ध्यानयोगेन - ध्यानरूपेणोपायेन , "योगस्सन्नहनोपाय ध्यानसङ्गतियुक्तिषु" इत्यमरः। आत्मानमीक्षते, तत् ध्यानं - निदिध्यासनं स्मृतमित्यन्वयः॥२३॥

ननु निदिध्यासस्यात्मसाक्षात्कारहेतुत्वे कृतनिदिध्यासनानामपि केषाञ्चित् साक्षात्कारानुत्पत्तिः कथं समर्थयितव्येत्याशङ्क्याह - सर्वकर्मेति ।

सर्वकर्मक्षयवशात् साक्षात्कारोऽपि चात्मनः।
कस्य चिज्जायते शीघ्रं चिरकालेन कस्यचित् ॥२४॥

आत्मनस्साक्षात्कारस्तु कस्यचित् शीघ्रं जायते, सर्वेषां कर्मणां तत्त्वज्ञानोत्पत्तिप्रतिवन्धकदुरितानां क्षीणत्वात् । कस्यचिच्चिरकालेन जायते, प्रतिवन्धकवाहुल्यादिति भावः॥२४॥

कूटस्थानीह कर्माणि कोटिजन्मार्जितान्यपि।
ज्ञानेनैव विनश्यन्ति न तु कर्मायुतैरपि ॥२५॥

कूटस्थानीति । अनारव्धकार्याणि कर्माणि अदत्तफलान्येव ज्ञानान्नश्यन्ति

इत्यर्थः ॥२५॥

ज्ञानादूर्ध्वं तु यत्किञ्चित् पुण्यं वा पापमेव वा ।
क्रियते बहु वाऽल्पं वा न तेनायं विलिप्यते ॥२६॥

ज्ञानादूर्ध्वमिति । पुण्यम् - पुण्यजनकम्, विहितकर्मेत्यर्थः। पापम् - पापजनकम् , निषिद्धकर्मेत्यर्थः। तदेवं तत्त्वज्ञानिनः सञ्चितयोः पुण्यपापयोर्नाशः , आगामिनोश्चानुत्पत्तिः इत्येतत् "तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशौ तद्व्यपदेशात्" (ब्र.सू. ४-१-१३), "इतरस्याप्येवमसंश्लेषः पाते तु" (ब्र.सू. ४-१-१४), "अनारब्धकार्य एव तु पूर्वे तदवधेः" (ब्र.सू. ४-१-१५) इत्यधिकरणेषु निर्णीतम् ॥२६॥

प्रारब्धकर्मणां भोगादेव क्षयं वक्तुं प्रारब्धं लक्षयति - शरीरेति ।

शरीरारम्भकं यत्तु प्रारब्धं कर्म तन्मतम् ।
तद्भोगेनैव नष्टं स्यान्न तु ज्ञानेन नश्यति ॥२७॥

तद्भोगेनैवेति । तथा च श्रुतिः "तस्य तावदेव चिरम्" (छा.उ. ६-१४-२) इति । यत्तु श्रुत्यन्तरं "यथा पुष्करपलाश आपो न श्लिष्यन्ते एवमेवं विदित्वा पापकर्म न श्लिष्यते" (छा.उ. ४-१४-३) इति , "उभे इहैवैष एते तरती"त्यादि च तत्प्रारब्धेतरविषयमिति भावः ॥२७॥

निर्मोहो निरहङ्कारो निर्लेपस्सङ्गवर्जितः ॥ २८॥
सर्वभूतेषु चात्मानं सर्वभूतानि चात्मनि ।

यः पश्यन् सञ्चरत्येष जीवन्मुक्तोऽभिधीयते ॥२९॥

निर्मोह इति । निवृत्तावरण इत्यर्थः। सञ्चरतीति । यावत्प्रारब्धं विक्षेपस्यानुवृत्तेरिति भावः ॥२८-२९॥

अहिनिर्ल्वयिनी यद्वद्दृष्टुः पूर्वं भयप्रदा ।
ततोऽस्य न भयं किञ्चित् तद्वद्दृष्टुरयं जनः॥ ३०॥

अहिनिर्ल्वयिनीति । सर्पत्वक्कञ्चुकनिर्मोकाद्यपरपर्याया अहिनिर्ल्वयिनी । सा यथा द्रष्टुर्जनस्य, पूर्वं - सर्पशरीरे अवस्थानदशायां, भयप्रदा । ततः - सर्पत्यागानन्तरं तु , अस्य द्रष्टुः किमपि भयं न, तद्वदयं जीवन्मुक्तः पूर्वं येषां भयप्रदः तेषामपि साम्प्रतं भयप्रदो नेत्यर्थः। एतेन "तद्यथाऽहिनिर्ल्वयिनी वल्मीके मृता" (बृ.उ. ४-४-७) इत्यादि बृहदारण्यकश्रुतिरित्थं व्याख्याता । स्कान्दपुराणे च "यथा त्यक्तां त्वचं सर्पः नात्मभावेन पश्यति । तथा विद्वानपि जडं नात्मत्वेनाध्यवस्यती"त्येवमर्थतया श्रुतिरियं व्याख्याता । तदुक्तं ब्रह्मगीतायां "अहिनिर्ल्वयिनीं मुक्तां यथा हि स्वात्मना पुनः। न पश्यति तथा विद्वान् न देहेऽहंमतिं भजेत् " इति । अयं जनः - जीवन्मुक्तजनः, जीवन्मुक्तदेहः द्रष्टुः जीवन्मुक्तदेहस्येत्यादिक्रमेण प्रकृतार्थोऽपि तदेकवाक्यतयैव वा अन्वयितव्यः॥ ३०॥

"विरज्य सर्वभूतेभ्यः" (शि.गी. १३-१८) इत्यारभ्य एतावत्पर्यन्तं क्रमिकानि साधनान्युपन्यस्तानि । तत्र वैराग्यसाधनमेव दुर्लभतरम् , तस्मिन् सिद्धे उत्तरोत्तरसाधनानि ज्ञातप्रायाण्येवेत्याशयेनाह - यदेति ।

यदा सर्वे प्रमुच्यन्ते कामा येऽस्य वशंगताः।
अथ मर्त्योऽमृतो भवत्येतावदनुशासनम् ॥३१॥

ज्ञानोत्पत्तौ सत्यां मोक्षे न विलम्ब इत्याह - मोक्षस्येति ।

मोक्षस्य न हि वासोऽस्ति न ग्रामान्तरमेव वा।
अज्ञानहृदयग्रन्थिनाशो मोक्ष इति स्मृतः ॥३२॥

ग्रामान्तरवासि पश्वादि, लोकान्तरभोग्यं च स्वर्गादि विलम्बेन लभ्यते। अज्ञानमिति । मोक्षस्य तु न तथात्वम् , यतोऽज्ञानस्य तत्प्रयुक्तहृदयग्रन्थेश्च ज्ञानान्निवृत्तिरेव मोक्षः॥३२॥

वृक्षाग्रात् च्युतपादो यः स तदैव पतत्यधः।
तद्वज्ज्ञानवतो मुक्तिर्जायते निश्चितापि तु ॥३३॥

वृक्षेति । यथा वृक्षाग्रात् प्रच्युतस्य भूमिप्राप्तौ न विलम्वः, तद्वदिति । तथा ज्ञानिनो मुक्तावपि न विलम्ब इति भावः॥३३॥

तीर्थे चण्डालगेहे वा यदि वा नष्टचेतनः।
परित्यजन् देहमेवं ज्ञानादेव विमुच्यते ॥३४॥

तीर्थ इति । तीर्थे वा भवतु चण्डालगेहे वा उभयथाप्यविशेष इति भावः। तथा यदि वा नष्टचेतनः ब्रह्मविषयकवृत्तिशून्यः। परित्यजन्निति । यदि वा ज्ञानादेव देहं परित्यजन् , सर्वथाऽपि जीवन्मुक्तः मुच्यते। प्रारब्धक्षयात् परममुक्तिं लभत एवेत्यर्थः।

अयं भावः। तीर्थादिमरणस्य ज्ञानप्राप्त्युपायत्वात् चण्डालगेहादौ मरणस्य च ज्ञानप्रतिबन्धकसाधनत्वात् तदुभयकृतो विशेषः अनुत्पन्नतत्त्वज्ञानं प्रत्येव सम्भवति । तथा ब्रह्मानुसन्धानमपि आवरणवन्तं प्रत्येव तन्निवर्तकतयोपयुज्यते । जीवन्मुक्तस्य तु पूर्वोक्तब्रह्मसाक्षात्कारेणैव निवृत्तावरणतया प्रारब्धक्षयान्ते प्रागभिव्यक्तचैतन्यमात्रेण अविद्यानिवृत्तिसम्भवात् ब्रह्माकारवृत्तिसत्वासत्वयोर्न कश्चिद्विशेषः। स्फुटं चैदन्यत्रेति ॥३४॥

संवीतो येन केनाश्नन् भक्ष्यं वाऽभक्ष्यमेव वा।
शयानो यत्र कुत्रापि सर्वात्मा मुच्यतेऽत्र सः॥३५॥

संवीत इति । येन केन उत्कृष्टेनापकृष्टेन वा वस्त्रेण संवीतः - संवृतः। 'वेष्ट संवरणे', क्तप्रत्यये सम्प्रसारणम् । तथा भक्ष्यमभक्ष्यं वा अश्नन् , यत्र कुत्रापि वा शयानः सः जीवन्मुक्तः, अत्र प्रारब्धक्षये सति मुच्यते॥३५॥

जीवन्मुक्तावस्थायां शरीरादिकं विक्षेपं पश्यन्नपि योगी पूर्ववन्न लिप्यत इत्यस्मिन्नर्थे लौकिकं दृष्टान्तमाह - क्षीरादिति ॥

क्षीरादुद्धृतमाज्यं यत् क्षिप्तं पयसि तत्पुनः।
न तेनैवैकतां याति संसारे ज्ञानवांस्तथा ॥३६॥

यदाज्यं क्षीरादुद्धृतं तदेव पुनः पयसि क्षिप्तं सत् तेन पयसा सहैकतां पूर्ववदेकरसतां न यात्येव, तथा ज्ञानवान् संसारे अहङ्कारादौ एकतां न याति,तानेव परकीयशरीरादिकमिव पश्यति न तु स्वात्मतयेत्यर्थः॥३६॥

नित्यं पठति योऽध्यायमिमं राम ! श्रृणोति वा ।
स मुच्यते देहबन्धादनायासेन राघव! ॥३७॥

ततस्संशयचित्तस्त्वं नित्यं पठ महीपते !।
अनायासेन तेनैव सर्वथा मोक्षमाप्स्यसि ॥३८॥

॥ इति श्रीपद्मपुराणे शिवगीतासूपनिषत्सु
मोक्षनिरूपणं नाम त्रयोदशोऽध्यायः॥

तत इति । हे महीपते ! संशेते इति संशयं, सन्दिहानं चित्तं यस्य तथा भूतस्त्वं नित्यमिममध्यायं पठ, तेनैव मोक्षमाप्स्यसि । इह साधनोपन्यासपूर्वकं मुक्तेः प्रपञ्चितत्वात् एतत्परिशीलनेन साधनसम्पादनं सुलभमिति लोकान् प्रति प्रकटियितुमियमुक्तिः। रामस्य स्वत एव कृतकृत्यत्वादिति दिक् ॥३७-३८॥

॥ इति श्रीमद्विशुद्धाद्वैतसिद्धान्तप्रतिष्ठापनैकधुरन्धर
श्रीमच्छङ्करानन्दभारतीविरचिते शिवगीताभाष्ये त्रयोदशोऽध्यायः॥

चतुर्दशोऽध्यायः

श्रीराम उवाच -

भगवन् ! यदि ते रूपं सच्चिदानन्दविग्रहम् ।
निष्कलं निष्क्रियं शान्तं निरवद्यं निरञ्जनम् ॥१॥

सर्वधर्मविहीनं च मनोवाचामगोचरम् ।
सर्वव्यापितयाऽऽत्मानमीक्षते सर्वतस्स्थितम् ॥२॥

आत्मविद्यातपोमूलं तद्ब्रह्मोपनिषत्परम् ।
अमूर्तं सर्वभूतात्माकारं कारणकारणम् ॥३॥

यत्तदद्रेश्यमग्राह्यं तद्ग्राह्यं वा कथं भवेत् ।
अत्रोपायमजानानस्तेन ि.न्नोऽस्मि[१३१] शङ्कर ॥४॥

भगवन्निति । यदीत्यस्य यद्यपीत्यर्थः। तथा च हे भगवन् ! ते रूपं सच्चिदानन्दाद्यात्मकम् । सर्वेति । सर्वतः स्थितमात्मानं सर्वव्यापितया यद्यपीक्षते । अनावृतस्वरूपं बिम्बीभूतं त्वां प्रति यथावत्प्रथिते इति यावत् । तथाप्यहं भिन्नोऽस्मि - अविद्याप्रयुक्तभेदवानेन सन् तिष्ठामीति वक्ष्यमाणेनान्वयः। ब्रह्म विशिनष्टि - आत्मविद्येति । आत्मविद्यातपोमूलम् - आत्मविद्या च तपश्च तदुभयं मूलं ज्ञानोपायभूतं, तथाभूतम् । उपनिषदां परम् - महातात्पर्यविषयीभूतम् । तथा च "तपसा

---

१३१ "खिन्नोऽस्मि शङ्कर" इति पाठान्तरम् ।

ब्रह्म विजिज्ञासस्व" (तै.उ. ३-२), "वेदैश्च सर्वैरहमेव वेद्यः" इत्यादिश्रुतिभिः तपःप्रभृतिज्ञानोपायावगमेऽपि दुर्ज्ञेयबोधने उपायान्तरम् आकाङ्क्षत इति भावः। ननु तया आवरणनिवृत्तिसमर्थं तत्त्वज्ञानं कुतो न सम्पादयसीति चेत्तत्राह - यत्तद्ब्रह्म । अदृश्यम् - दृगविषयः। तथा अग्राह्यम् - दुर्ज्ञेयमिति श्रुत्युक्तम् । तद्ब्रह्म कथं वा ग्राह्यं भवेत् ? अत्र उपायं न जानीत इत्यजानानः, तेन कारणेन । तथा चातिसूक्ष्मे दुर्ज्ञेये कथं चित्तं प्रवर्तयितव्यम्, तत्रोपायं ब्रूहीति भावः॥ १-४॥

श्रीभगवानुवाच -

शृणु राम ! प्रवक्ष्यामि तत्रोपायं महाभुज ।
सगुणोपासनाभिस्तु चित्तैकाग्र्यं विधाय च ।
स्थूलसौराम्भिकान्यायात्[१३२] तत्र चित्तं प्रवर्तयेत् ॥५॥

स्थूलेति । तत्र - दुर्ज्ञेये वस्तुनि, स्थूलसौराम्भिकान्यायेन चित्तं प्रवर्तयेदित्यन्वयः। अयं भावः। यथा सुदूरस्थं जलमिति तृष्णया गवेषयन्तं प्रति किञ्चिद्दूरोपलभ्यमानमरुमरीचिकाजलमेव परमार्थजलत्वेन उपदिश्य तावद्दूरं नीत्वा ततः परमार्थजलमीषत्सन्निहितमङ्गुलिनिर्देशेन उपदिश्यते तथा अन्नमयप्राणमयमनोमयविज्ञानमयानन्दमायाख्यान् पञ्चकोशान् क्रमेणोपदिश्य ततः सूक्ष्मतरमप्युपदेष्टव्यमिति । एतेन शाखाचन्द्रन्याय-स्थूलारुन्धतीन्यायादयोऽपि व्याख्याताः। स्थूलसौराम्भिकेत्यत्र शब्दसाधुता त्वित्थम् । सूरस्येमे सौराः मरीचयः, तेष्वध्यस्तमम्भः सौराम्भः। तस्याख्यानं सौराम्भिका । "तत्करोति तदाचष्ट" इत्याख्यानार्थकणिजन्तादर्थनिर्देशे ण्वुल्, इक्षुभक्षिकेत्यादिवत्।

१३२ "स्थूलारुन्धतिकान्यायात्" इति पाठान्तरम्।

तत्र स्थूलदेहरूपे अन्नपरिणामत्वादन्नमये पिण्डे आत्मबुद्धिरस्ति । सा च कदापि न हीयते । तदपगमाय आत्मा अवपुः शरीराद्भिन्न इति सम्यक् वैधर्म्यानुसन्धानपूर्वकं चिन्तयेदिति व्यवहितेन सम्बन्धः ॥५॥

तस्मिन्नन्नमये पिण्डे स्थूलदेहे तनूभृताम् ।
जन्मव्याधिजरामृत्युनिलये वर्तते दृढा ॥६॥

आत्मबुद्धिरहम्मानात् कदाचिन्नैव हीयते।
आत्मा न जायते नित्यो म्रियते वा कथञ्चन ॥७॥

सञ्जायतेऽस्ति विपरिणमते वर्धतेऽपि च ।
क्षीयते नश्यतीत्येते षड्भावा वपुषस्स्मृताः॥८॥

आत्मनो न विकारित्वं घटस्थनभसो यथा ।
एवमात्माऽवपुस्तस्मादिति सञ्चिन्तयेद्बुधः॥९॥

वैधर्म्यमेवोपपादयति - सञ्जायत इत्यादिना । एतेन षड्भावविकाराः शरीरस्योक्ताः॥६-९॥

एवं प्रागुक्तवैधर्म्यबलेनान्नमयस्यानात्मत्वे निर्णीते ततोऽप्युत्तरः प्राणमय आत्मत्वेनोपदेष्टव्य इत्याशयेन तमाह - मूषेत्यादिना ।

निक्षिप्तहेमाभः कोशः प्राणमयोऽत्र तु ।
क्षुत्पिपासापरो भूतो नायमात्मा जडो यतः॥१०॥

चिद्रूप आत्मा येनैव स्वं देहमभिपश्यति ॥ ११ ॥

मूषा[१३३] निक्षिप्तं हेम यथा तदाकारं तत्संश्लिष्टं ततोऽभ्यर्हितं च तथैव अन्नमयस्यान्तरः प्राणमयः कोशोऽस्तीति भावः। तस्याप्यात्मतां निराकरोति - नायमात्मेति । अत्र हेतुमाह - जडो यत इति । यतोऽयं प्राणमयो जडः येन तु प्राणमयाख्यं स्वसूक्ष्मदेहमभिपश्यति । आत्मा तु चिद्रूपः। अत्र स्वदेहमित्युक्तिः प्राणस्य लिङ्गशरीरे अन्तर्भावमभिप्रेत्य । तथा हि । जीवस्य त्रीणि शरीराणि, स्थूलं सूक्ष्मं कारणात्मकं चेति । तत्र स्थूलशरीरविशिष्टोऽन्नमयः। तस्य चात्मतत्त्वोपदेशेन स्वशरीरादन्यस्य पुत्रमित्रादेरात्मत्वभ्रमो निराकृतः। लिङ्गशरीरं तु सप्तदशात्मकं यत्प्राक् प्रपञ्चितं सूक्ष्मशरीरम् । तत्र प्राणमयमनोमयविज्ञानमयानां त्रयाणां अन्तर्भावः। तत्र सङ्कल्पविकल्पात्मकवृत्त्युपहितं मनः। निश्चयात्मक वृत्त्युपहितं विज्ञानम् । सुषुप्तौ भासमानमविद्यावच्छिन्नं तु कारणशरीरम्। स एव चानन्दमयः। एते चान्नमयादयः पञ्च असिकोशवत् आच्छादकत्वसाम्यात् पञ्चकोशा इत्युच्यन्त इति दिक् ॥ १०-११ ॥

आत्मैवाहं परं ब्रह्म निर्लेपस्सुखनीरधिः।
न तदश्नाति किञ्चैनं न तदश्नाति कश्चन ॥ १२ ॥

ततः प्राणमये कोशे कोशोऽस्त्येव मनोमयः।
स सङ्कल्पविकल्पात्मा बुद्धीन्द्रियसमायुतः॥ १३ ॥

कामः क्रोधस्तथा लोभो मोहो मात्सर्यमेव च ।

---

१३३ अन्तःप्रतिमाकारछिद्रवती मृण्मयी प्रतिकृतिः मूषा ।

मदश्चेत्यरिषड्वर्गो ममतेच्छादयोऽपि च ।
मनोमयस्य कोशस्य धर्मा एतस्य तत्र तु ॥ १४॥

या कर्मविषया बुद्धिर्वेदशास्त्रार्थ निश्चिता ।
सा तु ज्ञानेन्द्रियैस्सार्धं विज्ञानमयकोशतः॥ १५॥

इह कर्तृत्वाभिमानी स एव तु न संशयः।
इहामुत्र गतिस्तस्य स जीवो व्यावहारिकः॥ १६॥

तत्र विज्ञानमयं कोशमाह - तत्र त्विति । तत्र - तस्मिन् प्रागुक्तमनोमयकोशे, वेदाश्च शास्त्राणि च तेषामर्थे निश्चिता निश्चयरूपा या बुद्धिः सा विज्ञानमयकोशतः इति सम्वन्धः। तथा च विज्ञानमयमनोमययोः सङ्कल्पाद्यनुकूलशक्तिनिश्चयानुकूलशक्तिरूपोपाधि प्रयुक्तो भेद इति भावः॥ १२-१६॥

व्योमादिसात्विकांशेभ्यो जायन्ते धीन्द्रयाणि तु ।
व्योम्नश्श्रोत्रं भुवो घ्राणं जलाज्जिह्वाऽथ तेजसः।
चक्षुर्वायोस्त्वगुत्पन्ना तेषां भौतिकता ततः॥ १७॥

व्योमादीनां समस्तानां सात्विकांशेभ्य एव तु ।
जायेते बुद्धिमनसी बुद्धिः स्यान्निश्चयात्मिका॥ १८॥

वाक्पाणिपादपायूपस्थानि कर्मेन्द्रियाणि तु ।

व्योमादीनां रजोंशेभ्यो व्यस्तेभ्यस्तान्यनुक्रमात् ॥१९॥

समस्तेभ्यो रजोंशेभ्यः पञ्च प्राणादिवायवः।
जायन्ते सप्तदशकमेवं लिङ्गशरीरकम् ॥२०॥

सप्तदशकमिति । सप्तदशानां सङ्घः सप्तदशकम् । सङ्घार्थे कन् । "षोडशकलाः पुरुषायणाः पुरुषं प्राप्य" (प्र.उ. ६-५) इति श्रुतिस्तु मनोबुद्ध्योर्धर्मैक्यादेकत्वेन गणनामभिप्रेत्य प्रवृत्तेति बोध्यम् ॥२०॥

एतल्लिङ्गशरीरं तु तप्तायःपिण्डवद्यतः।
परस्पराध्यासयोगात् साक्षिचैतन्यसंयुतम् ॥२१॥

तदानन्दमयः कोशो भोक्तृत्वं प्रतिपद्यते ।
विद्याकर्मफलादीनां भोक्तेहामुत्र स स्मृतः॥ २२॥

एतदिति । यतः इति । सार्वविभक्तिकस्तसिः। यतः - यस्यामवस्थायां जाग्रत्स्वप्नरूपायाम् , एतत् - पूर्वोक्तं लिङ्गशरीरम् , तप्तायःपिण्डवत् परस्पराध्यासयोगात् साक्षिचैतन्येन सह संयुतं तदा आनन्दमयकोशः भोक्तृत्वं प्राप्नोति ॥२१-२२॥

यदाऽध्यासं विहायैष स्वस्वरूपेण तिष्ठति ।
अविद्यामात्रसंयुक्तः साक्ष्यात्मा जायते तदा ॥२३॥

द्रष्टान्तःकरणादीनामनुभूतेः स्मृतेरपि ।

अतोऽन्तःकरणाध्यासानध्यासित्वेन चात्मनः॥ २४॥

आनन्दमयकोशमाह - यदेति । यदा - सुषुप्तौ , एष आत्मा अध्यासं विहाय तिष्ठति, स्वप्नेऽहङ्कारादेर्विलयश्रवणादिति भावः। तदा साक्ष्येव जायते, न तु भोक्तेत्यर्थः। स एवानन्दमयः कोश इति भावः। इदञ्च पूर्वश्लोक एव स्फुटीकृतम् । तत्किं जाग्रदादौ साक्षी नास्त्येव, तथा सति अवस्थात्रयसाक्षित्वं प्रागुक्तं व्याकुप्येतेत्यत आह - द्रष्टेति । अन्तःकरणादीनां तथा अनुभवस्मृत्यादिसकलतद्वृत्तीनां स एव द्रष्टा । तथा च सुषुप्तौ साक्ष्येवास्तीति पूर्वश्लोकार्थः, न तु साक्षी सुषुप्तावेवेति , येनोक्तदोषः स्यादिति भावः। यद्यप्यविद्योपहितस्वापरोक्षतया भासेतेति अतिप्रसङ्गः, तथाप्यन्तःकरणोपहितत्वमप्यपेक्षितमतो नोक्तदोषः। अत एवावश्यकत्वादन्तःकरणमिव स्थूलसूक्ष्मावस्थाधारणसाक्ष्युपाधिः, प्रमातृतायां तु विशेषणं तदिति श्रीनृसिंहाश्रमश्रीपादा आहुः। तदेवं बिम्बप्रतिबिम्बसाधारणचैतन्यस्यैवाविद्योपहितस्यान्तःकरणोपहितस्य वा साक्षित्वम्, अन्तःकरणतादात्म्यापन्नस्य प्रतिबिम्बचैतन्यस्य प्रमातृतेति स्थितम् । इदानीं बिम्बस्य न भोक्तृत्वम् , किन्तु साक्षितैव, प्रतिबिम्बस्य त्वहङ्कारतादात्म्याद्भोक्तृतेत्याह - अत इति ॥ २३-२४॥

भोक्तृत्वं साक्षिता चेति द्वैधं तस्योपपद्यते।
आतपश्चापि तच्छाया तत्प्रकाशे विराजते ॥ २५॥

आतपश्चेति । तत्प्रकाशे - तस्मिन्नेव ब्रह्मात्मके प्रकाशे । आतप इव आतपः - अनावृतबिम्बस्वरूपम् , छायेव छाया - आवृतस्वरूपो जीवः इत्युभयं कल्पितभेदप्रकाशवतः, वस्तुतस्तु रूपैक्यमेवेति भावः। "ऋतं

पिबन्तौ सुकृतस्य लोके गुहां प्रविष्टौ परमे परार्धे। छायातपौ ब्रह्मविदो वदन्ति पञ्चाग्नयो ये च त्रिणाचिकेताः" इति कठवल्लीश्रुतिः(१-३-१) अर्थंत उपनिबद्धा । छायातपशब्दयोश्च जीवेशपरत्वं "गुहां प्रविष्टावात्मानौ हि तद्दर्शनात्" (ब्र.सू. १-२-११) इत्यधिकरणे निर्णीतम्॥ २५॥

एको भोजयिता तत्र भुङ्क्तेऽन्यः कर्मणः फलम् ॥ २६॥

एक इति । एकः - ईश्वरः, भोजयिता । अन्यः - जीवस्तु, कर्मणः फलं - स्वर्गादि, भुङ्क्ते इत्यर्थः। एतेन श्रुतौ पिबदपिबतोः पिबच्छब्दो गौणः, छत्रिशब्दवदित्युक्तम् । सुकृतस्य कर्मणः ऋतं - सत्यं, अवश्यं भावित्वात्, फलमिति च वाक्यशेषो व्याख्यातः॥ २६॥

इत उत्तरतः "आत्मानं रथिनं विद्धि" (क.उ. १-३-३) इत्यादिश्रुतिमर्थंत उपनिबध्नाति - क्षेत्रज्ञमित्यादिना ।

क्षेत्रज्ञं रथिनं विद्धि शरीरं रथमेव तु ।
बुद्धिं तु सारथिं विद्धि प्रग्रहं तु मनस्तथा ॥ २७॥

इन्द्रियाणि हयान् विद्धि विषयास्तेषु गोचराः।
इन्द्रियैर्मनसा युक्तं भोक्तारं विद्धि पूरुषम् ॥ २८॥

अत्र क्षेत्रज्ञशब्देन श्रुतौ आत्मशब्दो जीवपर इत्युक्तम् । तं जीवं रथस्वामिनं विद्धि । शरीरं रथं विद्धि । बुद्धिमिति । बुद्धिरूपेण सारथिना इन्द्रियाश्वाः प्रेर्यन्ते । सङ्कल्पविकल्पात्मकं मनस्तु रशनास्थानापन्नम् । रूपादिविषयास्तु गोचराः अश्वसञ्चारेष्टप्रदेशाः। तदेवं रथादिरूपक

कल्पनया शरीरेन्द्रियादिविशिष्टस्यैव भोक्तृत्वम्, न तु सुषुप्तिसाधारणस्य आनन्दमयस्येति प्रकृतोऽर्थः स्फुटीकृतः ॥ २७-२८ ॥

एवं शान्त्यादियुक्तस्सन् उपास्ते यस्सदा द्विजः ॥ २९ ॥

उद्घाट्योद्घाट्यैकमेकं यथैव कदलीतरोः ।
वल्कलानि ततः पश्चाल्लभते सारमुत्तमम् ॥ ३० ॥

तथैव पञ्चकोशेषु मनस्सङ्क्रामयन् क्रमात् ।
तेषां मध्ये ततस्सारमात्मानमपि विन्दति ॥ ३१ ॥

एवमिति । उक्तरीत्या अन्नमयादानन्दमयान्तान् क्रमेण ब्रह्मतया य उपास्ते सः सारभूतमात्मानं विन्दति । उद्घाट्येति । यथा कदलीतरोर्वल्कलानां मध्ये एकैकमुद्घाटयन् पुरुषः क्रमेणान्तर्निगूढसारं लभते, न तु प्रथमत एव तद्वत् पञ्चकोशेषु पूर्वोक्तेषु क्रमान्मनः सङ्क्रामयन् सन् तेषां मध्ये सारं तदधिष्ठानभूतमित्यर्थः ॥ २९-३१ ॥

तदेवं पञ्चकोशानतिक्रम्य आनन्दमयादप्यान्तरं "ब्रह्मपुच्छं प्रतिष्ठा" इति श्रुत्या स्वप्राधान्येन निर्दिष्टं वास्तवस्वरूपमाह - एवं मनस्समाधायेति ।

एवं मनस्समाधाय संयतो मनसि द्विजः ।
अथ प्रवर्तयेच्चित्तं निराकारे परात्मनि ॥ ३२ ॥

ततो मनः प्रगृह्णाति परमात्मानमेकलम् ।

यत्तदद्रेश्यमग्राह्यमस्थूलाद्युक्ति गोचरम् ॥३३॥

"अस्थूलमनणवह्रस्वमदीर्घम्" (बृ.उ. ३-८-८) इति श्रुतिः, तद्गोचरम् - तत्तात्पर्यविषयीभूतमित्यर्थः। तदेवमानन्दमयो न स्वप्रधामतया श्रुतौ निर्दिष्टः, किन्तु "ब्रह्मपुच्छं प्रतिष्ठा" (तै.उ. २-५) इति वाक्यार्थभूत सर्वाधारब्रह्मप्रतिपत्त्युपायतयैवेति श्रुतितात्पर्यं स्फुटीकृतम् । अत एव स्कान्देऽपि पञ्चकोशावतरणप्रसङ्गेनोक्तम् - "आनन्देन सदा पूर्णः कोशो ज्ञानमयस्सुराः। यथाऽऽनन्दमयश्चापि ब्रह्मणाऽन्येन साक्षिणा । सर्वान्तरेण सम्पूर्णो ब्रह्मणाऽन्येन केनचित्॥" इति । न्यायं चैतत् , "ब्रह्मविदाप्नोति पर"मिति (तै.उ. २-१) फलवद्ब्रह्मज्ञानं प्रक्रम्य "सत्यं ज्ञानमनन्तं ब्रह्म" (तै.उ. २-१), "ब्रह्मणा विपश्चितेति" (तै.उ. २-१), "अस्ति ब्रह्मेति चेद्वेद" (तै.उ. २-६) इति ब्रह्मण एवाभ्यस्यमानत्वात् । अत एवोत्तरमीमांसायां "आनन्दमयोऽभ्यासात्" (ब्र.सू. १-१-१२) इत्यधिकरणे भाष्यकारैरयमेवार्थस्सिद्धान्तितः। एकदेशिनां व्याखानान्तरं च दूषितम् । एतेन भाष्यकाराणां सूत्रकारस्य च परस्परविरोधं हर्षतयोद्भावयन्तः परास्ताः। बहुतरपुराणवचनानुरोधेनापि सूत्रस्य व्याख्येयत्वात् । अन्यथा तत्र कृतस्योक्तविरुद्धाभिधानतोपपत्तेरिति दिक् ॥३२-३३॥

श्रीराम उवाच -

भगवन् ! श्रवणे नैव प्रवर्तन्ते जनाः कथम् ।
वेदशास्त्रार्थसम्पन्ना यज्वानो ब्रह्मवादिनः ॥ ३४॥

शृण्वन्तोऽपि तथाऽऽत्मानं जानते नैव केचन ।

ज्ञात्वाऽपि मन्वते मिथ्या किमेतत्तव मायया ॥३५॥

श्रवणे जनाः न प्रवर्तन्त एव कथमित्यन्वयः। केचन शृण्वन्तस्सन्तोऽपि न जानते । केचित्तु ज्ञात्वाऽपि - श्रवणादीनां परोक्षनिश्चयवन्तोऽपि मिथ्याभूतमेतन्मन्वते, नाद्रियन्त इत्यर्थः ॥३५॥

श्रीभगवानुवाच -

एवमेव महाबाहो ! नात्र कार्या विचारणा ॥३६॥

दैवी ह्येषा गुणमयी मम माया दुरत्यया ।
मामेव ये प्रपद्यन्ते मायामेतां तरन्ति ते ॥३७॥

अभक्ता ये महाबाहो ! मम श्रद्धाविवर्जिताः।
फलं कामयमानास्ते चैहिकामुष्मिकादिकम् ।
क्षयिष्ण्वल्पं सातिशयं यतः कर्मफलं मतम् ॥३८॥

अभक्ता इति । मम अभक्तास्ते फलं कामयमानास्सन्तस्तिष्ठन्तीति शेषः। यतः - यस्मात्, कर्मफलम्। अत एव क्षयादिदोषदुष्टं तत् क्षयिष्णुत्वादिकं अविज्ञाय कुर्वन्ति - फलकामनया तिष्ठन्तीत्यर्थः ॥३६-३८॥

तदविज्ञाय कर्माणि ये कुर्वन्ति नराधमाः।
मातुः पतन्ति गर्भे ते मृत्योर्वक्त्रे पुनः पुनः ॥३९॥

नानायोनिषु जातस्य देहिनो यस्य कस्यचित् ।

कोटिजन्मार्जितैः पुण्यैर्मयि भक्तिः प्रजायते ॥४०॥

स एव लभते ज्ञानं मद्भक्तः श्रद्धयाऽन्वितः।
नान्यकर्माणि कुर्वाणो जन्मकोटिशतैरपि ॥४१॥
ततस्सर्वं परित्यज्य मद्भक्तिं समुदाहर ॥४२॥

सर्वधर्मान् परित्यज्य मामेकं शरणं व्रज ।
अहं त्वा सर्वपापेभ्यो मोक्षयिष्यामि मा शुचः॥४३॥

समुदाहर - कुर्वित्यर्थः॥४२॥ त्वा इति - त्वाम् , मोक्षयिष्यामि । अत एव मा शुचः - मा शोकेन विशीर्णो भूः। 'शुच शोके' "माङि लुङ्" (पा.सू. ३-३-१७५), "न माङ् योगे" (पा.सू. ६-४-७४) इत्यडागमनिषेधः॥४३॥

यत्करोषि यदश्नासि यज्जुहोषि ददासि यत् ।
यत्तपस्यसि राम ! त्वं तत्कुरुष्व मदर्पणम् ॥४४॥
ततः परतरं नास्ति भक्तिर्मयि रघूत्तम !॥४५।

॥ इति श्रीपद्मपुराणे शिवगीतासूपनिषत्सु
पञ्चकोशपवर्णनं नाम चतुर्दशोऽध्यायः॥

रघूत्तमेति। रघुवंशे लक्षणया रघ्वपत्येषु वर्तते तेषूत्तमः॥४५॥

॥ इति श्रीमद्विशुद्धाद्वैतसिद्धान्तप्रतिष्ठापनैकधुरन्धर
श्रीमच्छङ्करानन्दभारतीविरचिते शिवगीताभाष्ये चतुर्दशोऽध्यायः॥

पञ्चदशोऽध्यायः

श्रीराम उवाच -

भक्तिस्ते कीदृशी देव ! जायते वा कथं च सा ।
यया निर्वाणरूपत्वं[१३४] लभते मोक्षमुत्तमम् ।
तद्ब्रूहि गिरिजाकान्त ! प्राप्यते येन निर्वृतिः ॥ १ ॥

श्रीभगवानुवाच -

यो वेदाध्ययनं नित्यं दानानि विविधानि च ।
मदर्पणधिया कुर्यात् स मे भक्तस्स मे प्रियः ॥ २ ॥

यो हि भस्म समादाय विशुद्धं श्रोत्रियालयात् ।
अग्निरित्यादिभिर्मन्त्रैरभिमन्त्र्य यथाविधि ॥ ३ ॥

उद्धूलयति गात्राणि तेन चार्चति मामपि ।
तस्मात् परतरा भक्तिर्मम राम ! न विद्यते ॥ ४ ॥

सर्वदा शिरसा कण्ठे रुद्राक्षान् धारयेत्तु यः ।
पञ्चाक्षरीजपपरः स मे भक्तः स मे प्रियः ॥ ५ ॥

भस्मच्छन्नो भस्मशायी सर्वदा विजितेन्द्रियः ।
यस्तु रुद्रं जपेन्नित्यं चिन्तयेन्मामनन्यधीः ॥ ६ ॥

१३४ "यथा निर्वाणरूपन्तु" इति पाठान्तरम् ।

स तेनैव हि देहेन शिवस्सञ्जायते स्वयम् ।
जपेद्यो रुद्रसूक्तानि तथाऽथर्वशिरः परम् ॥७॥

कैवल्योपनिषत्सूक्तं श्वेताश्वतरमेव च ।
ततः परतरो भक्तो मम लोके न विद्यते ॥८॥

अन्यत्र धर्मादन्यस्मादन्यत्रास्मात् कृताकृतात् ।
अन्यत्र भूताद्भव्याच्च यत्प्रवक्ष्यामि तच्छ्रुणु ॥९॥

भक्तेरेवावान्तरभेदान् प्रपञ्चयितुं पञ्चदशोऽध्याय आरभ्यते । तत्र "ततः परतरो भक्तो मम लोके न विद्यते" इत्यन्तं सार्धश्लोकाष्टकं स्पष्टार्थकम् । कठवल्लीषु द्वितीयवल्ल्याम् "अन्यत्र धर्मादन्यत्राधर्मादन्यत्रास्मात् कृताकृतात् । अन्यत्र भूताच्च भव्याच्च यत्तत्पश्यसि तद्वद" (क.उ. १-२-१४) इति नचिकेतसा मृत्युं प्रति पृष्टे "सर्वे वेदा यत्पदमामनन्ति" (क.उ. १-२-१५) इत्यादिना ब्रह्मोपदिश्य "ओमित्येत"दित्यादिना "एतदालम्बनं ज्ञात्वा ब्रह्मलोके महीयते" (क.उ. १-२-१७) इत्यन्तेन ओङ्कारोपासनमेव ब्रह्मप्राप्त्यालम्बनानां मध्ये श्रेष्ठतममिति प्रतिपादितम् । तदेतच्चतुर्भिः श्रुत्यनुसारिभिश्श्लोकैः संगृह्णाति - अन्यत्रेत्यादिभिः। न चात्र "भक्तिस्ते कीदृशी"त्युपक्रमाननुगुणत्वं शङ्क्यम् "भस्माभिमन्त्र्य यो मां तु प्रणवेन प्रपूजयेत् । तस्मात्परतरो भक्तो मम लोके न विद्यते" (१५-२४) इति वक्ष्यमाणं प्रत्युपयोगितया प्रणवोत्कर्षस्येह प्रस्तूयमानत्वादिति। श्लोकार्थस्तु धर्मादन्यत्र - धर्मविलक्षणमिति यावत् । अन्यस्मात् - अधर्मादप्यन्यत् । तथा कृताकृतात् - कार्यकारणादप्यन्यत् । भूताच्च भव्याच्च कालादन्यत् - कालत्रयापरिच्छिन्नमित्यर्थः। ईदृशं वस्तु वक्ष्यामि,

शृणु ॥ १-९ ॥

वदन्ति यत्पदं वेदाः शास्त्राणि विविधानि च ।
सर्वोपनिषदां सारं दध्नो घृतमिवोद्धृतम् ॥ १० ॥

यदिच्छन्तो ब्रह्मचर्यं चरन्ति मुनयस्सदा ।
तत्ते पदं सङ्ग्रहेण ब्रवीष्यामीति यत्पदम्[१३५] ॥ ११ ॥

एतदेवाक्षरं ब्रह्म चैतदेवाक्षरं परम् ।
एतदेवाक्षरं ज्ञात्वा ब्रह्मलोके महीयते ॥ १२ ॥

वदन्तीति । पदं - पदनीयं, यद्वस्तु वेदाः वदन्ति, तत्पदं ब्रवीष्यामि - वक्ष्यामि, छान्दसोऽयं प्रयोगः। इति - इत्थं प्रतिज्ञाय, परम् - अनन्तरं, यन्निर्दिष्टं कठवल्लीश्रुतौ 'ओमित्येत'दित्यनेन, एतदेवाक्षरं ब्रह्म - सगुणं ब्रह्मेत्यर्थः। तथा एतदेव परं - निर्गुणं ब्रह्म। एतदेवाक्षरं ज्ञात्वा - ब्रह्मत्वेनोपास्य, ब्रह्मलोके महीयते इति श्रुतिमर्थत उपनिबध्नन् प्रणवस्य मन्त्रान्तरापेक्षया अत्युत्कर्षं स्फुटीकृतवान् ॥ १०-१२ ॥

छन्दसां यस्तु धेनूनामृषभत्वेन चोदितः ।
इदमेव पतिस्सेतुरमृतस्य च धारणात् ॥ १३ ॥
मेधया पिहिते कोशे ब्रह्म यत्परमोमिति ॥ १४ ॥

१३५ "ब्रवीम्योमिति यत्पदम्" इति "प्रब्रविष्यामि यत्पदम्" इति च पाठान्तरम् ।

यः, छन्दसां - वैदिकवाग्रूपाणां, धेनूनां - गवां, ऋषभत्वेन चोदितः - श्रुतावुपदिष्टः ओमिति, तदिदमेव परं ब्रह्मेत्यन्वयः। यतः पतिः नियामकः। अमृतस्य - मोक्षस्य, धारणात् । संसारस्य सेतुरिव सेतुः। ईदृशं यद्ब्रह्म मेदसा पिहिते कोशे उपास्यतया श्रूयते तदोङ्काराभेदेन ध्येयमिति फलितोऽर्थः॥ १३-१४॥

चतस्रस्तस्य मात्रास्स्युरकारोकारकौ तथा ।
मकारस्यावसानेऽर्धमात्रेति परिकीर्तिता॥ १५॥

तस्य प्रणवस्य चतस्रो मात्राः। अत्राकारस्य उकारस्य मकारस्य च मात्रास्त्रयः। अवसाने तु चतुर्थी अर्धमात्रेत्यर्थः। यद्यपि नेदं व्याकरणानुगुणम् , तथाप्यारोपितेनापि रूपेणोपासनान्न कोऽपि विरोधः॥ १५॥

पूर्वत्र भूश्च ऋग्वेदो ब्रह्माष्टवसवस्तथा ।
गार्हपत्यश्च गायत्री गङ्गा प्रातस्सवस्तथा ॥ १६॥

द्वितीया च भुवो विष्णुः रुद्रोऽनुष्टुब् यजुस्तथा ।
यमुना दक्षिणाग्निश्च माध्यन्दिनसवः स्मृतः॥ १७॥

तृतीया च सुवः सामान्यादित्यश्च महेश्वरः।
अग्निराहवनीयश्च जगती च सरस्वती ॥ १८॥

तृतीयं सवनं प्रोक्तमथर्वत्वेन यन्मतम् ।

चतुर्थी याऽवसानेऽर्धमात्रा सा सोमलोकगा ॥१९॥

अथर्वाङ्गिरसस्संवर्तकोऽग्निश्च [136] महस्तथा ।
विराट् सभ्यावसथ्यौ च शुतुद्रिर्यज्ञपुच्छकः॥ २०॥

तत्र प्रथममात्रायां भूः ऋग्वेदः इत्यादयो ध्येयाः। द्वितीयस्यां तु भुवर्लोको विष्णुश्चेत्यादयो ध्येयाः। तृतीयस्यां तु सुवर्लोको सामानि चेत्यादिदेवता ध्येयाः। अग्निरिति - आहवनीयसंज्ञको योऽग्निः स इत्यर्थः। चतुर्थीति । अवसाने विद्यमाना चतुर्थी अर्धमात्रा सोमलोकगा इत्यादि ध्येयम् ॥१६-२०॥

प्रथमा रक्तवर्णा स्याद् द्वितीया भास्वरा मता।
तृतीया विद्युदाभा सा चतुर्थी शुक्लवर्णिनी ॥२१॥

तत्र प्रथममात्रा रक्तवर्णा । द्वितीया तु भास्वरा । तृतीया तु विद्युन्निभा । चतुर्थी शुक्लवर्णाऽस्यामिति शुक्लवर्णिनी ध्येया, "न कर्मधारयान्मत्वर्थीय" इति तु प्रायिकम् ॥२१॥

सर्वं जातं जायमानं तदोङ्कारे प्रतिष्ठितम् ।
विश्वं भूतं च भुवनं विचित्रं बहुधा तथा ॥२२॥

जातं च जायमानं यत् तत्सर्वं रुद्र उच्यते ।
त्रैताग्नेस्स्मार्तवह्नेर्वा शैवाग्नेर्वा समाहृतम् ॥२३॥

१३६ "संवर्तकोऽग्निर्मरुतस्तथा" इति पाठान्तरम् ।

भस्माभिमन्त्र्य यो मां तु प्रणवेन प्रपूजयेत् ।
तस्मात् परतरो भक्तो मम लोके न विद्यते॥ २४॥

जातं जायमानं च सर्वमोंकारे प्रतिष्ठितमिति । पूर्वं तत्तन्मात्रासु ध्येयमुक्तम् , सम्प्रति तु मात्राविशेषमनालम्ब्य सम्पूर्णे ओंकारे ध्येयं निर्दिश्यते । एवं यस्योंकारस्य प्रशंसा कृता तं विनियुङ्क्ते - प्रणवेन प्रपूजयेदिति ॥२२-२४॥

शालाग्नेर्दाववह्नेर्वा भस्मानीयाभिमन्त्रितम् ।
यो विलिम्पति गात्राणि स शूद्रोऽपि विमुच्यते ॥२५॥

कुशपुष्पैर्बिल्वदलैः पुष्पैर्वा गिरिसम्भवैः।
यो मामर्चयते नित्यं प्रणवेन प्रियो हि सः ॥२६॥

पुष्पं फलं समूलं वा पत्रं सलिलमेव वा।
यो दद्यात् प्रणवैर्मह्यं तत्कोटिगुणितं भवेत् ॥२७॥

अहिंसा सत्यमस्तेयं शौचमिन्द्रियनिग्रहः।
यस्यास्त्यध्ययनं नित्यं स मे भक्तस्स मे प्रियः॥ २८॥

प्रदोषे यो मम स्थानं गत्वा पूजयते तु माम् ।
स परां श्रियमाप्नोति पश्चान्मयि विलीयते ॥२९॥

अष्टम्यां च चतुर्दश्यां पर्वणोरुभयोरपि ।

भूतिभूषितसर्वाङ्गो यः पूजयति मां निशि ।
कृष्णपक्षे विशेषेण स मे भक्तस्स मे प्रियः॥ ३०॥

एकादश्यामुपोष्यैव यः पूजयति मां निशि ।
सोमवारे विशेषेण स मे भक्तो न नश्यति ॥ ३१॥

पञ्चामृतैः स्नापयेद्यः पञ्चगव्येन वा पुनः।
पुष्पोदकैः कुशजलैः तस्मान्नान्यः प्रियो मम ॥ ३२॥

पयसा सर्पिषा वाऽपि मधुनेक्षुरसेन वा ।
पक्काम्रफलजेनापि नारिकेलजलेन वा ॥ ३३॥

गन्धोदकेन वा मां यो रुद्रमन्त्रमनुस्मरन् ।
अभिषिञ्चेत् ततो नान्यः कश्चित्प्रियतरो मम ॥ ३४॥

आदित्याभिमुखो भूत्वा ऊर्ध्वबाहुर्जले स्थितः।
मां ध्यायन् रविबिम्बस्थमथर्वाङ्गिरसं जपेत् ॥ ३५॥
प्रविशेन्मे शरीरेऽसौ गृहं गृहपतिर्यथा ॥ ३६॥
बृहद्रथन्तरं वामदेव्यं देवव्रतानि च ।
तद्योगानाज्यदोहांश्च यो गायति ममाग्रतः॥ ३७॥
इह श्रियं परां भुक्त्वा मम सायुज्यमाप्नुयात् ॥ ३८॥
ईशावास्यादिमन्त्रान् यो जपेन्नित्यं ममाग्रतः।

मत्सायुज्यमवाप्नोति मम लोके महीयते ॥३९॥
भक्तियोगो मया प्रोक्त एवं रघुकुलोद्वह ! ।
सर्वकामप्रदं मत्तः किमन्यच्छ्रोतुमिच्छसि ॥४०॥

॥ इति श्रीपद्मपुराणे शिवगीतासूपनिषत्सु
भक्तियोगो नाम पञ्चदशोध्यायः॥

भक्तियोग इति । नन्वेतावता यज्ञदानादीनाम् , विभूतिधारणादीनाम् , अहिंसादीनां च भक्तिरूपतोक्ता । तथा च नानार्थता भाति । "भक्त्या मामभिजानाति" इत्यादावावृत्तिप्रसङ्गश्चेति चेन्न । 'भज सेवाया'मिति धातोः क्तिनि व्युत्पन्नस्य भक्तिशब्दस्य तदाज्ञाकारित्वरूपसेवापर-पर्यायतया प्रवृत्तिनिमित्तैक्ये नानार्थत्वाभावात् । "श्रुतिस्मृती ममैवाज्ञे" इति भगवदुक्त्या विधिनिषेधयोः तदाज्ञात्वाध्यवसायात् । विक्लित्त्यनुकूलव्यापारत्वेन रूपेणाधिश्रयणादीन् अधश्श्रयणान्तान् बहून् अभिदधतोऽपि पचेर्न नानार्थतेत्यन्यत्र विस्तरः। न लक्षणया नानार्थ्यम् । तथा च 'काष्ठैः पचति', 'काष्ठानि पचन्ति' , 'स्थाली पचती'त्यादौ प्रज्वलनधारणाद्यर्थपरत्वाध्यवसायवत् भक्तिशब्दस्याप्युपपदविशेषबलेन रूपविशेषपरत्वाध्यवसाय इति दिक् ॥४०॥

॥ इति श्रीमद्विशुद्धाद्वैतसिद्धान्तप्रतिष्ठापनैकधुरन्धर
श्रीमच्छङ्करानन्दभारतीविरचिते शिवगीताभाष्ये पञ्चदशोऽध्यायः॥

षोडशोऽध्यायः

श्रीराम उवाच -

भगवन् ! मोक्षमार्गो यस्त्वया सम्यगुदाहृतः।
तत्राधिकारिणं ब्रूहि तत्र मे संशयो महान् ॥१॥

श्रीभगवानुवाच -

ब्रह्मक्षत्रविशश्शूद्राः स्त्रियश्चात्राधिकारिणः।
ब्रह्मचारी गृहस्थो वाऽनुपनीतोऽथवा द्विजः॥२॥

वनस्थो वाऽवनस्थो वा यतिः पाशुपतव्रती ।
बहुनाऽत्र किमुक्तेन यस्य भक्तिश्शिवार्चने ॥३॥

स एवात्राधिकारी स्यान्नान्यचित्तः कथञ्चन ।
जडोऽन्धो बधिरो मूको निश्शौचः कर्मवर्जितः॥४॥

अज्ञोपहासाभक्ताश्च भूतिरुद्राक्षधारिणः।
लिङ्गिनो यश्च वा द्वेष्टि ते नैवात्राधिकारिणः ॥५॥

अज्ञोपहासेति । अज्ञान् उपहसन्तीत्यज्ञोपहासाः। अज्ञेषु अनुग्रहयोग्येषु उपहासतत्पराः। अज्ञोपहासाश्च अभक्ताश्चेति द्वन्द्वः। ते अत्र नैवाधिकारिण इति सम्बन्धः। तथा भूतिरुद्राक्षधारिणः पुरुषान् यो द्वेष्टि, स च ते च ते, अत्र अनधिकारिणः॥५॥

योमां गुरुं पाशुपतं व्रतं द्वेष्टि नराधिप ।।
विष्णुं वा स न मुच्येत जन्मकोटिशतैरपि ॥ ६ ॥

यो मामिति । मां गुरुं पाशुपतव्रतं च यो द्वेष्टि, विष्णुं वा यो द्वेष्टि, सः जन्मनां कोटिशतैरपि न मुच्यते इति सम्बन्धः ॥ ६ ॥

अनेककर्मसक्तोऽपि शिवज्ञानविवर्जितः ।
शिवभक्तिविहीनश्च संसारी नैव मुच्यते ॥ ७ ॥

अनेककर्मेति - बहुतरेषु काम्यकर्मस्वासक्त इत्यर्थः ॥ ७ ॥

आसक्ताः फलरागेण ये तु वैदिककर्मणि ।
दृष्टमात्रफलास्ते तु न भक्तावधिकारिणः ॥ ८ ॥

अविमुक्ते द्वारकायां श्रीशैले पुण्डरीकके ।
देहान्ते तारकं ब्रह्म लभते मदनुग्रहात् ॥ ९ ॥

अविमुक्त इति । अविमुक्तम् - काशीक्षेत्रम् । पुण्डरीकम् - व्याघ्रपुरम् । अत्र यद्यपि उक्तेषु चतुर्षु क्षेत्रेषु स्थितोऽधिकारी तारकं लभत इत्युक्तम्, तथापि अविमुक्ते जन्तुमात्रस्य तारकोपदेशः। तत्रापि पापिनां भैरवयातनानन्तरमुपदेशः, "यातनान्ते दिशेन्मति"मिति वचनात् । निष्पापानां तु प्राणोत्क्रमणकाल एव उपदेशः। द्वारकाश्रीशैलादि क्षेत्रान्तरेषु तु सन्मार्गनिष्ठानामुत्तमाधिकारिणां मरणकाल एवोपदेशः। पापवतां तु जन्मान्तरे काशीप्राप्तिद्वारेति वचनान्तरबलाद्विवेचनीयम् ।

तथा च मात्स्ये - "अविमुक्तसमं क्षेत्रं न भूतं न भविष्यति । ज्ञेये विहितनिष्ठानां परमानन्दमिच्छताम् । या गतिर्विहिता सद्भिः साऽविमुक्ते मृतस्य तु ॥" इति । तथा तत्रैव "कृत्वा पापसहस्राणि पश्चात् सन्तापमेत्य वै। योऽविमुक्ते विमुच्येत स याति परमां गतिम् ॥ जपध्यानविहीनानां ज्ञानवर्जितचेतसाम् । तथा दुःखहतानां च गतिर्वाराणसी नृणाम् ॥" इति । स्कान्देऽपि श्रीशैलादितीर्थान्युपक्रम्य "अन्यानि यानि क्षेत्राणि काशीप्राप्तिकराणि वै । काशीं प्राप्य विमुच्येत नान्यथा तीर्थकोटिभिः॥" इति । तथा तत्रैव - "रागादिदोषपरिपूर्णमनो-हृषीकाः काशीपुरीमतुलदिव्यमहाप्रभावाम् । ये कल्पयन्त्यपरतीर्थसमां समन्तात् ते पापिनो न सह तैः परिभाषणीयम् ॥", "पुण्यवानितरो वाऽपि मम क्षेत्रस्य सेवया । मुक्तो भवति देवेशि ! नात्र कार्या विचारणा॥" इति, तथा - "बहुजन्मकृताभ्यासाद्योगी मुच्येत मानवः। मृतमात्रोऽपि मुच्येत काश्यामेकेन जन्मने"त्यादि । जाबालोपनिषदि श्रूयते - "अविमुक्तो वै देवानां देवयजनं सर्वेषां भूतानां देवसदनं अत्र हि जन्तोः प्राणोत्क्रमणेषु रुद्रस्तारकं ब्रह्म व्याचष्टे येनामृतीभूत्वा मोक्षी भवती"त्यादि । अत्र हि जन्तुपदोपादानात् क्रिमिकीटादिसाधारण्येनैव मुक्तिर्लभ्यते । तथा रामतापनीयेऽपि "क्षेत्रे तत्र प्रदेशेऽथ यत्र कुत्रापि वा मृताः। क्रिमिकीटादयोऽप्यत्र मुक्तास्सन्तु न चान्यथा॥" इति। तथा तत्रैव "मुमूर्षोः दक्षिणे कर्णे यस्य कस्यापि वा स्वयम् । उपदेक्ष्यसि तन्मन्त्रं स मुक्तो भविता शिव॥" इत्यादि। इदञ्च हेमाद्र्यादिमहानिबन्धेषु स्पष्टमितीह विस्तरभयादुपरम्यते ॥९॥

यस्य हस्तौ च पादौ च मनश्चैव सुसंयतम् ।
विद्या तपश्च कीर्तिश्च स तीर्थफलमश्नुते ॥१०॥

विप्रस्यानुपनीतस्य विधिरेवमुदाहृतः[१३७]।
नाभिव्याहारयेद्ब्रह्म[१३८] स्वधानिनयनादृते ॥११॥

विप्रस्येति । अत्र विप्रपदं त्रैवर्णिकोपलक्षकम् । अनुपनीतविप्रस्य त्रैवर्णिकस्य वक्ष्यमाणरीत्या विधिरुदाहृतः। तमेव विधिमाह - नाभिव्याहारयेदिति । ब्रह्म - वेदम् , नाभिव्याहारयेत् - नोच्चारयेत्। स्वधानिनयात् , ऋते - विनेत्यर्थः। अत्र व्याहरयेदिति युक्तः पाठः, स पाठस्तु संज्ञापूर्वकत्वा वृद्धेरप्रवृत्त्या आर्षतया वा समाधेयः। "अन्यत्रौदककर्म स्वधापितृयुक्तेभ्य" इति वसिष्ठोक्तेः। "अगृहीताक्षरः पुत्रः पित्रोस्संस्कारमर्हति" इति स्मृत्यन्तराच्चेति हरदत्तः। स्मृतिचन्द्रिकायां तु "कृतचूडोऽनुपनीतस्तु पुत्रः श्राद्धं समाचरेत्। उदाहरेत् स्वधाकारं न तु वेदाक्षराण्यसौ॥" इति स्मृतावुदाहृत्य "कृतचौलस्तु कुर्वीत उदकं पिण्डमेव च । स्वधाकारं प्रयुञ्जीत वेदोच्चारं न कारयेत्॥" इति व्याघ्रवचनं चोदाहृत्य मन्त्रोच्चारणं वैकल्पिकमिति सिद्धान्तितम् ॥१०-११॥

स शूद्रेण समस्तावद्यावद्वेदान् न जानते[१३९]।
नामसङ्कीर्तने ध्याने सर्व एवाधिकारिणः॥ १२॥

स इति । यः अनुपनीतः, तावच्छूद्रेण समः यावत्पर्यन्तं वेदान् न

---

१३७ "विधिरेष उदाहृतः" इति पाठान्तरम् ।

१३८ "नाभिव्याहरयेद् ब्रह्मे"ति पाठान्तरम् ।

१३९ " यावद्वेदान्न जायते" इति पाठान्तरम् । यावत्पर्यन्तं 'वेदान्न जायते' सावित्रं जन्म न प्राप्नोतीत्यर्थः।

जानातीत्यर्थः। छान्दसं रूपम् । यद्वा न जानते - न बोधयन्ति यावत्तावदसौ शूद्रेण सम इति अन्तर्भावितण्यर्थता बोध्या । तथा च स्त्रीशूद्रानुपनीतानां भाषाप्रबन्धादिना च यथायथं ज्ञानं सम्भवतीति भावः॥ १२॥

संसारान्मुच्यते जन्तुः शिवतादात्म्यभावनात् ।
यथा दानं तपो वेदाध्ययनं चान्यकर्म वा ।
सहस्रांशं तु नार्हन्ति सर्वदा ध्यानकर्मणः॥ १३॥

जातिमाश्रममङ्गानि देशं कालमथापि वा ।
आसनादीनि कर्माणि ध्यानं नापेक्षते क्वचित् ॥ १४॥

गच्छंस्तिष्ठन् चरन् वाऽपि शयानो वाऽन्यकर्मणि ।
पातकेनापि वा युक्तो ध्यानादेव विमुच्यते॥ १५॥

यथेति । यथा - यथावत् विध्युक्तप्रकारेण, क्रियमाणं दानादि ध्यानस्य सहस्रांशं नार्हतीत्यर्थः॥ १४॥

नेहाभिक्रमनाशोऽस्ति प्रत्यवायो न विद्यते ।
स्वल्पमप्यस्य धर्मस्य त्रायते महतो भयात् ॥ १६॥

नेहेति । इह - निदिध्यासने, अभिक्रमनाशः - विघ्नः, नास्ति । ईश्वर एव विघ्नान् वारयतीत्यर्थः। तथा प्रत्यवायो न विद्यते - "नित्यकर्म परित्यज्य वेदान्तश्रवणं विना। वर्तमानस्तु संन्यासी पतत्येव न संशयः॥" इति

स्मृत्युक्तः प्रत्यवायोऽपि श्रवणाङ्गभूतमनननिदिध्यासनानुष्ठानात् न विद्यते। स्वल्पमपीति । अस्य निदध्यासनरूपस्य धर्मस्य सम्बन्धी अल्पमपि, निदिध्यासैकदेशोऽपीति यावत् । महतस्संसारभयात् त्रायते । वासनाद्वारा जन्मान्तरेऽपि ज्ञानोत्पत्तौ उपयुक्तत्वादिति भावः। तदुक्तं भगवद्गीतासु (६-४३,४४) "तत्र तं बुद्धिसंयोगं लभते पौर्वदैहिकम् । यतते च ततो भूयस्संसिद्धौ कुरुनन्दन ॥ पूर्वाभ्यासेन तेनैव ह्रियते ह्यवशोऽपि सः" इति । यद्यपि गीतान्तरे 'नेहाभिक्रमे'त्याद्ययं श्लोको (भ.गी. २-४०) निष्कामसकलकर्मपरतया व्याख्यातः। तथापीह निदिध्यासनमात्रं उपक्रम्याभिधानादेवं व्याख्यातमिति बोध्यम् ॥ १६ ॥

आश्चर्ये वा भये शोके क्षुते वा मम नाम यः ।
व्याजेनापि स्मरेन्मर्त्यः स याति परमां गतिम् ॥ १७ ॥

महापापैरपि स्पृष्टो देहान्ते यस्तु मां स्मरेत् ।
पञ्चाक्षरीं वोच्चरति स मुक्तो नात्र संशयः ॥ १८ ॥

विश्वं शिवमयं यस्तु पश्यन्नात्मानमात्मना ।
तस्य क्षेत्रेषु तीर्थेषु किं कार्यं वाऽन्यकर्मसु ॥ १९ ॥

सर्वेण सर्वदा कार्यं भूतिरुद्राक्षधारणम् ।
युक्तेनाथाप्ययुक्तेन शिवभक्तिमभीप्सता ॥ २० ॥

नर्यभस्म समायुक्तो रुद्राक्षान् यस्तु धारयेत् ।
महापापैरपि स्पृष्टो मुच्यते नात्र संशयः ॥ २१ ॥

अन्यानि शैवकर्माणि करोतु न करोतु वा ।
शिवनाम जपेद्यस्तु सर्वदा मुच्यते तु सः ॥ २२॥

अन्तकाले तु रुद्राक्षान् विभूतिं धारयेत्तु यः।
महापापोपपापौघैरपि स्पृष्टो नराधमः।
सर्वथा नोपसर्पन्ति तं जनं यमकिङ्कराः॥ २३॥

बिल्वमूलमृदा यस्तु शरीरमुपलिम्पति।
अन्तकालेऽन्तकजनैस्स दूरीक्रियते नरः॥ २४॥

श्रीराम उवाच -

भगवन् ! पूजितः कुत्र कुत्र वा त्वं प्रसीदसि ।
तद्ब्रूहि मम जिज्ञासा वर्तते महती विभो ॥ २५॥

श्रीभगवानुवाच -

मृदा वा गोमयेनापि भस्मना चन्दनेन वा ।
सिकताभिर्दारुणा वा पाषाणेनाथ निर्मिता ॥ २६॥

लोहेन वाऽथ रङ्गेण कांस्यकर्परपित्तलैः।
ताम्ररौप्यसुवर्णैर्वा रत्नैर्नानाविधैरपि ॥ २७॥

अथवा पारदेनैव कर्पूरेणाथवा कृता ।

प्रतिमा शिवलिङ्गं वा द्रव्यैरेतैः कृतं तु यत् ॥२८॥

तत्र मां पूजयत्तेषु फलं कोटिगुणोत्तरम् ।
मृद्दारुकांस्यलोहैश्च पाषाणेनापि निर्मिता ॥२९॥

गृहिणा प्रतिमा कार्या शिवं शश्वदभीप्सता ।
आयुः श्रियं कुलं धर्मं पुत्रानाप्नोति तैः क्रमात् ॥३०॥

बिल्ववृक्षे तत्फले वा यो मां पूजयते नरः।
परां श्रियमनुप्राप्य मम लोके महीयते ॥३१॥

बिल्ववृक्षं समाश्रित्य यो मन्त्रान् विविधान् जपेत् ।
एकेन दिवसेनैव तत्पुरश्चरणं भवेत् ॥३२॥

यस्तु बिल्ववने नित्यं कुटीं कृत्वा वसेन्नरः।
सर्वे मन्त्राः प्रसिध्यन्ति जपमात्रेण केवलम् ॥३३॥

पर्वताग्रे नदीतीरे बिल्ववृक्षे शिवालये।
अग्निहोत्रे केशवस्य सन्निधौ वा जपेत्तु यः ॥३४॥
नैवास्य विघ्नं कुर्वन्ति दानवा यक्षराक्षसाः॥ ३५॥
तं न स्पृशन्ति पापानि शिवसायुज्यमृच्छति ॥३६॥

स्थण्डिले वा जले वह्नौ वायावाकाश एव च ।
गुरौ स्वात्मनि वा यो मां पूजयेत् प्रयतो नरः।
स कृत्स्नं फलमाप्नोति लवमात्रेण राघव ! ॥३७॥

आत्मपूजासमा नास्ति पूजा रघुकुलोत्तम !।
मत्सायुज्यमवाप्नोति चण्डालोऽप्यात्मपूजया ॥३८॥

सर्वान् कामानवाप्नोति मनुष्यः कम्बलासने ।
कृष्णाजिने भवेन्मुक्तिर्मोक्ष श्रीर्व्याघ्रचर्मणि ॥३९॥

कुशासने भवेज्ज्ञानमारोग्यं पत्रनिर्मिते ।
पाषाणे दुःखमाप्नोति काष्ठे नानाविधान् गदान् ।

वस्त्रे श्रियमवाप्नोति भूमौ मन्त्रो न सिध्यति ॥४०॥

कम्वलासनमिति - चित्रकम्बलमित्यर्थः। यथाह व्यासः - "कृष्णाजिने ज्ञानसिद्धिर्मोक्षश्रीर्व्याघ्रचर्मणि । कुशासने व्याधिनाशः सर्वेष्टं चित्रकम्बले॥" इति । पत्रनिर्मित इति - कोमलपत्रनिर्मितासन इत्यर्थः। तथा च व्यासः "कौशेयं कम्वलं चैव अजिनं पटमेव च । दारुजं बालपत्रं च आसनं परिकल्पयेत्॥" इति वदन् बालत्वेन पत्रं विशिनष्टि । काष्ठ इति । यद्यपि उदाहृते व्यासवाक्ये दारुजं ग्राह्यतयोक्तम् , तथापीह काष्ठविशेषपरो बोध्यः। तथा च व्यासः "वंशासने तु दारिद्र्यं पाषाणे व्याधिसम्भवः। धरण्यां दुःखसम्भूतिः दौर्भाग्यं छिद्रदारुजे । तृणे धनयशोहानिः पल्लवे चित्तविभ्रमः॥" इति । अत्र पल्लवशब्दः

प्रागुक्तबालपत्रेतरपरो बोध्य इति दिक्॥ ३९-४०॥

उदङ्मुखः प्राङ्मुखो वा जपं पूजां समाचरेत् ॥४१॥

अक्षमालाविधिं वक्ष्ये शृणुष्वावहितो नृप ! ।
साम्राज्यं स्फाटिको दद्यात् पुत्रजीवः परां श्रियम् ॥४२॥

आत्मज्ञानं कुशग्रन्थी रुद्राक्षस्सर्वकामदः ।
प्रवालैश्च कृता माला सर्वलोकवशप्रदा ॥४३॥

मोक्षप्रदा च माला स्यादामलक्याः फलैः कृता ।
मुक्ताफलैः कृता माला सर्वविद्याप्रदायिनी॥ ४४॥

माणिक्यै रचिता माला त्रैलोक्यश्रीवशङ्करी ।
नीलैर्मरकतैर्वाऽपि कृता शत्रुभयप्रदा ॥४५॥

सुवर्णरचिता माला दद्याद्वै महतीं श्रियम् ।
तथा रौप्यमयी माला कन्यां यच्छति कामिताम् ॥४६॥

उक्तानां सर्वकामानां दायिनी पारदैः कृता ॥४७॥

अक्षमालाविधिमिति । अत्र श्लोके गौतमो विशेषमाह "अङ्गुल्या जपकाले तु एकमेकमुदाहृतम् । रेखया त्रिगुणं पुत्रजीवे दशगुणाधिकम् ॥ शतं स्याच्छङ्कमणिभिः प्रवालैश्च सहस्रकम् । स्फाटिकैर्दशसाहस्रं मौक्तिकैर्लक्षमुच्यते॥ पद्माक्षैर्दशलक्षं तु सौवर्णैः कोटिरुच्यते। कुशग्रन्थ्या

च रुद्राक्षैरनन्तफलमुच्यते॥" इति । मूलश्लोकास्तु स्पष्टार्थकाः॥

अष्टोत्तरशतं माला तत्र स्यादुत्तमोत्तमा।
शतसङ्ख्योत्तमा माला पञ्चाशन्मध्यमा मता ॥४८॥

अक्षमालामणिसङ्ख्यामाह - अष्टोत्तरशतमिति । अष्टोत्तरशतं ये मणयस्तदात्मिका माला उत्तमोत्तमा, अनुत्तमेत्यर्थः॥४८॥

चतुःपञ्चाशती यद्वा अधमा सप्तविंशतिः।
अधमा पञ्चविंशत्या यदि स्याच्छतनिर्मिता ॥४९॥

पञ्चाशदक्षराण्यत्रानुलोम प्रतिलोमतः।
इत्येवं स्थापयेत् स्पष्टं न कस्मैचित् प्रदर्शयेत् ॥५०॥

यत् - या, चतुःपञ्चाशता निर्मिता, मध्यमेत्यनुषज्यते । या तु सप्तविंशतिः सा अधमा । तथा या पञ्चविंशत्या निर्मिता साऽप्यधमेत्यर्थः। शतसङ्ख्योत्तमेति प्रागुक्तम् । तथाऽनुवादेन गुणविशेषं विधत्ते - यदि स्यादित्यारभ्य स्थापयेदित्यन्तेन ॥४९-५०॥

कर्णौ विन्यस्तया यस्तु क्रियते मालया जपः।
एकवारेण तस्यैव पुरश्चर्या कृता भवेत् ॥५१॥

सव्यपार्ष्णिं गुदे स्थाप्य दक्षिणं च शिवोपरि।
योनिमुद्राबन्ध एवं भवेदासनमुत्तमम् ॥५२॥

शिवोपरीति - शिवः, लिङ्गं, मेढ्रमिति यावत् । ध्वजोपरीति पाठेऽप्ययमेवार्थो बोध्यः ॥५१-५२॥

योनिमुद्रासने स्थित्वा प्रजपेद्यः समाहितः।
यं कञ्चिदपि वा मन्त्रं तस्य स्युस्सर्वसिद्धयः॥ ५३॥

यं कञ्चिदपीति - दुष्टमपीत्यर्थः। दोषाः - "छिन्नो रुद्धः शक्तिहिनः पराङ्मुख उदीरितः। बधिरो नेत्रहीनश्च कीलितः स्तम्भितस्तथा॥ दग्धस्त्रस्तश्च भीतश्च मलिनश्च तिरस्कृतः। भेदितश्च सुषुप्तश्च मदोन्मत्तश्च मूर्छितः। हतवीर्यश्च हीनश्च प्रध्वस्तो बालकः पुनः॥ कुमारस्तु युवा प्रौढो वृद्धो निस्त्रिंशकस्तथा । निर्बीजस्सिद्धिहीनश्च मन्दः कूटस्तथा पुनः॥ निरंशः सत्वहीनश्च केकरो बीजहीनकः। धूमितालिङ्गितौ स्यातां मोहितश्च क्षुधातुरः॥ अतिदृप्तोऽङ्गहीनश्च अतिक्रुद्धस्समीरितः। अतिक्रूरश्च सव्रीडः शान्तमानस एव च ॥ स्थानभ्रष्टश्च विकलः सोऽतिवृद्धः प्रकीर्तितः। निस्नेहः पीडितश्चापि मीलितस्तु तथैव च । विपक्षस्थो दारितस्तु मूलनग्नो भुजङ्गमः। शून्यश्चापि हतश्चाथ मन्त्रदोषास्समीरिताः॥" (शारदातिलकम् २/६४-७०) इति शारदातिलक-पदार्थादर्शादिग्रन्थेषु[१४०] सङ्गृहीताः। तादृशदोषोपेता अपि मन्त्राः योनिमुद्रासने जपवशात् सिध्यन्तीत्यर्थः ॥५३॥

छिन्ना रुद्धाः स्तम्भिताश्च मिलिता [१४१]मूर्छितास्तथा ।

---

१४० 'शारदातिलकम्' श्रीलक्ष्मणदेशिकेन्द्रविरचितम् । तस्य श्रीराघवभट्टेन 'पदार्थादर्श' इति नाम्ना व्याख्या विरचिता ।

१४१ "मथिताः" इति पाठान्तरम् ।

सुप्ता मत्ता हीनवीर्या दग्धत्रस्तारिपक्षगाः॥ ५४॥

बालयौवनमत्ताश्च वृद्धमन्त्राश्च ये मताः।
योनिमुद्रासने स्थित्वा मन्त्रानेवंविधान् जपेत् ।
तस्य सिद्ध्यन्ति ते मन्त्राः नान्यस्य तु कथञ्चन ॥५५॥

छिन्ना इति । "मनोर्यस्यादिमध्यान्तेष्वानिलं बीजमुच्यते । संयुक्तं वा वियुक्तं वा स्वराक्रान्तं त्रिधा पुनः॥ चतुर्धा पञ्चधा वाऽपि स मन्त्रश्छिन्न संज्ञकः॥ आदिमध्यावसानेषु भूबीजद्वन्द्वलाञ्छितः। रुद्धमन्त्रस्स विज्ञेयः भुक्तिमुक्तिविवर्जितः॥" (शा.ति. २/७१-७२) भूबीजद्वन्द्वम् - लंद्वयम् । "एकं मध्ये द्वयं मूर्ध्नि यस्मिन्नस्त्रपुरन्दरौ । विद्येते स तु मन्त्रः स्यात् स्तम्भितः सिद्धिरोधकः॥" (शा.ति. २-७८) अस्त्रं - फट्कारः, पुरन्दरः - लः। "आदिमध्यावसानेषु भवेन्मार्णचतुष्टयम् । यस्य मन्त्रस्स मलिनो मन्त्रवित् तं विवर्जयेत् ॥" (शा.ति. २-८१) मार्णः - मवर्णम्, इत्यादि आगमग्रन्थेभ्यो बोध्यम्, विस्तरभयादुपरम्यते॥५४-५५॥

ब्राह्मं मुहूर्तमारभ्यामध्याह्नं प्रजपेन्मनुम् ।
अत ऊर्ध्वं कृते जप्ये विनाशो भवति ध्रुवम् ।
पुरश्चर्याविधावेवं सर्वकामफलेष्वपि ॥५६॥

नित्ये नैमित्तिके वाऽपि तपश्चर्यासु वा पुनः।
सर्वदैव जपः कार्यो न दोषस्तत्र कश्चन ॥५७॥

ब्राह्ममिति । ब्राह्ममुहूर्तलक्षणं चोक्तं विष्णुपुराणे "रात्रेः पश्चिमयामस्य

मुहूर्तो यस्तृतीयकः। स ब्राह्म इति विज्ञेयो विहितस्स प्रबोधने॥" इति। तं मुहूर्तमारभ्यामध्याह्नम्, मनुं - मन्त्रम्, जपेत्। "पोरदुपधात्" (पा.सू. ३-१-९८) इति भावे यत्। एवमुक्तः कालः पुरश्चर्याविधौ सर्वकामजपेषु च बोध्यः। नित्यादिजपस्तु सर्वदैव कार्यः॥५६-५७॥

यस्तु रुद्रं जपेन्नित्यं ध्यायमानो ममाकृतिम्।
षडक्षरं वा प्रणवं निष्कामो निर्जितेन्द्रियः॥ ५८॥

तथाथर्वशिरोमन्त्रं कैवल्यं वा रघूत्तम!।
स तेनैव हि देहेन शिवस्सञ्जायते स्वयम्॥५९॥

ध्यायमानः - ध्यायन्। कैवल्यं - कैवल्योपनिषदमित्यर्थः॥५८-५९॥

अधीते शिवगीतां यो नित्यमेतां जपेत्तु यः।
शृणुयद्वा स मुक्तः स्यात् संसारान्नात्र संशयः॥ ६०॥

सूत उवाच -

एवमुक्त्वा महादेवः तत्रैवान्तरधीयत।
रामः कृतार्थमात्मानममन्यत तथैव सः॥ ६१॥

तत्रैवान्तरधीयत इति। अन्तर्हित इत्यर्थः। कर्मकर्तरि लङ्॥६१॥

एवं मया समासेन शिवगीता समीरिता॥६२॥

एतां यः प्रजपेन्नित्यं शृणुयाद्वा समाहितः।

एकाग्रचित्तो यो मर्त्यः तस्य मुक्तिः करे स्थिता ॥६३॥

यः समाहितस्सन् नित्यम्, एतां गीतां प्रपठेत्, यो मर्त्यः शृणुयात्, तस्य मुक्तिः करे स्थिता - अवश्यं भविष्यतीत्यर्थः॥६२-६३॥

अतः शृणुध्वं मुनयो नित्यमेतां समाहिताः।
अनायासेन वो मुक्तिर्भविता नात्र संशयः॥६४॥

अनायासेनेति । वः - युष्माकम् , मुक्तिर्भविता भविष्यतीत्यर्थः। अनायासमेव विशदयति - कायक्लेशः मनःक्षोभः धनहानिश्चेत्यादिरात्मनो पीडा नास्तीति सम्वन्धः। शृणुध्वम् - शृणुत॥६४॥

कायक्लेशो मनःक्षोभो धनहानिर्न चात्मनः।
पीडाऽस्ति श्रवणादेव यस्मात् कैवल्यमाप्नुयात् ।
शिवगीतामतो नित्यं शृणुध्वमृषिसत्तमाः॥ ६५॥

ऋषय ऊचुः-

अद्यप्रभृतिनस्सूत ! त्वमाचार्यः पिता गुरुः।
अविद्यायाः परं पारं यस्मात्तारयितासि नः॥६६॥

उत्पादकब्रह्मदात्रोर्गरीयान् ब्रह्मदः पिता ।
तस्मात्सूतात्मज! त्वत्तस्सत्यं नान्योऽस्ति नो गुरुः॥६७॥

व्यास उवाच -

इत्युक्त्वा प्रययुस्सर्वे सायं सन्ध्यामुपासितुम् ।
स्तुवन्तः सूतपुत्रं तं सन्तुष्टा गोमतीतटम् ॥ ६८॥

॥ इति श्रीपद्मपुराणे उत्तरखण्डे शिवगीतासूपनिषत्सु ब्रह्मविद्यायां योगशास्त्रे शिवराघवसंवादे मोक्षयोगो नाम षोडशोऽध्यायः॥

प्रययुरिति । बहिस्सन्ध्योपासनस्य विशिष्टफलत्वादिति भावः। यदाह व्यासः - "गृहे त्वेकगुणा सन्ध्या गोष्ठे दशगुणा स्मृता । शतसाहस्रिका नद्यामनन्तं विष्णुसन्निधौ॥" "बहिस्सन्ध्या दश गुणा गर्तप्रस्रवणेषु च। ख्याते तीर्थे शतगुणा ह्यनन्ता जाह्नवीजले॥" इति । शातातपोऽपि - "अनृतं मद्यगन्धं च दिवामैथुनमेव च । पुनाति वृषलस्यान्नं बहिस्सन्ध्या उपासिता॥" इति । यत्त्वत्रिवचनं "सन्ध्यात्रयं तु कर्तव्यं द्विजेनात्मविदा सदा । उभे सन्ध्ये तु कर्तव्ये ब्राह्मणैः स्वगृहेषु हि॥" इति । अस्यायमाशयः - यद्यपि बहिरेव सन्ध्यात्रयं प्रशस्तम् , तथापि यदा विहरणाद्यङ्गलोपप्रसक्तिस्तदा श्रौतस्य विहरणस्य प्राबल्यात्तदनुरोधेन द्वे सन्ध्ये गृहेष्वप्यनुष्ठेये इति । स्फुटं चैतन्माधवादिग्रन्थेष्विति दिक्॥ ६७॥

॥ इति श्रीमद्विशुद्धाद्वैतसिद्धान्तप्रतिष्ठापनैकधुरन्धर श्रीमच्छङ्करानन्दभारतीविरचिते शिवगीताभाष्ये षोडशोध्यायः॥

॥ शिवगीतास्थश्लोकाद्यचरणप्रतीकानां मातृकावर्णक्रमेणानुक्रमणी ॥

SRISHIVAGEETHA

Bhashyakara :
Sri **Shankarananda Bharati**

Chief Editor:
Prof. Sripada Subrahmanyam

Editor:
Sri T.V. Shivakumarasharma



A.P. Govt. Oriental Manuscripts Library and
Research Institute, Hyderabad - 500 007.